Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३ ) महार्थगम्भीरस्तवः

આ સ્તોત્રનું 'नेमिजिनद्वात्रिंशिका' એ અપરનામ તેના ૩૨ પદ્યો હોવાના કારણે છે. પરંતુ સ્તોત્રમાં પિંડસ્થાદિ ધ્યાન વગેરેનું વર્ણન હોવાથી આચાર્ય શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિરથી પ્રાપ્ત પ્રતના મથાળાને તથા તે પ્રતમાં મળતા ૩૩મા પદ્યના ઉલ્લેખને પ્રાધાન્ય આપ્યું છે.

'सहजेनात्मतेजसा तमोमग्नं मां उद्धर' (પદ્ય-૨)થી પરમજ્યોતિ-સ્વરૂપ પરમાત્માને તમસ્‌થી ઉદ્ધાર કરવાની વિનંતિ કરીને સ્તોત્રની શરૂઆત કરી છે. આ તમસ્ કયો ? તે પણ પદ્ય-૫માં જણાવે છે 'मोहतमस्.' અહીં પણ પરમાત્માને તેમના 'चिन्मयमहस्'નું દાન કરવાની વિનંતિ છે. આ પરમબ્રહ્મજ્યોતિને સર્વવિશ્વમય દર્શાવીને 'એ જ્યોતિ સર્વત્ર હોવા છતાં મારા મોહાંધકારને દૂર શા માટે નથી કરતી ?' એ પ્રશ્ન પ્રભુ સન્મુખ વ્યક્ત કર્યો છે. (પદ્ય-૧૯) અંતે પણ પરમાત્મા પાસે એક માત્ર 'પરં મહસ્'ની જ યાચના કરી છે.

नाऽर्थयेऽन्यद् विभो ! किञ्चिद् याचे त्वामेतदेव हि ।
समुल्लसतु मच्चित्ते, त्वत्प्रसादात् परं महः ॥३०॥

પદ્ય-૬ પ્રભુના ધ્યાનને સંસારસાગરથી પાર ઉતારનાર યાનપાત્ર જણાવે છે. ત્યારબાદ ધ્યાન માટે આવશ્યક ચિત્તશાંતિ માટે પરમાત્માને વિનંતિ કરી છે. 'મદોદ્ધત, કદાગ્રહી, તૃષ્ણાથી તરલ અને સ્મરતાપથી વિહ્વલ મારા સ્વાન્તને પ્રભુ ! તારું ધ્યાનામૃતસ્નાન શાંતિ પમાડે.' (પદ્ય ૭-૮) અહીં ધ્યાનને જે અમૃતોપમા આપી તે ઉપમા અનાહતનાદને આપી છે. (પદ્ય-૧૦) ત્યારબાદ ક્રમશઃ પિંડસ્થ, પદસ્થ, અને રૂપસ્થ ધ્યાનનું સંક્ષિપ્ત સ્વરૂપદર્શન (પદ્ય-૧૧થી ૧૪) કરાવીને શુક્લધ્યાનના ચાર પ્રકાર દર્શાવ્યા છે. (પદ્ય ૧૫-૧૬)'

તત્વજ્ઞપુરુષોને માન્ય પરમાત્માનું પરમાર્થસ્વરૂપ–'निराकारं निराधारं, निराहारं, निरञ्जनं' દર્શાવ્યું છે. (પદ્ય-૧૮) સાથે જે કોઈ પણ નિષ્કર્મ,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

નિઃસંગી, નિત્યતૃપ્ત, નિરંજન અને સદાનંદમય હોય તે પ્રભુ ! તું જ છે આવી ઉદાર દૃષ્ટિ દ્વારા સર્વ શુભતામાં પરમાત્માનું આસ્તિત્વ સ્વીકૃત કર્યું છે. (પદ્ય-૨૫)

૨૨મું પદ્ય ધ્યાતા અને ધ્યાન બન્ને પરમધ્યેયમાં વિલીન થઈ જવાની વાત કરતા જણાવે છે કે—'ધ્યાતાનું અસ્તિત્વ જ વિલીન થઈ જતું હોવાના કારણે બહિર્મુખ લોકો પરમના ધ્યાનમાં વિમુખ હોય છે.'

૨૨ અને ૨૪મું પદ્ય ધ્યેય-ધ્યાન અને ધ્યાતાની એકસ્વરૂપતા દર્શાવે છે. જ્યાંસુધી ત્રણેની ભિન્નતાની માન્યતા હોય ત્યાં સુધી મન ઉદાસીન પદ પર આસીન ન થઈ શકે.

'नाथ ! त्वद्वेदिनो जनाः समस्वान्ताः' (પદ્ય-૨૬) કહીને પરમના વેદનનું ફલોપદર્શન કરાવ્યું, સાથે એ પરમવેદન વિના તપ-જપ-વિનય-શ્રુત આદિ નિરર્થક હોવાનું (પદ્ય-૨૭) જણાવીને પ્રસ્તુત સ્તવનું માહાત્મ્યદર્શન કરાવે છે.—'हे यादवाधीश ! श्रोत्रपेयाऽमृतं एतद् स्तोत्रं यः सुकृती त्रिकालं पठेत्, सः त्वत्स्वरुपवित् भवेत् ।' (पद्य-३१)

પ્રસ્તુત સ્તોત્રના ૩જા પદ્યનો ભાવાનુવાદ એક ગુજરાતી સ્તવનમાં જોવા મળે છે.

'रागादिशत्रवो देव !, निर्जिता ये त्वया पुरा ।
ते एव तव वैरेण, मां बाधन्ते त्वदाश्रयम् ॥'

'તુમથી ભાગ્યા લાગ્યા મુજ કેડ, ચિહુંગતિની કરાવે ખેડ,
જાણી તુમચો દે મુજ માર, તો કિમ ન કરો પ્રભુજી સાર.'
(ક્ષમાવિજયજીશિષ્ય યશોવિજયજીકૃત કુંથુનાથ જિનસ્તવન-૫)

સ્તોત્રમાં શરૂઆતની વિનંતિ છે—'પ્રભો ! મને ઉપેક્ષો નહીં, જો મારી ઉપેક્ષા કરો છો તો આપની અમિત સુસ્વામિતા ક્યાં રહી ?' (પદ્ય-૪) આ વિનંતિ સાંભળીને જાણે સન્મુખ થયેલા પ્રભુ પાસે ભક્તકવિએ છેલ્લે માંગી લીધું—'હે નાથ ! વિષયસુખોને ગોચર મારા સંકલ્પો સ્વલ્પ થઈ જાય એટલું કરી આપો.' (પદ્ય-૨૮)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

આમ, આ સ્તોત્ર ધ્યાનની પ્રક્રિયાના વર્ણન સાથે ભક્તની હૃદય-ઉર્મિઓના ગંભીર મહાસાગર જેવું છે. કદાચ આથી જ પ્રસ્તુત સ્તવને 'મહાર્થગંભીર' નામ આપ્યું હશે...

આ સ્તોત્રના કર્તા વિષે બે અભિપ્રાય બાંધી શકાય.

૧. ૩૩માં પદ્યના ઉલ્લેખ–'पञ्चागस्पृष्टभूतलश्चक्रवर्ती पुनः प्रणति स्म।' થી ચક્રવર્તી નામક કોઈ હોય. અથવા

૨. ૩૨માં પદ્યના–'चन्द्रसूरीह दीप्यते' પદથી ચન્દ્રસૂરિ હોય. જોકે ૩૩મું પદ્ય પ્રાપ્ત ત્રણ પ્રતમાંથી માત્ર એક જ પ્રતમાં પ્રાપ્ત થાય છે. આથી ચન્દ્રસૂરિજી વિષે કલ્પના વધુ દૃઢ થાય છે.

ચંદ્રસૂરિજી નામના ૫ આચાર્ય ભગવંતો થઈ ગયા છે.

(૧) રાજગચ્છીય શીલભદ્રસૂરિજી > ધનેશ્વરસૂરિજીના શિષ્ય ચંદ્રસૂરિજી તેમનું આચાર્યપદ પૂર્વે નામ પાર્શ્વદેવ ગણિ હતું. તેઓશ્રીએ અનેક ગ્રંથોની રચના કરી છે.[૧]

(૨) સંવેગરંગશાલાના રચયિતા જિનચંદ્રસૂરિજીના શિષ્ય ચંદ્રસૂરિજી.[૨]

(૩) મલધારી હેમચંદ્રસૂરિજીના શિષ્ય ચંદ્રસૂરિજી.[૩]

(૪) સુપ્રસિદ્ધ સૈદ્ધાન્તિક મુનિચંદ્રસૂરિજીનું અપરનામ પણ ચંદ્રસૂરિજી હતું.

---

૧. ન્યાયપ્રવેશ વૃત્તિપંજિકા (ર.સં. ૧૧૬૯), નિશીથચૂર્ણિ વિંશોદ્દેશક વૃત્તિ (ર.સં. ૧૧૭૩), નંદી ટીકા દુર્ગપદ વ્યાખ્યા, શ્રાવકપ્રતિક્રમણવૃત્તિ (ર.સં. ૧૨૨૨), જીતકલ્પ બૃહચ્ચૂર્ણિ વ્યાખ્યા (ર.સં. ૧૨૨૭), નિરયાવલિવૃત્તિ (ર.સં. ૧૨૨૮) ચૈત્યવંદનસૂત્રવૃત્તિ, પ્રતિષ્ઠાકલ્પ, સર્વસિદ્ધાંત વિષમપદ પર્યાય, સુખબોધ સમાચારી, ઉવસગ્ગહરં વૃત્તિ, સિદ્ધચક્ર સ્તવન, સંગીત સમયસાર, સંગીત રત્નાકર, પદ્માવતી અષ્ટકવૃત્તિ વગેરે.

૨. તેઓ વ્યાકરણના પારંગત, સાહિત્યસાગર, વાદિવિજેતા, કામવિજેતા, સિદ્ધાંતના પારગામી હતા એવો ઉલ્લેખ તેમના શિષ્ય હરિભદ્રસૂરિજીકૃત મલ્લિનાથ ચરિત્રની પ્રશસ્તિમાં છે.

૩. તેમણે મુણિસુવ્વયચરિયં (ર.સં. ૧૧૯૩), સંગ્રહણી, લઘુસમાસની રચના કરી છે.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(૫) યશોભદ્રસૂરિજીના શિષ્ય ચંદ્રસૂરિજી.[૪]

પ્રસ્તુત સ્તોત્રના કર્તા ચંદ્રસૂરિજી હોય તો તે આ પાંચ આચાર્ય ભગવંતોમાંના જ કે કોઈ અન્ય, તે જણાતું નથી. જોકે મલધારીય ચંદ્રસૂરીજી અને મુનિચંદ્રસૂરિજી (=ચંદ્રસૂરિજી)ની સર્વ રચનાઓ પ્રાકૃતમાં પ્રાપ્ત થાય છે. તથા જિનચંદ્રસૂરિજીના શિષ્ય ચંદ્રસૂરિજીની કોઈપણ રચનાનો ઉલ્લેખ પ્રાપ્ત થતો નથી. આથી પ્રસ્તુત સ્તોત્ર રાજગચ્છીય ચંદ્રસૂરિજી અથવા યશોભદ્રસૂરિજીના શિષ્ય ચંદ્રસૂરિજીની રચના હોઈ શકે.

श्रीशैवेय ! जयामेय !, गुणरत्नमहोदधे ! ।
जयापारकृपाधार !, स्फारसंसारतारक ! ॥१॥

श्रीमन्नेमिजिन ! स्वामिन् !, सहजेनात्मतेजसा[५] ।
तमोऽमग्नं[६] भवोद्विग्नं, मामुद्धर कृपापर ! ॥२॥

रागादिशत्रवो[७] देव !, निर्जिता ये त्वया पुरा ।
त एव तव वैरेण[८], बान्धन्ते मां त्वदाश्रयम् ॥३॥

सर्वभावैकसामान्यमौदासीन्यमिहाश्रयन् ।
त्वं चेदुपेक्षसे तत् ते, कुतः सुस्वामिताऽमिता[९] ॥४॥

उदिते न मुदे यावत्, त्वन्मयं चिन्मयं महः ।
स्वामिन् ! मोहतमस् तावच्चित्तान्तर्जायतेऽङ्गिनाम् ॥५॥

संसासागरस्यान्तर्मोहावर्त्तगतः प्रभो ! ।
कदा मात्रभवद्ध्यानयानपात्रमहं श्रये ॥६॥

---

૪. તેઓશ્રીએ અદ્‌ભુત પદ્માવતીકલ્પની રચના કરી છે. ૫. 'सहजेनाऽतितेजसा' - पा. । ६. 'तमोमसं' - को. । ७. 'रागादयोऽरयो' - पा., ला. । ८. 'त्वद्विरोधेन' - पा.,ला. । ९. '०स्तिता स्थिता' - को. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अदो मदोद्धतं चित्तं, सदा कृतकदाग्रहम् ।
तथा प्रसीद विश्वेश[१०] !, यथा[११] सीदति[१२] न क्वचित् ॥७॥

तृष्णया तरलं स्वामिन् !, विह्वलं स्मरतापतः ।
शान्तिमेति यदि[१३] स्वान्तं, त्वद्[१४]ध्यानाऽमृतमज्जनात् ॥८॥

जातु किं जन्तवो यान्ति, क्रोधक्रूराऽध्वना विभो ! ।
शमैकसारं त्वन्मार्गं, मार्गयन्ते[१५] यदि क्षणम्[१६] ॥९॥

मधुना स्पर्द्धमानेनाऽध्वना ध्यानं धुनाति ते ।
अनाहतेन नादेन, जिन ! कर्माणि योगिनाम् ॥१०॥

पार्थिव्यादिस्फुरत्पञ्चपिण्डस्थध्यानधारणाः[१७] ।
अभ्यस्यन्ति तवाधीश !, परज्ञानाय योगिनः ॥११॥

यथोपदेशं[१८] चक्रान्तर्हद्बीजादियोजनात् ।
ध्यायन्ति त्वां महात्मानः,[१९] पदस्थध्यानसिद्धये ॥१२॥

राग-द्वेषविनिर्मुक्तं, योगयुक्तं निराश्रयम् ।
निर्व्यातित[२०]स्फुरद्द्योतिकर्माणं[२१] करुणापरम् ॥१३॥

आत्मानं केवलालोकलोकाऽलोकाऽवलोकितम् ।
ध्यायेद्[२२] यस्त्वन्मयत्वेन, स स्याद् रूपस्थविन्मुनिः ॥१४॥ युग्मम् ॥

नानाश्रुतविचारं स्यादैक्यश्रुतिविचारकम् ।
सूक्ष्मक्रियाऽभिधं चैव, समुच्छिन्नक्रियं तथा ॥१५॥

इति मत्वात्मसंवेदात्, शुक्लध्यानचतुर्विधम् ।
योगिनो गतरूपं त्वामन्तः पश्यन्ति चिन्मयम् ॥१६॥ युग्मम् ॥

---

१०. 'विश्वेशी' - ला. । ११. 'यया' - ला. । १२. 'सीदामि' - पा. । १३. 'यदा' - को. । १४. 'तत्व' - ला. । १५. 'मार्गयन्ति' - पा. । १६. 'दिदृक्षणम्' - ला. । १७. '०धारणाम्' - को. । १८. 'य सोपदेशं' - पा. । १९. 'महात्मानं' - को. । २०. 'निकाचित०' - को. । २१. '०कमाणां' - को. । २२. 'ध्यायन्' - पा. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नानाध्यानैः पुरा देव !, येन ध्यातोऽसि चेतसा ।
क्रमेणात्मानमविश्य[२३], तन्मारयसि चारु तत् ॥१७॥

निराकारं निराधारं, निराहारं निरञ्जनम् ।
विदन्ति[२४] परमार्थेन, देव ! त्वां तत्त्ववेदिनः ॥१८॥

अजिह्मः[२५] परमब्रह्ममयस्तेजश्चयस् तव ।
किं सर्वगोऽपि मे मोहतमो हरति न प्रभो ! ॥१९॥

भवग्रीष्मभवस्तापव्यापः स्याद् देव ! देहिनाम् ।
तदा यदा चिदानन्दचन्द्रस् त्वमसि दूरगः[२६] ॥२०॥

शून्यता स्वपदे देव ![२७] जागरे[२८]ऽनल्पकल्पना ।
एतद् द्वयातिगं किञ्चिद्, वदन्ति त्वत्पदं बुधाः ॥२१॥

त्वयि ध्येये व्रजेद् ध्याता, ध्यानं च विलयं विभो ![२९] ।
अतो बहिर्मुखा लोका, विमुखास्तव चिन्तने ॥२२॥

ये तु तत्वविदो देव !, कल्पनातीतचेतसः ।
ध्येयादित्रिकभेदांस्ते, न विन्दन्ते मनागपि ॥२३॥

इदं ध्येयमिदं ध्यानमहं ध्यातेति धीर्भवेत् ।
तेषां येषामुदासीनपदासीनं, मनो[३०] न हि ॥२४॥

यस्त्यक्तकर्मनिःसङ्गो, नित्यतृप्तो निरञ्जनः ।
सदानन्दमयः[३१] स त्वं, त्वं स एवेति मन्मतिः[३२] ॥२५॥

विपक्षे च स्वपक्षे च, मूर्खे चैव विचक्षणे ।
दुःखे सुखे समस्वान्ता, नाथ ! त्वद्वेदिनो जनाः ॥२६॥

---

२३. '०वश्य' - को. । २४. 'वदन्ति' - को. । २५. 'अचिन्त्य' - को. । २६. 'पूरगाः' - ला. । २७. 'तावज्' - का. । २८. 'जागरो' - को. । २९. 'द्रुतम्' - को. । ३०. 'तमो' - को. । ३१. '०मयं' - ला. । ३२. 'मे मतिः' - को. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किं तेन तपसा तेन, श्रुतेन विनयेन वा ।
जपेन तेन किं येन, नाथ ! त्वं नोपलक्ष्यसे[33] ॥२७॥

पापकर्मकृतोन्माथ[34], नाथ ! तत् कुरु येन मे ।
स्वल्पा भवन्ति सङ्कल्पा, विषयग्रहगोचराः ॥२८॥

परानन्दपदे मेऽस्तु, निमग्नस्य जगत्प्रभो ! ।
वेद्य-वेदकभेदैकशून्यता त्वत्प्रसादतः ॥२९॥

नार्थयेऽन्यद्विभो ! किञ्चिद्, याचे त्वामेतदेव हि ।
समुल्लसतु मच्चित्ते, त्वत्प्रसादात् परं महः ॥३०॥

श्रोत्रपेयामृतं स्तोत्रमेतद्यः सुकृती पठेत् ।
त्रिकालं यादवाऽधीश !, स भवेत् त्वत्स्वरूपवित् ॥३१॥

करोत्करो[35] नभोरत्न**चन्द्रसूरी**ह दीप्यते ।
यावत् तावत् क्षितौ[36] द्रेव !, संस्तवस्तव नन्दतात् ॥३२॥

इति महार्थगम्भीरस्तवेन श्रीनेमिं स्तुत्वा ।
पञ्चाङ्गस्पृष्टभूतलश्चक्रवर्ती पुनः प्रणति स्म ॥३३[37]॥ [आर्या]

---

३३. '०लक्ष्यसि' – को. । ३४. '०कृतो नाशः' – को. । ३५. 'करोत्करौ' – को. । ३६. 'कृतो' – पा. । ३७. इदं पद्यं 'को' प्रतौ एव दृश्यते ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ૪) समस्यागर्भितं श्रीनेमिजिनस्तवनम्

૧૦ પદ્યમય આ સ્તોત્રનો મૂળભૂત પરિચય તેના નામ પરથી જ મળી જાય છે. ૧થી ૯ પદ્યમાં દરેક પદ્યનું અન્ત્ય ચરણ સમસ્યારૂપ છે. તે સમસ્યાને પૂર્વેના ત્રણ ચરણોએ સુંદર ઉત્પ્રેક્ષાથી સમજાવી છે. કવિશ્રીએ સમસ્યાપૂર્તિ કરવા માટે ક્યાંય ભારણરૂપ બનવું પડ્યું નથી, એ વાસ્તવિકતા તેમની સહજસિદ્ધ કાવ્યશક્તિનું મૂલ્યાંકન કરે છે. સરળ ભાષા અને સરસ કલ્પનાશક્તિના સંમિશ્રણ દ્વારા પ્રસ્તુત સ્તોત્ર કાવ્યરસિકો માટે આનંદની લ્હાણી કરનારું બન્યું છે.

ભક્તામરસ્તોત્રની રચનાથી સંબંધિત બાણ અને મયૂર નામના બ્રાહ્મણ પંડિતોએ કરેલી સમસ્યાપૂર્તિ (शतचन्द्रं नभस्तलं)ની યાદ અહીં પ્રયુક્ત સમસ્યા પદ 'सहस्रचन्द्रं गगनं ददर्श' વગેરેથી ફરી તાજી થાય છે.

પ્રસ્તુત સ્તોત્રના કર્તા કૃષ્ણર્ષિ ગચ્છના જયસિંહસૂરિજી છે. એવો સ્પષ્ટ ઉલ્લેખ હોવા છતાં આ જયસિંહસૂરિજીનો સત્તાકાળ અને આ સ્તોત્રનો રચનાકાળ નિર્ધારિત કરવો મુશ્કેલ છે. કારણ કે કૃષ્ણર્ષિ-ગચ્છમાં પાંચ જયસિંહસૂરિજી થયા છે.

(૧) જે કૃષ્ણઋષિના જ શિષ્ય હતા. તેઓશ્રીએ સ્વવિરચિત ધર્મોપદેશમાલા (ગાથા ૯૮) પર વિ.સં. ૯૧૫માં વૃત્તિ (શ્લો. ૫૭૭૫) રચી છે.

(૨) જેઓશ્રીએ વિ.સં. ૧૩૦૧માં મારવાડમાં મંત્રવિદ્યાથી પાણી આકર્ષી લાવી સંઘને જીવિતદાન આપ્યું હતું.

(૩) ઉપર્યુક્ત જયસિંહસૂરિજી > પ્રસન્નચંદ્રસૂરિજી > મહેન્દ્ર-સૂરિજીના શિષ્ય જયસિંહસૂરિજી થયા. તેમણે વિ.સં. ૧૪૪૨માં 'કુમારપાલમહાકાવ્ય'ની રચના કરી છે.

(૪) નયચંદ્રસૂરિજીના પટ્ટધર જયસિંહસૂરિજી થયા. તેઓશ્રીએ

Jain Education International For Personal & Private Use Only www.jainelibrary.org

વિ.સં. ૧૫૧૭માં સોઢલેમાં પરમાત્માની પ્રતિષ્ઠા કરાવી હતી.

(૫) આ કૃષ્ણર્ષિગચ્છની તપાશાખામાં પુણ્યપ્રભસૂરિજીના શિષ્ય જયસિંહસૂરિજી (પ્રતિમા લેખ-૧૪૮૩, ૧૪૮૯) થયા છે.

આ ચારમાંથી પ્રથમ અને તૃતીય જયસિંહસૂરિજીની રચનાનો ઉલ્લેખ મળે છે. આથી કદાચ એ બેમાંથી કોઈ એક આ સમસ્યાગર્ભિત સ્તોત્રના કર્તા હશે.

श्रीरैवताद्रौ जिनपं स्तुवेऽहं, निरीक्ष्य यद्रूपमहोऽमरीभिः ।
हर्षप्रकर्षादिति वाक्यमूचे, ममं ममंमं मममं ममंमं ॥१॥ [उपजातिः]
केलीषु रम्भावनमध्यगेन त्वयैव द्रष्टानि तदाऽऽलवाले ।
जलान्तरस्थे(थ)प्रतिबिम्बितानि चन्द्रस्य मध्ये कदलीफलानि ॥२॥
श्रीउग्रसेनक्षितिपालपुत्री, राजीमती तद्(त्वद्)विरहभ्रमेण ।
जालोपविष्टाऽनसि पूर्णमास्यां, सहस्रचन्द्रं गगनं ददर्श ॥३॥
न चन्दनं चन्दनचित्तमेनन्निदक्षिणो दक्षिणवात एषः ।
राजीमती जल्पति ते वियोगादङ्गारका शीतकरात् पतन्ति ॥४॥
चीनांशुकाच्छादितमध्यदेशमपास्य पल्यङ्कमतीवचारु ।
भवद्वियोगाद्विदधे ययैव, प्रवालशय्याशरणं शरीरम् ॥५॥
त्वदीय भामण्डलभानुबिम्बं, भ्रमेण हृष्टा हृदि चिन्तियन्ती ।
प्रियः समेष्यत्यधुनैव तस्माच्चन्द्रोदये नृत्यति चक्रवाकी ॥६॥
विलोक्य बाला वदनेन्दुबिम्बं, कण्ठे च मुक्ताफलहारतारा ।
पुनर्निशाऽसौ भ्रमितेव शङ्के, सूर्योदये रोदिति चक्रवाकी ॥७॥
वीक्ष्यसे किमयि ! नीलशरीर !, पूजितस्त्वममराधिपवृन्दैः ।
दिव्यगन्धसहितैः कनकाभैश्चम्पकैः कुसुमितः सहकारः ॥८॥ [स्वागता]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पवित्रं त्वदास्यं गिरौ रैवतेस्मिन्,
मया भ्राम्यता भूतले सर्वतोऽद्य ।
कलौ प्राणिनां सर्वदा कल्मषौघे,
प्रफुल्ले करीरे सरोजं ह्रि(हि) दृष्टम् ॥९॥ [भुजङ्गप्रयातम्]

**कृष्णर्षिगच्छे जयसिंहसूरि**कृतं समस्यास्तवनं नवीनम् ।
श्रीनेमिनाथस्य पठत्यजस्त्रं, सौभाग्यलक्ष्मीं लभते स भव्यः ॥१०॥ [उप०]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ५ ) श्रीनेमिरूपस्तवः

અદ્ભુત ઉત્પ્રેક્ષાઓથી છલોછલ આ સ્તવ પંચતીર્થીસ્તવની અંતર્ગત છે. જેની રચના તપાગચ્છીય સોમસુંદરસૂરિજી[1] (૧૪૩૦-૧૪૯૯)ના શિષ્ય જિનકીર્તિસૂરિજીએ કરી છે.

તેઓશ્રીના આચાર્યપદ પૂર્વેના નામો મુનિ જયઉદયજી, સ્થવિર જયવર્મજી અને પં. કીર્તિસુંદરજી હતા. આચાર્યપદવીનું બીજું નામ જિનરત્નસૂરિજી પણ હતું. તેઓશ્રીએ ગ્રંથસર્જનમાં[2] પોતાના ગુરુદેવનો વારસો સુંદર રીતે નિભાવ્યો હતો. બેદરનગરના પાતશાહ શા પૂરણચંદ્ર કોઠારીએ શ્રીગિરનારમહાતીર્થમાં બનાવેલા જિનાલયમાં પ્રતિષ્ઠા તેઓશ્રીએ કરેલી.

પ્રસ્તુત પંચતીર્થાસ્તવમાં કવિશ્રીએ અદ્ભુત કલ્પનાનો અને કમનીય કાવ્યત્વનો સમન્વય સાધ્યો છે. શ્રીઆદિનાથપરમાત્માનું સ્તોત્ર પરમાત્માના અંશપ્રદેશ પર વિરાજમાન કેશકલાપની[3] સંસ્તવનાદ્વારા

---

૧. તેઓ શ્રી યુગપ્રધાન મહાપ્રભાવક આચાર્ય હોવા ઉપરાંત સમર્થ સાહિત્ય-સર્જક પણ હતા. તેઓ ગુજરાતીભાષાના ગદ્યગ્રંથોના આદ્ય પુરસ્કર્તા હતા. રાણકપૂર, મક્ષીજી આદિ અનેક તીર્થોની પ્રતિષ્ઠા તેઓશ્રીએ કરેલી છે. તેમણે જગતને અનેક જ્યોતિર્ધરોની ભેટ આપી છે. સં. ૧૪૫૬ થી ૧૫૦૦ સુધીનો કાળ 'સોમસુંદર-યુગ' કહેવાય છે. તેમની ગ્રંથરચના અને જીવનકવન માટે જુઓ જૈન પરંપરાનો ઈતિહાસ-૩/૧૫૧ થી ૧૫૫.

૨. આ. દેવેન્દ્રસૂરિજી કૃત 'વન્દારુવૃત્તિ'નો બાલાવબોધ તથા તેની અવચૂરિ (ર.સં. ૧૫૧૧), ઉત્તમકુમારચરિત્ર, શ્રીપાલ-ગોપાલ કથા, ચમ્પકશ્રેષ્ઠીકથા, ધન્યકુમારચરિત્ર (ગદ્ય, ર.સં. ૧૪૯૭), દાનકલ્પદ્રુમ, શ્રાદ્ધગુણસંગ્રહ (ર.સં. ૧૪૯૮), નવકાર સ્તવન (પ્રાકૃત, ગાથા-૩૨) અને તેની વૃત્તિ, પ્રસ્તુત પંચતીર્થીસ્તવ, જ્ઞાનપંચમી સ્તોત્ર વગેરે ગ્રંથોનું સર્જન જિનકીર્તિસૂરિજીના હાથે થયું છે.

૩. આદિનાથ પરમાત્માના અંશ પ્રદેશ પર શોભિત કેશકલાપની સ્તવના રૂપ 'ચિકુર્દ્વાત્રિંશિકા' નામની કૃતિ મધુસૂદનભાઈ ઢાંકી દ્વારા તથા કેશવલ્લરી સંબંધ બે કૃતિ અમૃતભાઈ પટેલ દ્વારા નિર્ગ્રંથ ભા.-૨માં પ્રકાશિત થઈ છે.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ગૂંથ્યું છે. શાન્તિનાથપ્રભુના સ્તોત્રમાં પ્રભુની સુવર્ણવર્ણી દેહકાંતિની સ્તુતિ કરી છે. નેમિનાથજિનવરના અતિશાયી રૂપનું દર્શન કરાવતા કવિશ્રીએ મુખ્યતાએ પ્રભુના ચરણોની અરુણપ્રભા, તેમજ કર, નયન, કપોલ, વદન વગેરેની સ્તવના કરી છે. પાર્શ્વનાથપરમાત્માના શિરછત્ર-સ્વરૂપ ફણાની અને મહાવીરપરમાત્માના વિશિષ્ટ ગુણોની અલંકાર-સભર ભાવાર્દ્ર પ્રસ્તુતિ કરી છે.

આ પાંચેય સ્તોત્રો કાવ્યદૃષ્ટિએ સંપૂર્ણતયા અભ્યસનીય છે. અહીં માત્ર નેમિનાથપરમાત્માના સ્તોત્રની કેટલીક કાવ્યાભિવ્યક્તિનો અંશતઃ પરિચય આપ્યો છે. સહૃદયી વિદ્વદ્જનો આ સ્તોત્રોની વિશિષ્ટતા અને કવિશ્રીની સમર્થ કાવ્યશક્તિનો પરિચય સ્વતઃ અભ્યાસથી મેળવી શકશે.

શ્રીનેમિનાથ પરમાત્માનું આ સ્તોત્ર રૂપાતીત સ્વરૂપ પરમાત્માના રૂપસ્થધ્યાનની સિદ્ધિ અર્થે રચાયું છે. (પદ્ય-૧) પ્રથમના ૨થી ૯ પદ્યોમાં પ્રભુનાચરણદ્વયની અરુણપ્રભાની ઉદાત્ત ઉત્પ્રેક્ષાઓ ભરી છે.

'પ્રભુના ચરણોની પ્રભા અરુણ શા માટે છે—જાણો છો ? રાજીમતીના રક્ત હૃદયમાં પ્રતિદિન સંવાસના કારણે, જગત્જીવોના દ્રોહી મોહને હણવા માટે ઉત્પન્ન થયેલ ક્રોધથી અથવા તો પોતાના સ્વામી (કામદેવ)ના જીવનદાનની યાચના કરવા ચરણે આળોટતી રતિના અંગરાગને કારણે. (પદ્ય-૨)'

પરમાત્માના ચરણને તુણીરનું મનોરમ રૂપક આપ્યું છે. 'આગળથી વૃત્ત, પાછળથી પૃથુલ અને અગ્રભાગે મંજુલ પાંચ આંગળીઓથી શોભિત આ ચરણ બીજું કાંઈ નથી પરંતુ ત્રણભુવનના સૌથી મોટા સુભટ પંચબાણ (=કામદેવ)પાસેથી છીનવી લીધેલા શરયુક્ત તુણીર છે.' (પદ્ય-૪)

પદ્ય-૫માં અરુણકાંતિને રતિ-પ્રીતિના કૌસુંભવસ્ત્રો તરીકે અને પદ્ય-૬માં દિગ્ગજોએ સંધિ કરવા માટે ધરેલી અલંકૃતિ (=ગંડસ્થલ પર રહેલ સિંદૂર)ના ભેટણારૂપે વર્ણવીને અભિનવ આહ્લાદકતા જન્માવી છે.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'શ્રીનેમિનાથપ્રભુના ચરણો એ યજ્ઞવેદી છે. જેમાં નીચે રહેલી (ચરણની) અરુણપ્રભા એ દહનજવાળા છે. શ્યામ દેહકાંતિ એ ઊર્ધ્વગામી ધુમ્રપટલ છે. નમ્ર ભવ્યજીવોના દુરંત દુરિતો અહીં હોમાય છે.' (પદ્ય-૭) આમ અહીં થયેલી યજ્ઞવેદીની સુંદર રૂપકાભિવ્યક્તિ આકર્ષક બની છે.

'ચિંતિત ફળદાનની પ્રભુની કલાથી હારી ગયેલા દશેય કલ્પવૃક્ષો આ ધરતી છોડીને મેરુપર્વત પર ચાલ્યા ગયા. સ્વસ્થાનને પુનઃ પામવા ઈચ્છતા તેઓએ પોતાના પલ્લવોનું પ્રાભૃત પ્રભુના ચરણે ધર્યું છે. એ પલ્લવપ્રાભૃત એટલે પ્રભુચરણની દશ આંગળીઓ.' (પદ્ય-૮)

ચરણાંગુલિની સંસ્તવના કર્યા બાદ નખશ્રેણિની સ્તુતિ કરવા સૂર્યને દશ શરીરધારી બનાવ્યો છે.—'જેના ઉછળતા પ્રતાપતેજથી હારી ગયેલા સહસ્રદ્યુતિ (=સૂર્ય)ના હૃદયમાં ભક્તિ-અતિશય પ્રગટ થયો. સ્વકૃત્યને જાણનારા એ સૂર્યે દશ દેહ ધારણ કર્યા અને ચરણાંગુલિ-નખના બહાને પ્રભુની ચરણોપાસનામાં લાગી ગયો.' (પદ્ય-૯)

પરમાત્માની વક્ષઃસ્થલીને પણ અનેક સાદશ્યો અપ્યા છે.

૧) શુક્લધ્યાનરૂપી મૃગાધિપને સ્થિરતામાટેની વિશાળ નીલવર્ણી શિલા.

૨) સંખ્યાતીત ગુણશ્રેણિને ક્રીડા કરવા માટેની ચતુષ્ક-અવનિ.

૩) અદર્શનીયના દર્શનરૂપી વારિધિમાં ડૂબતા જગત્ચક્ષુઓ માટે દ્વીપ. (પદ્ય-૧૩)

તેવી જ રીતે પ્રભુના કપોલો પણ અનેક ઉપમાઓથી શોભાવ્યા છે. 'भुवनदृग्वाहावलीखेलने वाह्यालीयुगलीनिभौ, श्री-वाग्देवतयोः मणीमय-वराऽऽदर्शौ इव, राग-द्वेषजितोः लसद्ध्यानाह्वयोः वीरयोः स्फुरौ (=फलकौ) इव ।' (पद्य-१४)

'પરમાત્માના નયનો એ ભવજલ તરવાની નાવ છે અને તેની ઉપર રહેલ ભવાં એ હલેસા છે. આ નયનો શ્રીદેવી અને ભારતીદેવીના

Jain Education International For Personal & Private Use Only www.jainelibrary.org

સહિયારા સંવાસના સ્થાનરૂપ ક્રીડાસરોવરો છે અને ભવાં એ સરોવરની પાળે શોભિત વનાલી છે.' (પદ્ય-૧૫) નયન અને ભવાંને એક સાથે વર્ણવ્યા બાદ કવિશ્રી ભવાંને સ્વતંત્ર ઉત્પ્રેક્ષાથી વધુ રમ્ય બનાવે છે. 'ભવાં મોક્ષદ્વારના કમાડને ઉઘાડવાની કુંચિકા છે, રાગ અને દ્વેષરૂપી મત્ત હાથીને વશ કરવા માટેના અંકુશ છે.' આ રીતે સકારાત્મક સુંદર ઉત્પ્રેક્ષા બાદ કવિશ્રી નકારાત્મકતા પણ પ્રયોજે છે–'આ ભવાં દુર્ગતિમાં જતા જીવોને માટે અપશુકન સ્વરૂપ બે ભુજંગી છે.' (પદ્ય-१६)

પરમાત્માના વદનને ચન્દ્રની ઉપમા તો સર્વ સામાન્ય છે. પરંતુ 'मोक्षाध्वगानां विषयतमतमःस्तोमसंहार' પદો તેમાં અભિનવતા પ્રગટ કરે છે. ઉપરાંત આ વદન ને–'कलानां केलीगेहं,' 'त्रिभुवनविजयश्रीवशीकाराय पुण्ड्रः,' 'ब्राह्मीक्रीडातडागं' અને 'केवलज्ञानवध्वाः मणिमयमुकुरः' કહીને સુરમ્ય બનાવ્યું છે. (પદ્ય-૧૭)

૧૯મા પદ્યમાં પ્રભુના જન્માભિષેક સમયની પ્રકૃષ્ટ ઉત્પ્રેક્ષા રજૂ થઈ છે. 'જન્મ-સ્નાત્રમહોત્સવના સમયે ક્ષીરસમુદ્રના શ્વેત જલ કળશોમાંથી પ્રભુના દેહ પર પડી રહ્યા છે. પ્રભુના દેહની કાંતિદ્વારા તે શબલિત (નીલવર્ણી) બની જાય છે, આથી શેવાલનો ભ્રમ થવાથી ઇન્દ્રો વારંવાર હાથ અન્ય બાજુ લઈ જાય છે.'

પદ્ય-૨૨માં રાજીમતીનો ઉપાલંભ છે, પદ્ય-૨૩માં પરમાત્માના લંછન-શંખની ઉત્પ્રેક્ષા છે. પદ્ય-૨૪માં પ્રભુની શિવગતિ કાવ્યાત્મક રીતે અભિવ્યક્ત થઈ છે.

આમ, આ સ્તોત્ર પરમાત્માના સદ્ભુત રૂપને અદ્ભુત ઉત્પ્રેક્ષાઓ, ભવ્યભાવો ઉપરાંત સબળ ભાષાભિવ્યક્તિ દ્વારા રજૂઆત કરવાના કારણે જનમનાનંદન બન્યું છે.

આવી જ સુંદરતમ અભિવ્યક્તિઓ અન્ય ચારેય સ્તોત્રોમાં આકંઠ ભરેલી છે. યથાવસરે તેનો અભ્યાસ કરવા નમ્ર વિનંતિ. એ સ્તોત્રો પરિશિષ્ટમાં આપવામાં આવ્યા છે.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

કવિશ્રીએ આ કૃતિઓમાં સ્વ-નામનો ઉલ્લેખ કર્યો નથી. માત્ર ગુરુદેવ શ્રી સોમસુંદરસૂરિજીનો ઉલ્લેખ છે. પરંતુ સંવત્ ૧૪૯૮, ભાદરવા શુદ-૧૦, શનિવારે કવિશ્રીના હાથે લખાયેલી પ્રતની પુષ્પિકામાં 'जिनकीर्तिसूरिप्रणीत' એવો સ્પષ્ટ ઉલ્લેખ છે. અને પ્રત્યેક સ્તોત્રાન્તે 'गुरुसोमसुन्दर' પદ પ્રયુક્ત છે. માટે આ સ્તોત્રો જિનકીર્તિ સૂરિજીની રચના છે.

शब्दब्रह्माम्बुराशेः प्रसृमरलहरीकोटिभिर्निप्लुतं यद्,
रूपातीतं स्वरूपं तदतिमतिमतां योगिनामेवगम्यम् ।
तस्मादर्वाग्दृशामप्यधिगमविषयं सुस्तवं बाह्यरूपं,
रूपस्थध्यानसिध्यै किमपि भगवतः स्तौमि नेमीश्वरस्य ॥१॥ [स्रग्धरा]

रक्ते राजीमतीहृदि प्रतिदिनं वासानुभावादिव,
प्राणिद्रोहकमोहकण्टकहतौ प्रोद्भूतकोपादिव ।
भर्तृप्राणितयाचनार्थविलुठद्रत्यङ्गरागान्नु वा,
श्रीनेमेः पदयामलं विजयते जाग्रज्जपापाटलम् ॥२॥ [शार्दूलवि०]

पञ्चानुत्तरमुख्यदेवपदवीभोगे न मां त्यक्तवां-
स्तत्किं मुञ्चसि साम्प्रतं शिवपुरी साम्राज्यभोगे विभो ! ।
एवं प्रार्थनया यदीयपदयोर्लग्नः सदा शोणिम-
व्याजात् राग इव श्रियेऽस्तु स शिवासूनुर्जिनो भाविनाम् ॥३॥

पूर्वं वृत्ततरौ पुरश्च पृथुलौ पञ्चाङ्गुलीमञ्जुलौ,
श्रीमन्नेमिजिनेश्वरस्य चरणौ दत्तां सतां सम्पदः ।
पञ्चेषोर्भुवनत्रयैकसुभटस्याच्छिद्य सद्यः क्रुधा,
तूणीरावुररीकृताविव शरैर्युक्तावमू स्वामिना ॥४॥

विश्वाऽऽस्कन्दकदर्पदर्पकमहावीरं निहन्य क्षणात्,
कौसुम्भांशुकयामलं गतमलं तद्भार्ययोः कोपतः ।

आछिद्य स्वपदाब्जयोः किल तले चिक्षेप यः पाटल-
ज्योतिर्जालमिषात् स नेमिरवताद् वीराधिवीरः प्रजाः ॥५॥

गत्या यद् विजिता मतङ्गजघटा नष्टा दिगन्ताटवी-
प्रान्तं प्राप तया स्वसन्धिविधये स्वालङ्कृतिः प्राभृतम् ।
चक्रे यद् पदयोः सुशोणिममिषात् सिन्दूरपूरः किल,
श्रेयःसम्पदमातनोतु भगवान् श्रीनेमिनाथः स वः ॥६॥

वेल्लच्छोणमरीचिवीचिदहनव्यासावधः कज्जल-
श्यामाङ्गद्युतिधूम्रधूमपटलावूर्ध्वप्रदेशे पुनः ।
नम्राणां भविनां दुरन्तदुरितश्रेणीः सदा जुह्वतः,
श्रीमन्नेमिविभोः पदौ विजयदौ स्तां यज्ञवेदीसमौ ॥७॥

चिन्तातीतफलप्रदानकलया यस्य प्रभोर्निर्जिताः,
कल्पक्षोणिरुहा दशाऽपि धरणीं त्यक्त्वा सुमेरुं गताः ।
स्वस्थानं पुनरीप्सवश्चरणयोः स्वान् पल्लवान् प्राभृतं,
कुर्वन्ति स्म दशाङ्गुलिच्छलवशान्नेमिः स वः श्रेयसे ॥८॥

यस्य प्रोल्लसता प्रतापमहसा[४] जिग्ये सहस्रद्युति-
स्तन्नूनं बहुधा स्वभक्त्यतिशयप्रादुष्कृति कृत्यवित् ।
यत्पादौ दशधा विनिर्मिततनु भेजे नखानां मिषात्,
स श्रेयः पदसम्पदः प्रददतां देवः शिवानन्दनः ॥९॥

विष्णोर्वीर्यमदज्वरप्रशमने वैद्याविव स्वर्गिणां,
विश्वध्यापकदर्पदर्पकगिरौ दम्भोलिदण्डाविव ।
कल्पक्षोणिरुहाविव प्रणयने नम्रेप्सितार्थावले-
र्दोर्दण्डौ भवतां शिवाय भवतां श्रीनेमिनः स्वामिनः ॥१०॥

भजति सुरमणिश्चेद् बीजतां कामकुम्भैः,
सरसनिजपयोभिः सिञ्चते कामधेनुः ।

४. प्रतौ 'महिमा' इति पाठः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदपि भवति नेमेर्नैव हस्तस्य चिन्ता-
ऽतिगशिवसुखदातुः कल्पवृक्षः सदृक्षः ॥११॥ [मालिनी]

आदर्शा नवपद्मरागघटिताः श्रीसाधुधर्मश्रिया-
मिष्टार्थान् दशदिग्नृणां प्रथयितुं चिन्तामणिश्रेणयः ।
नम्राणामसमाधिभेदशलभाऽऽप्लोषाय दीपाङ्कुराः,
श्रीनेमेः करजा दशापि सुदशां पुष्णन्तु भावस्पृशाम् ॥१२॥ [शा०वि०]

शुक्लध्यानमृगाधिपस्थितिकृते निलाविशाला शिला,
सङ्ख्यातीतगुणालिखेलनविधौ किं वा चतुष्कावनिः ।
अप्रक्ष्येक्षणवारिधौ निपततां द्वीपौ जगच्चक्षुषां,
श्रीशैवेयजिनेश्वरस्य विपुला वक्षःस्थली पातु वः ॥१३॥

वाह्यालीयुगलीनिभौ भुवनदृग्वाहावलीखेलने,
श्री-वाग्देवतयोर्मणीमयवरादर्शाविव प्रोज्ज्वलौ ।
राग-द्वेषजितोः स्फुराक्विव[5] लसद्-ध्यानाह्वयोर्वीरयो-
रानन्दोदयसम्पदं प्रदिशतां नेमेः कपोलौ सताम् ॥१४॥

श्री-भारत्योर्युवत्योरिह सह वसतिं संसृजन्त्योः किमेते,
भ्रूपाली सद्वनालीपरिकरिततटे क्रीडनार्थं सरस्योः ।
किं वा द्रोण्यौ तरीतुं भवजलधिमिमं कुर्वतामेव मूहं,
भव्यानां दर्शयेतां शिवपथमचिराल्लोचने नेमिभर्तुः ॥१५॥ [स्रग्धरा]

मोक्षद्वारकपाटसम्पुटतटप्रोद्घाटने कुञ्चिके,
राग-द्वेषमतङ्गजद्वयवशीकाराय साराङ्कुशौ ।
नृणां दुर्गतियायिनामशकुनीभूते भुजङ्ग्यौ किमु,
श्रीकर्यौ वदनस्थवाक्कमलयोर्नेमेर्भुवौ वः श्रिये ॥१६॥ [शा०वि०]

मोक्षाऽध्वन्यध्वगानां विषमतमतमःस्तोमसंहारचन्द्रः,
केलीगेहं कलानां त्रिभुवनविजयश्रीवशीकारपुण्ड्रः ।

---

५. फलकौ इव ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ब्राह्मीक्रीडातडागं मणिमयमुकुरः केवलज्ञानवध्वाः,
सान्द्रानन्दं प्रजानां जनयतु वदनं श्रीशिवायाः सुतस्य ॥१७॥ [स्रग्धरा]

विकचकमलकोशे दाडिमीबीजपङ्क्तिः,
शशभृति यदि वा स्यान्मौक्तिकश्रेणिपङ्क्तिः ।
किमपि तदुपमानं स्यात् तदा यन्मुखस्य,
प्रथयतु स शिवानि श्रीशिवासूर्जनानाम् ॥१८॥ [मालिनी]

जन्मस्नात्रमहे महेन्द्रनिवहाः क्षीरर्णवाम्भःपतत्-
कुम्भेभ्यः शिरसि प्रभोः शबलितं यस्याङ्गभासां भरैः ।
शेवालभ्रमतः पुनः पुनरहो हस्ते क्षिपन्त्यन्यतः,
सोऽयं यच्छतु भाविनां नवशिवानन्दं शिवानन्दनः ॥१९॥ [शा०वि०]

प्राकारत्रयवेष्टितं सुरवरश्रेणीभिरासेवितं,
दीव्यन्नादकलं कलङ्कविकलं नीलीदलश्यामलम् ।
मायाबीजमिवानवाऽघनिकरप्रोच्याटनाय स्फुटं,
यद् ध्यायन्ति ऋषीश्वराः स भवतान्नेमीश्वरः सिद्धये ॥२०॥

लालान्दोलयुगं नु कर्णयुगलं तद्वत् तनौ कुण्डल-
व्याजस्वर्णमयासनं विजयते विश्वत्रयीस्वस्तरौ ।
ज्ञानध्यानकलाविलासललनाप्रेङ्खोलनाकेलये,
स श्रीनेमिजिनः समग्रवृजिनप्रध्वंसनः पातु वः ॥२१॥

मुक्त्वा मामनुरागिणीं सुभग ! हे ! त्वय्येकचित्तां सदा-
सिद्धानन्तभुजङ्गसङ्गमकरीं मुक्त्यङ्गनां यासि किम् ।
एवं राजमतीमतीव य उपालम्भान् प्रयच्छत्तरा-
मप्यौज्झत् तृणवच्छ्रियेऽस्तु भगवान् नेमिः स योगीश्वरः ॥२२॥

पावित्र्योज्ज्वल्यसम्पन्मम सदतिशया श्लाघनीयश्च शब्दः,
किन्तु व्यर्थीभवन्ति ध्रुवमखिलगुणा मध्यकौटिल्यदोषात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवं ध्यात्वेव यस्य क्रमकमलयुगं तद्व्यपोहायकम्बु-
र्लक्ष्मव्याजेन भेजे स दिशतु भगवान् श्रीशिवासूः सुखानि ॥२३॥ [स्रग्धरा]

प्रणमदमरनाथस्वर्णकोटिररोचिः-
शबलिततनुकान्तिर्नेमिदेवः श्रिये वः ।
सकनकमृगनाभीपत्रभङ्गीसुरङ्गी-
कृत इव शिवलक्ष्म्याऽऽश्लिष्टसर्वाङ्गयाऽसौ ॥२४॥ [मालिनी]

भुवनविभुरसौ शिवाख्य[६]लक्ष्मीर्दिशतु सतां भगवान् शिवाङ्गजन्मा ।
प्रतिफलति यदीयसंविदन्तः समसमयं सकलः पदार्थसार्थः ॥२५॥
[पुष्पिताग्रा]

भक्तिप्रह्वमहेन्द्रपूजितपदाम्भोजः स भोजाङ्गजा,
जाग्रन्मानसहंस एवमखिलत्रैलोक्यनाथः स्तुतः ।
सिद्धानन्तचतुष्टयस्थितिमयः शैवेयदेवः सतां,
दत्तां श्रीगुरु**सोमसुन्दर**करप्राग्भारगौरं यशः ॥२६॥ [शार्दूल०]

६. प्रतौ 'सखौख्य' पदमस्ति, अत्र 'सुसौख्य' इति वा पदं स्यात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ६ ) रैवताद्रिमण्डनश्रीनेमिनाथस्तवनम्

ચંદ્રગચ્છીય નન્નસૂરિજીની પંરપરામાં થયેલા દેવપ્રભસૂરિજીના શિષ્ય રત્નાકરસૂરિજી (૧૪મી સદી પૂર્વાર્દ્ધ) એ પ્રસ્તુત સ્તોત્રની રચના કરી છે. તેઓશ્રી સ્વરચિત 'रत्नाकरपञ्चविंशतिका' (=રત્નાકરપચ્ચિસી) દ્વારા સુખ્યાત છે. આ ઉપરાંત તેઓશ્રીએ નેમિચંદ્રસૂરિજીકૃત ઉત્તરાધ્યયનસૂત્ર-લઘુવૃત્તિની તાડપત્રીય પ્રતિની પ્રશસ્તિની રચના (સં. ૧૩૦૮) કરી છે.

રત્નાકરપચ્ચીસી જેમ લલિત પદાવલિ તથા હૃદયંગમ ભાવોર્મિઓ દ્વારા સુખ્યાત છે તેમ પ્રસ્તુત સ્તોત્રમાં પણ પદલાલિત્ય અને ભાવાભિવ્યક્તિનો સુંદર સમન્વય છે. બન્ને સ્તોત્રાન્તે કવિશ્રીએ પોતાનું 'रत्नाकर' નામ સૂચન કરીને કલ્યાણની યાચના કરી છે. श्रेयस्करं प्रार्थये (२. प. २५), शिवङ्करोऽस्तु नेमिः (रै.ने. १४)

પ્રસ્તુત સ્તોત્રમાં પદોની ઝડઝમક ખૂબ સુંદર છે. કેટલાક પદ્યાંશો-

काले कलौ किल निदाघतुलां दधाने (३)

विश्वं विवस्वति विभासयति प्रभाभिः (६)

भालं विशालमिदमिन्दुकलाऽभिरामं (९)

सकलललनालीलापा विलापसमा मताः (१३)

विलसदनङ्गसङ्गभङ्गप्रगुण० (१४) વગેરે.

પદ્ય ૭માં–'कस्याऽस्तु सुरमणी रमणीय एषः' માં જે રીતે મધ્ય યમકનું નિયોજન થયું છે. એ રીતે જ પદ્ય-૪ના ચારેય પાદમાં મધ્યયમક સુંદર રીતે પ્રયોજાયો છે.-

येनोच्छदच्छविपदं विपदन्तकारि,
नेमे ! विभो ! शुभवतो भवतोंऽह्रियुग्मम् ।
यायादसौ नरमणी रमणीयभावं,
केषामहो सुमनसां मनसां न लोके ? ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

અહીં બીજુ પાદ–'नेमे ! विभो ! शुभवतो भवतोंऽह्रियुग्गम्' ક્રિયા ગુપ્ત છે. દેખીતી રીતે 'नेमे' પદ 'नेमि' શબ્દના સંબોધનનું રૂપ છે. પરંતુ, 'नम्' ધાતુનું પરોક્ષ ભૂતકાળનું પણ રૂપ હોવાથી અર્થશ્લેષદ્વારા ક્રિયાપદ મળી રહે છે.

પદ્ય ૮માં 'गोभिः' શબ્દનો સુંદર અર્થ શ્લેષ (વાણી તથા કિરણ) ગૂંથવામાં આવ્યો છે.

પદ્ય ૨ જાનું અન્ત્યપદ–'लोलां करोति तव भक्तिरियं विलोलाम्'માં 'विलोला'ને लोलाકરવાનું કથન વિરોધાલંકાર દર્શાવે છે.

આમ, સંપૂર્ણ સ્તોત્ર બુદ્ધિગમ્ય અલંકારોની વિશદ સંયોજનાથી પરિપૂર્ણ છે. પાંડિત્યપૂર્ણ રચના હોવા છતાં ભાવાર્દ્રતા સર્વત્ર અખંડિત રહી છે. એટલું જ નહીં, ઉપરથી એ સબળ રચનાપક્ષે ભાવપક્ષને પણ મધુર બનાવ્યો છે. જે રત્નાકરસૂરિજીની સાહજિક કવિપ્રતિભા સિદ્ધ કરે છે.

નેમિનાથપ્રભુની સંસ્તવના કરવાની પ્રતિજ્ઞા (પદ્ય-૧) કરીને, કવિશ્રી જણાવે છે કે પ્રભુસ્તવના કરવા માટે વાચસ્પતિ પણ અસમર્થ છે. છતાં અંતરમાં ઉછળતી ભક્તિ જીહ્વાને ચપળ બનાવે છે. (પદ્ય-૨)

આ રીતે ભાવારંભ કરીને કવિશ્રીએ પરમાત્માના ચરણયુગલની રમણીય સ્તુતિ કરી છે. (પદ્ય-૩), પદ્ય-૫ અને ૬માં દૃષ્ટાંત અલંકારની ભાવાર્દ્ર ગુંથણી કરી છે. પદ્ય-૭માં પરમાત્માની પ્રાપ્તિને કલ્પવૃક્ષ, ચિંતામણિ અને કામધેનુથી વિશિષ્ટતમ દર્શાવીને વ્યતિરેકાલંકાર દર્શાવ્યો છે. પરમાત્માના ભાલને અક્ષય લાવણ્ય-અમૃતનો ઝરો (પદ્ય-૯) અને પરમાત્માની પ્રતિમાને કલિકાલમલથી કલુષિત પ્રાણીગણને પાવન કરનારી નિર્મળકાન્તિના જલપ્રવાહથી ભરેલી ગંગા કહી છે. (પદ્ય-૧૧) રાજીમતી માટે 'भोजपूत्री' શબ્દપ્રયોગ કરીને તેનું રૂપ 'त्रिदशपुर-पुरन्ध्रीरूपरेखाविषादक्षमलवणिमलिला'–વિશેષણથી શણગાર્યું છે. આવી રૂપવાન કન્યાનો પણ ત્યાગ કરી પરમાત્માએ સ્વચરણકમલથી

Jain Education International For Personal & Private Use Only www.jainelibrary.org

રૈવતાદ્રિને પાવન કર્યો. (૧૨) એવું દર્શાવીને સ્તોત્રનું સમાપન કરતા કવિશ્રીએ 'नेमे ! भूयस्त्वमेव विभुर्मम' માંગણી કરી છે.

श्रीरैवताद्रिकमलापृथुकण्ठपीठ-
शृङ्गारहारतुलनां कलयन्ति यस्य ।
स्फारस्फुरत्क्रमनखद्युतयोऽतिदीप्राः,
श्रीनेमिनं जिनवरं तमहं स्तवीमि ॥१॥ [वसन्ततिलका]

नेमे ! तव स्तवनमुज्ज्वलकेवलात्म-
रूपस्य गीष्पतिसमोऽपि न कर्तुमीशः ।
अन्तस्तथाऽपि परितोऽपि हि विस्फुरन्तीं
लोलां करोति तव भक्तिरियं विलोलाम् ॥२॥

काले कलौ किल निदाघतुलां दधाने
निःशेषसंवरपदेषु तनूभवत्सु ।
रोचिर्जलैः सुविमलैः सरसीयतेऽसौ
देव ! त्वदंह्रियुगलं[१] भवतापभेदि ॥३॥

येनोच्छदच्छविपदं विपदन्तकारि
नेमे ! विभो ! शुभवतो भवतोंऽह्रियुग्मम् ।
यायादसौ नरमणी रमणीयभावं
केषामहो सुमनसां मनसां न लोके ? ॥४॥

रागादिविद्रुतमना नहि ना त्वदीयं
द्रष्टुं स्वरूपममलं तदलम्भविष्णुः ।
किं नीलिकागलितलोचनशक्तिरुच्चैः
पश्येत् कदापि विलसत् शशलक्ष्मबिम्बम् ॥५॥

---

१. प्रतौ 'युगली' इति पाठः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दृष्टेऽधुना तव पदाम्बुरुहे पलायाञ्-
चक्रेऽन्तरङ्गरिपुचक्रमिदं हृदो मे ।
विश्वं विवस्वति विभासयति प्रभाभिः
को वान्धकारनिकरस्य किलावकाशः ? ॥६॥

कल्पद्रुमः प्रकुरुतां किमभीष्टजातं ?
कस्याऽस्तु वा सुरमणी रमणीय एषः ? ।
कृत्वाऽथ किं भवतु कामदुघाऽप्यमोघा ?
सङ्कल्पिताऽधिकफलं समवाप्य नेमिम् ॥७॥

मायानिशि स्फुरितमोहमहाप्रमीला-
सम्मीलितं नयनमान्तरमेतदीश ! ।
विश्वत्रयप्रकटनाय पटीयसीभिर्-
गोभिः प्रबोधकलितं यदि तावकीभिः ॥८॥

भालं विशालमिदमिन्दुकलाऽभिरामं
किं वर्ण्यते त्रिदशवन्दितपादपद्म ! ।
नैवं व्ययं लवणिमाऽमृतमेति यत्र
पेपीयमानमपि नेत्रचकोरवृन्दैः ॥९॥

काऽपि प्रभो ! तव विशालविलोचनानां
छायाकपोलयुगलं कमनीयकान्ति ।
कर्णद्वयं त्रिजगतीकमलाविलास-
दोलाकलं बत न कस्य मुदं दधाति ॥१०॥

कलिमलकलुषानां प्राणिनां पावनी ते
विमलरुचिजलौघैः पूरिता मूर्त्तिरेषा ।
अमरसरिदिवाऽलं पापजम्बालजालं
विदलयति विशालं देव ! मे सर्वकालम् ॥११॥ [मालिनी]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्रिदशपुरपुरन्ध्रीरूपरेखाविषाद-
क्षमंलवणिमलीलां भोजपुत्रीं विहाय ।
कलितविरतिभावः पावयामास नेमे !
निजचरणसरोजैस्तं भवान् रैवताद्रिम् ॥१२॥

सितकर[२]कराकारा कीर्त्तिर्न मे हृदयप्रिया
सकलललनालीलालापा विलापसमा मताः ।
विपुलवसुधाराज्यं प्राज्यं विपाककटु स्फुटं
तदलमिमकैर्नेमे ! भूयस्त्वमेव विभुर्मम ॥१३॥ [हरिणी]

इति विलसदनङ्गसङ्गभङ्गप्रगुणसमाधिधरो मयाऽभिनूतः ।
स्फुरदतिशयचारुरत्न'**रत्नाकर**'गुरुरेष शिवङ्करोऽस्तु नेमिः ॥१४॥
[पुष्पिताग्रा]

---

२. प्रतौ 'सिरकर०' इति पाठः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ૭) गिरनारविभूषणनेमिजिनस्तवनम्

'गिरनारविभूषणनेमिवरम्' એ ચતુર્થપાદની ધ્રુવપંક્તિ રાખીને બાકીના ત્રણ પદોમાં ત્રણ વિશેષણો પ્રયોજીને થયેલી આ રચનાના પ્રથમ પદ્યના 'विनमामि' પદથી અને દ્વિતીય પદ્યના 'प्रणमामि' પદથી શ્રીનેમિનાથ પરમાત્માને વંદના કરી છે.

સુંદર પદલાલિત્યની સાથે સરસગેયતા એ પ્રસ્તુત સ્તોત્રની વિશિષ્ટતા છે. અન્ત્યાનુપ્રાસ અને વૃત્યનુપ્રાસ દ્વારા પદાવલી લાવણ્ય સભર બની છે. તો તોટક છંદ દ્વારા ગેયતા જામી છે.

કવિશ્રીએ ઉપયુક્ત કરેલા કેટલાક સુંદરવિશેષણો–

'परिवर्जितमारविकारमदम्'

'भवभीममहोदधितारतरिम्'

'करणद्विपकुम्भकठोरहरिम्'

'तुहिनत्विषिनिर्मलशीलगुणम्'

'पदपङ्कजलीननिधिभ्रमरम्'

'भुवनत्रयपद्मविबोधरविम्'

'मदपर्वतशृङ्गविभङ्गपविम्' વગેરે.

અત્ર પ્રયુક્ત ત્રીજા પદ્યના પૂર્વાર્ધનું અને પ્રથમ પદ્યના ઉત્તરાર્ધનું સંયોજન કરીને ૧ પદ્ય હંસવિજયજીએ સ્વરચિત ગિરનારમંડણ શ્રીનેમિનાથજીની ૧૦૮ પ્રકારી પૂજા (ર.સં.૧૯૭૬)માં દરેક પૂજાને અંતે સમાવ્યું છે.

સ્તોત્રના અન્ત્ય પદ્યને આધારે કર્તાનામ 'દેવેન્દ્રસૂરિજી' હોવાનું અનુમાન થાય છે. પાટણ ભંડારના સૂચિપત્રમાં પણ કર્તાનામ તરીકે 'દેવેન્દ્રસૂરિ'જીનો ઉલ્લેખ છે. પરંતુ સ્તોત્રની ભાષાનો આધાર લઈને રચનાકાળ શોધીએ તો સ્પષ્ટ અર્વાચીનતા પ્રગટ થઈ આવે છે.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुविशालशिवालयजातलयं, कृतमोहनरेन्द्रबलप्रलयम् ।
विनमामि जगत्त्रयबोधकरं[१], गिरनारविभूषणनेमिवरम् ॥१॥ [तोटकम्]
प्रणमामि नरेश्वरवन्द्यपदं[२], परिवर्जितमारविकारमदम् ।
हर-हासविका[३]शयशःप्रसरं, गिरनारविभूषणनेमिवरम् ॥२॥
कमलोदरकोमलपादतलं[४], गणनापरिवर्जितबाहुबलम् ।
जनताश्रय[५]संशयदोषहरं, गिरनारविभूषणनेमिवरम् ॥३॥
भवभीममहोदधितारतरिं, करणद्विपकुम्भकठोरहरिम् ।
वरतारतुषारगुणौघधरं गिरनारविभूषणनेमिवरम् ॥४॥
[६]नुतनम्रसुराऽसुरराजगणं तुहिनत्विषिनिर्मलशीलगुणम् ।
पदपङ्कजलीननिधिभ्रमरं, गिरनारविभूषणनेमिवरम् ॥५॥
पटुवाणिजनौघकृतस्तवनं, विहितान्तरबाह्यरुजाशमनम् ।
प्रणमाम्यऽहमस्तसमस्तदरं, गिरनारविभूषणनेमिवरम् ॥६॥
भुवन[७]त्रयपद्मविबोदरविं,[८] मदपर्वतश्रृङ्गविभङ्गपविम् ।
नमताऽमृत[९]सौख्यविधानपरं, गिरनारविभूषणनेमिवरम् ॥७॥
परिवर्जितबन्धुकलत्रधनं, नरकादिकडामरदावघनम्[१०] ।
वितताऽऽमलकेवलबोधकरं[११], गिरनारविभूषणनेमिवरम् ॥८॥
इति नेमिजिनेश्वर-सकलसुरेश्वर-नतदेवेन्द्रमुनीन्द्रगणम्[१२] ।
गिरनारविभूषण-विगलितदूषण-भवभयशम्भवभयहरणम् ॥९॥

---

१. '०बोधिकरं'- पा. । २. 'विन्दिपदं'-को-२ । ३. '०विकाशि०'-को-१, '०विकार०'-पा. । ४. '०कान्तिभरं'-को-२. । ५. 'जननाशय०'-पा. । ६. 'नत०'- पा.। ७. 'भवन०'-को-२. । ८. '०रवं' - को-२ । ९. 'नमताऽमित०' - को-२. । १०. '०डाम्बरदानघनं' - पा. । ११. '०बोधिकरं' - पा. । १२. '०गणि' - पा. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ૮) श्रीरैवताचलचैत्यपरिपाटीस्तवनम्

૨૦-વસન્તતિલકા અને અન્ત્ય શાર્દૂલવિક્રીડિત છંદોબદ્ધ પ્રસ્તુત સ્તવ શ્રીરૈવતગિરિરાજની ચૈત્યપરિપાટી સ્વરૂપ છે.

આ સ્તોત્રના કર્તા વિજયચન્દ્રસૂરિ હોઈ શકે એવું અનુમાન અન્ત્ય પદ્યના ત્રીજાપાદ–'तमोवितान विजये चन्द्रोपमैः सूरभिः' પરથી થાય છે. ૧૩માથી ૧૫મા શતકમાં ચાર વિજયચન્દ્રસૂરિ થયા હોવાનો ઉલ્લેખ મળે છે.

(૧) નાણાવાલ ગચ્છના પ્રભાનંદસૂરિજીની ૭મી પાટે આવેલા જયસિંહસૂરિજીના શિષ્ય વિજયચંદ્રસૂરિજી થયા, કે જેમણે વિ.સં. ૧૨૧૪માં અંચલગચ્છ શરૂ કર્યો. ત્યારબાદ તેમનું નામ આર્યરક્ષિત-સૂરિજી થયું હતું.

(૨) તપાગચ્છીય વિજયચંદ્રસૂરિજી થયા (વિજાપુરમાં ચાતુર્માસ સં. ૧૨૯૬) કે જેઓ વસ્તુપાલનાં વિદ્યામંડલમાં ગણાતા હતા.

(૩) વાદિદેવસૂરિજીના શિષ્ય વિજયચંદ્રસૂરિજી થયા.

(૪) રાજગચ્છીય મલયચંદ્રસૂરિજીના શિષ્ય વિજયચંદ્રસૂરિજી થયા કે જેમના ઉપદેશથી વિ. સં. ૧૪૯૩માં જીરાવલામાં પાર્શ્વનાથ ભગવાનની ૨૦મી દેરી નિર્માણ પામેલી.

સ્તોત્રના રચનાસમયોલ્લેખના અભાવે આમાંથી કયા વિજયચંદ્ર-સૂરિજીની રચના હશે ? તે પ્રશ્ન નિરુત્તર રહે છે.

પ્રસ્તુત સ્તોત્રનું સંપૂર્ણ વર્ણન ક્રમશઃ અને શબ્દશઃ જિનપ્રભસૂરિજી વિરચિત (સં. ૧૩૮૯) ઉજ્જયન્ત સ્તવ સાથે મળતું આવે છે. જેનો કેટલોક અંશ અભ્યાસાર્થે અહીં આપ્યો છે.

'नेमिर्निजांऽह्रिकमलैरमलं चकार,

श्रीरैवतं गिरिपतिं तमहं स्तवीमि. १. (रै.५.)

'श्रीनेमिपावितं स्तौमि गिरनारं गिरीश्वरम्' १. (उ. स्त.)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पार्श्वः स तेजलपुरैकशिरःकिरीटः,
खङ्गारदुर्गतिलकाः वृषादिदेवाः ।
पुष्णन्ति पुण्यममलं यदुपत्यकायां,' ॥२॥ (રૈ.પ.)
'शृङ्गारयन्ति खङ्गारदुर्गं श्रीऋषभादयः ।
श्रीपार्श्वस्तेजलपुरं, भुषितैतदुपत्यकम् ॥३॥ (ઉ. સ્ત.)
'अभ्रंलिहा जिनगृहावलिरिन्दुशुभ्रा,
शृङ्गे यदीय इह योजनयुग्मतुङ्गे ।
पिण्डीकृतः सुकृतराशिरिवैष भाति, ॥३॥'' (રૈ.પ.)
'योजनद्वयतुङ्गेऽस्य, शृङ्गे जिनगृहावलिः ।
पुण्यराशिरिवाभाति शरच्चन्द्रांशुनिर्मला' ४. (ઉ. સ્ત.)

આમ બન્ને સ્તોત્રમાં બિંબ-પ્રતિબિંબભાવ સ્પષ્ટ રીતે પ્રગટ થાય છે. પરંતુ, પ્રસ્તુત સ્તોત્રની રચના કાળની અનિશ્ચિતતાને કારણે કોણે ઉપજીવન કર્યું છે તે કહી શકાય નહીં.

પ્રસ્તુત સ્તોત્રનું ભાષાસૌંદર્ય ઉજ્જયન્તસ્તવ કરતા વિશેષતા દર્શાવે છે. તે ઉપરાંત શામ્બમુનિની મુક્તિસંબંધિત પદ્યની રમ્ય રૂપકતા 'मौक्तिकलाभहेतोः' પદના અર્થ શ્લેષ દ્વારા રજૂ થઈ છે.

श्रीजाम्बवत्युदरकन्दरसिंहपोतः,
शाम्बस्तपःशितनखैर्भवकुम्भिकुम्भम् ।
यस्मिन् बभञ्ज किल मौक्तिकलाभहेतोः । (પદ્ય-૧૫)

પ્રદ્યુમ્નમુનિની મુક્તિપ્રાપ્તિ પણ 'सम्बन्धबद्धहृदयः किल सिद्धिवध्वा' (પદ્ય-૧૬) પદ દ્વારા કલાત્મક રીતે રજૂ થઈ છે.

સહસ્રામ્રવનની કોયલનો ટહુકો પણ કવિશ્રીએ ઉત્પ્રેક્ષાથી શણગાર્યો છે.

'यस्मिन् सहस्रवनलक्षवनद्रुमौघे,-
पुंस्कोकिलप्रियतमा कलनाददम्भात् ।
सुस्वागतानि किल पृच्छति भव्यलोकं' (પદ્ય-૧૯)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

આ મધુર વર્ણનો ઉજ્જયન્તસ્તવમાં નથી, તો ઉજ્જયન્તસ્તવના રથનેમિ-રાજુલનો પ્રસંગ (શ્લો. ૧૯) તથા પર્વત પર દિગ્ભ્રમને કારણે આડાઅવડા માર્ગે ચડી જવાથી પણ ચૈત્યોમાં સ્નાન-વિલેપન કરેલી મૂર્તિના દર્શન થવાની વાત (શ્લો. ૨૧) પ્રસ્તુત સ્તોત્રમાં નથી.

વર્ણનનો વિકાસ માનીએ તો પ્રથમ રચના ઉજ્જયન્તસ્તવની ગણાય અને વર્ણનનો સંક્ષેપ માનીએ તો પ્રસ્તુત સ્તોત્ર પ્રથમ રચાયું હોય.

राजीमतीयुवतिमानसराजहंसः,
श्रीयादवप्रथितवंशशिरोऽवतंसः ।
नेमिर्निजांह्रिकमलैरमलं[१] चकार,
श्रीरैवतं गिरिपतिं तमहं स्तवीमि ॥१॥ [वसन्ततिलका]

पार्श्वः स तेजलपुरैकशिरःकिरीटः,
खङ्गारदुर्गतिलकाः वृषभादिदेवाः ।
पुष्णन्ति पुण्यममलं यदुपत्यकायां,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥२॥

अभ्रंलिहा जिनगृहावलिरिन्दुशुभ्राः,
शृङ्गे यदीय इह योजनयुग्मतुङ्गे ।
पिण्डीकृतः सुकृतराशिरिवैष भाति,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥३॥

सौवर्णदण्डकलशाऽऽमलसारसारं,
श्रीनेमिमन्दिरमुदारमुदं विधत्ते ।
यस्योपरि त्रिदशखेचरसुन्दरीणां,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥४॥

---

१. प्रतौ '०कमलैर्यमलं' इति पाठः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यत्राङ्गिभिः कृतनुतिः प्रभुपादुकेयं,
सन्तक्ष्य पापपटलं नखकोटिटङ्कैः ।
पुण्यानि भालफलकेषु समुत्करोति,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥५॥

त्रैलोक्यलोकशुचिलोचनलोभनीये,
नेमीश्वरे जिनवरे किल यत्र दृष्टे ।
चेतः प्रसीदति विषीदति दुःखराशिः,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥६॥

प्राज्यं जरत्तृणमिव प्रविहाय राज्यं,
बन्धून् विधूय विधुरानपि यत्र नेमिः ।
दीक्षां श्रितस्त्रिभुवनाभयदानदक्षां,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥७॥

नेमीशितुर्भगवतोऽजनि यत्र लोका-
ऽऽलोकाविलोकनकलाकलितस्वभावम् ।
ज्योतिर्जगज्जनवनीनवनीरदाऽऽभं,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥८॥

षट्त्रिंशतास्यधिकया मुनिपञ्चशत्या,
नेमिर्निषण्णवपुषाऽनशितश्च मासम् ।
यस्मिन् जगाम शिवमद्भुतधामधाम,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥९॥

श्रीजैनबिम्बभृतवासवमण्डपस्थाः,
श्रीनेमिमज्जनमहोत्सवबद्धकक्षाः ।
यस्मिन् सहस्रनयना भविनो भवन्ति,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥१०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यत्रावतार इव सर्वसरस्वतीनां,
रम्यं सदैव सलिलैरमृतो[प]मानैः ।
कुण्डं विराजति गजेन्द्रपदाभिधानं,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥११॥

अष्टापदप्रभृतिकीर्त्तनकीर्त्तनीये,
श्रीवस्तुपालसचिवाधिपतेर्विहारे ।
यत्र स्वयं निवसति प्रथमो जिनेन्द्रः,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥१२॥

सिंहासना वरसुवर्णसुवर्णदेहा,
पुष्पन्धयी पदसरोरुहि नेमिभर्तुः ।
यत्राम्बिका वितनुते किल सङ्घरक्षां,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥१३॥

शैवेयदेवपदपङ्कजसङ्गचङ्गं,
शृङ्गं विलोक्य भविका अवलोकनाख्यं ।
यस्मिन्निजानि नयनानि कृतार्थयन्ति,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥१४॥

श्रीजाम्बवत्युदरकन्दरसिंहपोतः,
शाम्बस्तपःशितनखैर्भवकुम्भिकुम्भम् ।
यस्मिन् बभञ्ज किल मौक्तिकलाभहेतोः,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥१५॥

श्रीरुक्मिणीसुतमुनिः शिखरे यदीये,
तेपे तपांसि सुभगं करुणाऽतिकामम् ।
सम्बन्धबद्धहृदयः किल सिद्धिवध्वा,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥१६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दीप्रप्रदीपकलिका इव यत्र नित्यं,
नानाविधौषधिगणा रजनौ ज्वलन्ति ।
घण्टाक्षराऽऽतपनिवारिशिलैकशाली,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥१७॥

सत्पल्लवैर्निवसितेव सितप्रसूनै-
र्लिप्तेव सत्फलभरैः समलङ्कृतेव ।
यस्मिन् मनांसि रमयत्यनिशं वनश्रीः,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥१८॥

यस्मिन् सहस्रवनलक्षवनद्रुमौघ-
पुंस्कोकिलप्रियतमा कलनाददम्भात् ।
सुस्वागतानि किल पृच्छति भव्यलोकं,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥१९॥

स्नानं विलेपनमुदारतरा च पूजा,
दानं तपःप्रभृतिशेषमशेषकृत्यम् ।
जायेत यत्र विहितं शिवसौख्यहेतोः,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥२०॥

इत्येवंविध रैवताचलशिरःशृङ्गारचूडामणि-
र्विश्वाम्भोजविकाशवासरमणिस्त्रैलोक्यचिन्तामणिः ।
सेव्यः सैष तमोवितान**विजये चन्द्रो**पमैः शूरभिः(?),
श्रीनेमिर्जगतां विभुर्भवतु मे दुष्टाष्टकर्म्मच्छिदे ॥२१॥ [शार्दूल०]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ९) गिरनारमण्डनश्रीनेमिजिनस्तवः
## १०) गञ्जेजीममण्डननेमिजिनस्तुतिः

વિ.સં. ૧૮૨૬ના ચૈત્ર સુદ પૂર્ણિમાના દિવસે વાચનાચાર્ય રામચંદ્રજીના શિષ્ય આનંદવલ્લભજીએ આ સ્તવની રચના કરી છે. પ્રથમ ઉપજાતિ પછી ૯ અનુષ્ટુભ્ છંદોબદ્ધ આ સ્તવની રચના ગિરનારની જાત્રા કરીને થઈ હશે. જેનું દિશાસૂચન ૮મા શ્લોકમાં કર્યું છે.—'यज्जातं नेमिदर्शनम्'

કવિશ્રીએ પ્રથમ તથા સપ્તમ પદ્યમાં શ્રીગિરનારને વંદના કરી છે. 'वन्दे सदाऽहं गिरनारभूधरम्', 'वन्दे रैवतकाचलम्' બાકી સર્વત્ર શ્રીનેમિનાથ પરમાત્માને વંદન કર્યા છે. અત્યન્ત સરળ ભાષામાં રચાયેલ આ સ્તોત્રમાં નેમિનાથ પ્રભુ શીવલક્ષ્મીમાં રત હોવાથી રાજીમતીનો ત્યાગ કરીને (પદ્ય-૨) ચિત્તમાં જીવદયાધારણ કરીને પ્રાણીઓને છોડાવ્યા (પદ્ય-૩) પ્રભુના દીક્ષા-કેવળજ્ઞાન તથા નિર્વાણ સમયે ઇન્દ્રએ કરેલી ભક્તિ (પદ્ય-૪-૫-૬), અમ્બિકા મૂર્તિ, અનેક કુંડોથી શોભાયમાન રૈવતાચલ, (પદ્ય-૭) વગેરેનો માત્ર સામાન્ય ઉલ્લેખ કર્યો છે. અંતે પરમાત્માના દર્શનનો આનંદ વ્યક્ત કર્યો છે—

'अहो ! मे भाग्यसम्पत्तिरहो ! मे पुन्यसञ्चयः' (પદ્ય-૮)

પ્રસ્તુત સ્તોત્રનું સંપાદન જે હસ્તલિખિત પ્રતિ પરથી થયું છે. તે સંપૂર્ણ પ્રતિ આનંદવલ્લભજીકૃત સ્તોત્રોની છે. તેમાં અષ્ટક-સ્તુતિ વગેરે કુલ-૧૫ લઘુકૃતિઓ છે. પ્રતમાં આપેલ ક્રમે તે કૃતિઓ આ પ્રમાણે છે—

(૧) ષિચુન્દ જિંનાંધિપતિ સ્તવન—ર.સં.૧૮૫૯ (અષાઢ વદ-૩)

(આ સ્તવનમાં ધૂપ, પુષ્પ, દીપ, નૈવેદ્ય, જલ, ચંદન, ફલ, આરતિ—આ ક્રમે અષ્ટપ્રકારી પૂજાનું વર્ણન છે.)

(૨) શત્રુંજય તીર્થાષ્ટક—૧૮૨૬ (વૈશાખ સુદ-૨)

(૩) પ્રસ્તુત સ્તોત્ર—૧૮૨૬ (ચૈત્ર સુદ પૂર્ણિમા)

(૪) લોદ્રવપાર્શ્વનાથાષ્ટક—૧૮૬૪ (જેઠ સુદ પૂર્ણિમા)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(૫) કોટારામપૂરમંડન ચન્દ્રપ્રભ જિનાષ્ટક–૧૮૭૪ (આ અષ્ટક કોટારામ નગરમાં ચંદ્રપ્રભસ્વામીની પ્રતિષ્ઠાના દિવસે (=વૈશાખ સુદ-૮, ગુરુવાર) રચાયું છે. આ પ્રતિષ્ઠા પુષ્યનક્ષત્રમાં થઈ હતી. પ્રસ્તુત સ્તોત્રમાં ચંદ્રપ્રભ સ્વામીના પાંચ કલ્યાણકોની તીથીઓનો ઉલ્લેખ છે.)

(૬) શિખરગિરિઅષ્ટક–૧૮૭૯ (મહા વદ-૭) (અહીં કવિશ્રીએ પોતાનું 'મેઘચન્દ્ર' નામ પ્રયોજ્યું છે. તે આનંદવલ્લભજીનું જ અપરનામ છે ? કે મેઘચંદ્રજી તેમના કોઈ ગુરુભાઈ છે ?)

(૭) શિખરગિરિવંદન

(૮) શિખરગિરિસ્તુતિ–(જેમાં જિન સૌભાગ્યસૂરિજીનો ઉલ્લેખ છે.)

(૯) શિખરગિરિતીર્થપતિસ્તુતિ.

(૧૦) જિનકુશલસૂરિસ્તુતિ.

(૧૧) બટુકાષ્ટક-(આ બટુકભૈરવ ગંજેજીમનગરના શ્રીનેમિનાથ જિનાલયમાં ક્ષેત્રપાલ તરીકે બિરાજમાન છે.)

(૧૨) ચંપાપૂરીમંડન વાસુપૂજ્યજિનવંદન.

(૧૩) સમ્મેતશિખરજિનવંદન.

(૧૪) ગંજેજીમમંડન નેમિજિનસ્તુતિ.

(૧૫) સીમંધરજિનસ્તુતિ. (આ સ્તુતિ શાર્દૂલ૦ છંદમાં છે સામાન્યતઃ શાર્દૂલ૦ ચતુષ્પદી છંદ છે. પરંતુ અહીં તેના છ પદ પ્રયોજીને ષટ્પદી બનાવી છે.)

ઉપર્યુક્ત ૭મા સ્તોત્રથી કવિશ્રીએ પોતાનું નામ કે રચનાકાળનો ઉલ્લેખ કર્યો નથી. તથા ૧૪મા ક્રમાંકની સ્તુતિ નેમિનાથ પરમાત્માની છે. તેથી સ્તોત્ર ક્રમાંક (૧૦)માં સમાવિષ્ટ કરી છે. આ નેમિનાથ પરમાત્માની સ્તુતિ સિવાયના સર્વ સ્તોત્રો પરિશિષ્ટમાં આપેલા છે.

આ સ્તોત્રોના ઉલ્લેખો પ્રમાણે વિચારીએ તો આનંદવલ્લભજી વિષે આ પ્રમાણે માની શકાય–સં. ૧૮૨૬માં તેઓ ગુજરાતમાં આવ્યા હતા

Jain Education International For Personal & Private Use Only www.jainelibrary.org

અને ગિરનાર તથા શત્રુંજયની યાત્રા કરી હતી. કોટરામનગરે શ્રીચન્દ્રપ્રભસ્વામીની પ્રતિષ્ઠામાં હાજર રહ્યા હતા. લોદ્રવાપાર્શ્વનાથ તથા ચંપાપુરી તીર્થની યાત્રા પણ કરી હતી. આનંદવલ્લભજી જ્યાં જ્યાં યાત્રા કરતા ત્યાં ત્યાં તેમના હૈયાની પ્રભુભક્તિ સ્તોત્રસ્વરૂપે બહાર આવી જતી. કવિશ્રીની હયાતિ ૧૮૨૬થી ૧૮૯૨ સુધી તો હતી જ. તેઓશ્રીએ જિનસૌભાગ્યસૂરિનો ઉલ્લેખ કર્યો છે. ખતરતગચ્છમાં આ સમયમાં એક જ જિનસૌભાગ્યસૂરિ થયા છે. તેઓ શ્રી જિનહર્ષસૂરિજી (આચાર્યપદ-૧૮૫૬)ના શિષ્ય હતા. તેમને આચાર્યપદપ્રાપ્તિ વિ.સં. ૧૮૯૨માં થઈ હતી. શિખરગિરિસ્તુતિમાં કરેલા જિનસૌભાગ્ય-સૂરિજીના શાસનનો ઉલ્લેખ આનંદવલ્લભજીની ૧૮૯૨ સુધીની હયાતી સિદ્ધ કરે છે.

वरौषधीभिस्सुतरां विराजितं, वृक्षाभिरामं मुनिभिस्समाश्रितम् ।
मोक्षैकमार्गं गिरिमौलिभूतकं, वन्दे सदाऽहं गिरनारभूधरम् ॥१॥ [उप०]

यौवने येन संत्यक्ता, नारी राजीमती शुभा ।
शिवश्रियां रतं नित्यं, वन्दे तं नेमिनाथकम्[१] ॥२॥ [अनुष्टुभ्]

धृत्वा जीवदयां चित्ते, मोचयित्वा च प्राणिनः ।
उद्वाहे योगतः पश्चाद्, वन्दे तं नेमिनाथकम् ॥३॥

दीक्षाकालं सुराधीशो, ज्ञात्वा रैवतकाचले ।
स्वकृत्यमकरोद्यस्य, वन्दे तं नेमिनाथकम् ॥४॥

केवलोत्पत्तिवेलां वा, यस्य मत्वा सुराधिपः ।
अकरोत्स्वीयमर्थं च, वन्दे तं नेमिनाथकम् ॥५॥

मोक्षस्यावसरे यस्य, स्वामिनो भक्तितोऽकरोत् ।
हरिः स्वजन्मसाफल्यं, वन्दे तं नेमिनाथकम् ॥६॥

---

१. अत्र सर्वत्र चतुर्थे पादे '०नेमिनायकम्' स्यात् तर्हि शोभनम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अम्बिकामूर्त्तिरम्यं वै, बहुकुण्डविराजितम् ।
देवैरपि सदा सेव्यं, वन्दे रैवतकाचलम् ॥७॥

अहो ! मे भाग्य-संपत्तिरहो ! मे पुण्यसञ्चयः ।
पश्यन्तु तज्जना भव्या, यज्जातं नेमिदर्शनम् ॥८॥

रस[६]-द्वि[२]काऽष्ट[८]-सि[१]ध्यब्दे, चैत्रमासे सिते दले ।
राकायां कर्मवाट्यां च, वन्दितो नेमिनायकः ॥९॥

विदुषो **रामचन्द्र**स्य विनेयेन हितेच्छुना ।
**आनन्दवल्लभे**नासौ, श्रीसङ्घेन समं मुदा ॥१०॥

## १० ) गञ्जेजीममण्डननेमिनाथस्तुतिः

*गञ्जेजीममुखे सदा हितकरे चैत्यालये संस्थितं,*
सद्दण्डैः कलशैर्गवाक्षकटकैः संशोभितं सर्वदा ।
शङ्खाङ्केन युतं शिवासुतमहं वन्दे सदा पावनं,
श्रीमन्तं जगदुत्तमं यदुपतिं श्रीनेमिनाथं जिनम् ॥१॥ [शार्दूल०]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ११ ) श्रुतपञ्चमीस्तवनम्

અજ્ઞાતકર્તૃક ૧૨ પદ્યોના પ્રસ્તુત સ્તોત્રમાં 'જ્ઞાન'નું મહિમાગાન મુક્તકંઠે ગવાયું છે. કવિશ્રીએ સુંદર ઉત્પ્રેક્ષાઓને લલિતપદાવલી સાથે સંમિશ્રિત કરી હોવાથી સ્તોત્ર આહ્લાદક બન્યું છે.

– संसारघोरगहनेऽतिविसर्पदर्पकन्दर्पसर्पविषवेगविकारमार्गम् (પદ્ય-૪)

– क्वाहं वैधेयधुर्यः प्रवरपदलसद्धुर्यमादुर्यधुर्या (પદ્ય-૧૧)

આ બે પદ પણ સ્તોત્રના સુંદર અનુપ્રાસને જણાવવા માટે પર્યાપ્ત છે.

જ્ઞાનની સ્તવનાના લયમાં કવિશ્રી દ્વારા જિનવચનને સંસારસાગરથી તારનાર શ્રેષ્ઠ પોત (=વહાણ) (પદ્ય-૨) અક્ષરાલીને સજ્જાંગુલી (પદ્ય-૪) પદપદ્ધતિને પ્રદ્યોતનદ્યુતિતતિની (પદ્ય-૫) રૂપકતા સાહજિકતાએ પ્રયોજાઈ છે.

છઠ્ઠા પદ્યમાં કરેલું 'મિત્ર' (=મિત્ર તથા સૂર્ય)ના બે કાર્યોનું અલંકૃત *વર્ણન ચિત્તાકર્ષક બન્યું છે. જેમાં 'दोषागम'નો શ્લેષ વધુ રસિકતા* જન્માવે છે. ૭માં પદ્યની જૈનવચનની 'ચારિત્રરાજ નિસ્વાનનાદ'ની ઉત્પ્રેક્ષા પણ તેટલી જ આકર્ષક છે.

રસની દષ્ટિએ જોઈએ તો નેમિનાથ પ્રભુને વિનમન કરતા પ્રયોજાયેલ 'भावारिमत्तकरिकुम्भकठोरसिंह' (પદ્ય-૧) વિશેષણ વીરરસની અનુભૂતિ કરાવે છે. સંસારઘોરગહનમાં–'अतिविसर्पदर्पकन्दर्प-सर्पविषवेग०' (પદ્ય-૪) પદમાં ભયની પ્રતીતિ છે. છઠ્ઠા-સાતમાં પદ્યમાં અદ્‌ભુતતાનુ સંવેદન છે. દશમા પદ્યના અંતિમ ચરણ–'मुक्तिनितम्बिनी-कुचतटक्रीडां सनीडा'૦માં શૃંગારનું નિરૂપણ છે. 'क्वाऽहं वैधेयधुर्यः' (પદ્ય-૧૧)માં લાચારી દર્શાવતા કવિશ્રી કરુણનું વેદન કરાવે છે. સમગ્ર સ્તોત્રને તો શાંતરસવાહક ગણી જ શકાય છે.

આમ, અહીં જ્ઞાનપંચમી તિથિ આરાધનાનો ઉપદેશ પણ કાવ્યાત્મક રીતે અને સરસતાએ રજૂ થયો છે.

જ્ઞાનપંચમીના સ્તવનના અવસરે પ્રાપ્ત બીજા પાંચ સ્તોત્ર પણ અહીં ક્રમશઃ આપ્યા છે.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आबालकालपरिपालितशुद्धशीलं,
श्रीवृष्णिमौलिकलितोरुवतंसलीलम् ।
भावारिमत्तकरिकुम्भकठोरसिंहं
नेमिं विनम्य नवनीर[द]नीलदेहम् ॥१॥ [वसन्ततिलका]

भव्याङ्गिनो यदिह चित्रतपोभिरुच्चै-
राराधयन्ति विशद**श्रुतपञ्चमी**षु ।
संसारसागरसमुत्तरणैकपोतं,
जैनं वचस्तदहमादरतः प्रणौमि ॥२॥

सच्चित्तसारसरसेषु जिनेन्द्रचन्द्रः,
पादप्रसादमपसादमवाप्य शीघ्रम् ।
औचित्यमेतदिह यद्गुणनायकानां,
सिद्धान्तसत्कुवलयं लभते विकाशम् ॥३॥

संसारघोरगहनेऽतिविसर्पदर्प-
कन्दर्पसर्पविषवेगविकारभाजाम् ।
भव्याङ्गिनां नयति निर्विषतां यदीया,
सज्जाङ्गुलीव किल रम्यतराक्षराली ॥४॥

श्यामान्धकारविधुरं जगदेतदुच्चैः, प्रद्योतनद्युतिततिः प्रकटीकरोतु ।
अश्रान्तमान्तरतमोपहतिप्रवीणा, सैका परं तु पदपद्धतिरेव यस्य ॥५॥

दोषागमेन विधुराणि जनाम्बुजानि,
योऽलम्भयद् विलसदुज्ज्वलशीललक्ष्मीम् ।
दुःखार्दितेषु च समास्वसनप्रदानात्,
मित्राभिधेययुगलं किल नाऽतिशेते ॥६॥

भव्याङ्गिनां रुचिरमानसपत्तनान्त-
र्लीलायितं प्रबलमोहनृपस्य तावत् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कर्णातिथीभवति नैव चरित्रराज-
निस्वाननादसमजैनवचोऽस्य यावत् ॥७॥

ये पञ्चमीतिथिषु बद्धविशुद्धसन्धा,
आराधयन्ति विधिवद् विशदागमं तम् ।
वर्षाणि पञ्चदशपक्षयुतानि नित्य-
मेकासनादिविलसत् सुतपोविशेषैः ॥८॥

न व्यापदुल्लसति याति जडत्वमारा-
दाराधनं विदधते विमला गुणौघाः ।
दूरे न केवलकला कमलाऽपि तेषां,
श्रीपञ्चमीतिथितपश्चरणप्रभावात् ॥९॥

संसुद्धश्रुतपञ्चमीतपसि ये नित्यं निबद्धादरा
रम्योद्यापनकप्रथां प्रगुणयन्त्याऽऽपूर्यपूर्णं तपः ।
चञ्चत्पुस्तकपाटिकाप्रभृतिभिर्नानाविधैर्वस्तुभि-
स्तेषां मुक्तिनितम्बिनीकुचतटक्रीडा सनीडा नृणाम् ॥१०॥ [शार्दूल०]

क्वाहं वैधेयधुर्यः प्रवरपदलसद्धुर्यमाधुर्यधुर्या,
वाणी क्वाऽसौ जिनानां नयगमगहना हेतु-दृष्टान्तसारा ।
अस्या स्तोत्रे पवित्रे नि[बि]डजलधियो[2] जन्म मा भूतदेतत्,
पानं चन्द्रद्युतीनां निज़भुजयुगतो वारिधेर्लङ्घनं वा ॥११॥ [स्रग्धरा]

इत्थं स्तोत्रं पवित्रं विविधभणितिभिर्बद्धमम्भेधिरङ्गत्-
संसाराऽपारनीरप्रतरणकरणे शस्तबोहित्थ[3]कल्पम् ।
यः श्रद्धाचारुचित्तः पठति दिविषदा वासवाऽऽसेव्यपश्चात्,
विज्ञातश्रौतसारः सुपदपदमयं सिद्धिसौधे विधत्ते ॥१२॥

---

१. प्रतौ 'निस्वान्' इति पाठः । २. 'जडधियः' इति ड-लयोः ऐक्यात् ।
३. बोहित्थः-नौः इति देश्यशब्दः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## १२ ) ज्ञानपञ्चमीस्तवनयुक्तं नेमिनाथस्तवनम्

ખરતરગચ્છીય જિનરાજસૂરિજી (સ્વર્ગવાસ-૧૪૬૧)ના શિષ્ય પિપ્પલક શાખા સ્થાપક જિનવર્ધનસૂરિજીના શિષ્ય કીર્તિરાજ ઉપાધ્યાયજીએ પ્રસ્તુત સ્તવનની રચના કરી છે.

તેઓશ્રીનો જન્મ વિ.સં. ૧૪૪૯, ચૈત્ર. સુ. ૮ના દિવસે કોરટાગામમાં થયો હતો. શંખલેચાગોત્રીય દેપમલ્લ પિતા અને દેવલદે માતા હતા. શ્રીનેમિનાથ પરમાત્માનું મહાકાવ્ય (ર.સં. ૧૪૯૫) રચનાર આ કવિશ્રીના જીવનમાં પણ નેમિનાથ પ્રભુની જેમ જાન લઈને જતા માર્ગમાંથી પાછા ફરીને દીક્ષા ગ્રહણ કરેલી. તેમને માર્ગમાં થયેલું સેવકનું કરુણ નિધન જોઈને તીવ્ર વૈરાગ્યભાવ પ્રગટેલો. વિ.સં. ૧૪૬૩, અષાઢ વદ-૧૧ના દિવસે જિનવર્ધનસૂરિજીના હાથે તેમની દીક્ષા થઈ હતી. વિ.સં. ૧૪૭૦માં ઉપાધ્યાય પદ અને જિનચંદ્રસૂરિજી (સ્વર્ગવાસ-૧૫૧૪)ના હાથે વિ.સં. ૧૪૯૭માં આચાર્યપદપ્રાપ્તિ થઈ હતી, આચાર્યપદવી પછી તેમનું નામ કીર્તિરત્નસૂરિ થયું હતું.

ઉપાધ્યાય કીર્તિરાજજી સંસ્કૃતભાષાના પ્રોઢ અને પ્રતિભાવંત કવિ હતા. તેમની જેસલમેરના લક્ષ્મણવિહારની પ્રશસ્તિ (ર. સં. ૧૪૭૩) લાલિત્ય પૂર્ણ રચના છે. તેમજ અજિતનાથ જપમાલા ચિત્રસ્તોત્ર (ર.સં. ૧૪૭૬) શ્લેષમય ચિત્રાલંકારોથી પરિપૂર્ણ પ્રોઢ રચના છે. આ ઉપરાંત તેમના બીજા પણ કેટલાક સ્તોત્રો પ્રાપ્ત થાય છે.

અપભ્રંશ પ્રધાન મારુગુર્જર ભાષાના ૧૩ પદ્યોમાં થયેલી આ રચના જ્ઞાનપંચમીના સ્તવનરૂપ છે. જ્ઞાનના પાંચ ભેદને લઈને પાંચના અંકને પકડીને વિવિધ પદાર્થોનું વર્ણન કર્યું છે. અપભ્રંશની પ્રધાનતાને કારણે વસ્તુ તથા ભાસ છંદો અહીં પ્રયોજાયેલા જોવા મળે છે.

અહીં અન્ત્ય પદ્યમાં પ્રયોજાયેલ 'કીત્તિરાય' પદ કીર્તિરાજ ઉપાધ્યાયની આચાર્યપદ (સં. ૧૪૯૭) પૂર્વેની રચનાનું સૂચન કરે છે.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वंदामि नेमिनाहं, पंचम गइ कुमरि विहिय वीवाहं ।
भंजिय मयणुच्छाहं, अङ्गीकयसीलसन्नाहं ॥१॥

**भास :-**

अत्थिय काया पंच कहिय जिण पंच पमाया ।
पंच नाण पंचेव दाण पणवीस कसाया ।
पंच विषय पंचेव जाइ, इन्द्रिय पंचेव,
सुमति पंच आयार पंच तह वय पंचेव ॥२॥

पंच भेय सज्झाय पंच चारित्त परूविय,
इग्यारिसि पंचमि पमुक्ख तव जेण पयासिय ।
पंच रूव मिच्छत्त-तिमिर-निन्नासण-दिणयर,
नयण सलूणउ देव नेमि सो थुणियइ सुहयर ॥३॥

**वस्तु :-**

पंच वन्नहि पंच वन्नहि सुरहि कुसुमेहिं,
मणि-माणिक-मुत्तियां एह, पञ्च पञ्च वत्थूणि उत्तम ।
भावइ पञ्चय पुत्थियहि, पञ्च वरिस काऊण पञ्चमि,
जे आराहइ पञ्चविह नाण ताण लोयाण
नेमिजिणेसर भुवणगुरु द्यउ वर केवलनाण ॥४॥

**भास :-**

जिण मूल उमूलिय पञ्चबाण, पञ्चम गइ पामिय जेणि ठाण ।
सावण सिय पञ्चमि जंम्म जासू, हूं भावइ वंदउ चरण तासु ॥५॥

जिण चउदह पुव्व इग्यार अङ्ग, उपदेसइ दंसिय मुक्खमग्ग ।
परमिट्ठिपञ्च मझ हि पहाण, तं नमह नेमि जिण होइ केवलनाण ॥६॥

जो केसव पञ्चहिं पंडवेहिं, पञ्चङ्गइ पणमिय जादवेहिं ।
सिय पञ्चम नाण आराहगाण, सो हरउ दुरियं जिणसेवगाण ॥७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**वस्तु :-**

पढम नाणहि पढम नाणहि भेय अडवीस,
चउद भेय सुयस्स तह, अवहि नाण छब्भेय निम्मल ।
मणपज्जव नाण पुण, दुन्नि भेय इक भेय केवल
एवं पञ्चपयारमिह जेण परूविय नाण
सो नंदिउ सिरि नेमि जिण मङ्गलमय अभिहाण ॥८॥

**भास :-**

पञ्चासवतक्करहणण, दिणयर जिम दीपंत ।
पइ दिट्ठउ सिरि नेमिजिण, हियय कमल विहसंत ॥९॥

तुट्टइ पञ्चपयार पह, अन्तराय अन्धयार ।
पञ्चाणुत्तर भाव सवे, पयडिय हुय जगि सार ॥१०॥

भवपुरि वसतउ सामि हूय, राग दोस मिलिएहिं ।
रयणदिवस संतावियउ ए, पञ्चिंदिय चोरेहिं ॥११॥

सिद्धिनयर दिउ वास हिव, करि पसाउ जिणराय ।
पञ्चम गइ कामण रमण, वर पञ्चाणण ताय ॥१२॥

सिवादेविनंदण पावखंडण तरण-तारणपच्चलो,
हयकम्मरिउबल सबल केवलनाणलोयण निम्मलो ।
सिरि नाणपंचमि दिवसि थुणियइ, नेमिनाह जिणेसरो,
दिउ सिद्धिसंपइ देव ! जंपइ, **कीत्तिराय** मणोहरो ॥१३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गिण्हंति केइ दिक्खं सङ्घत्तं केइ सम्मत्तं ।
नियमाभिग्गह केइ पयदिणमेवं अह कयाइ ॥३७॥

इह कण्हो अट्ठारसमुणिसहससुवंदणेण अज्जेई ।
तित्थं खायगसम्मं तब्बंध-रसा उप्पायणेइ ॥३८॥

तो रेवयगयरायं दढपायं पज्जऽवज्जसुंडायं ।
उदयऽत्थमंत-करगुणलंबंतरविंदुघंटायं ॥३९॥

पज्जुन्न-संबजोहं निज्जरमयजल-वणस्सईगुडियं ।
जिणगिहकुट्टं रुहिउं, जिणेह मोहविपक्खं ॥४०॥

एयम्मि गिरिवरम्मि वासाभिहयं गुहाए राइमइं ।
दट्ठुं रहनेमि खलिओ, महासईए समुद्धरिओ ॥४१॥

इत्थ य गयसुकुमालो बालकुमारो दसारकुलसारो ।
पव्वइओ तद्दिवसं सुसाण-पडिमाए सिद्धिगओ ॥४२॥

इत्थ य ढंढकुमारो, अलद्धि निवभत्ति इब्भदाणम्मि ।
निवलद्धि त्ति पउत्तो, परिट्ठविंतो गओ सिद्धिं ॥४३॥

निय-मउड-छत्त-चामर दाउं कन्हेण अणुगमिज्जंतो ।
इह तित्थे पव्वइओ थावच्चसुओ सहस्सजुओ ॥४४॥

अक्खोभाइ अट्ठ वि इत्थ वि दिक्खेइ नेमिजिणचंदो ।
रुप्पिणि-भामापमुहा अट्ठ वि कन्हग्गमहिसीओ ॥४५॥

पज्जुन्न-संबपमुहा कुमरा तह इत्थ नरवई बहवे ।
जाइवनर-नारीओ अणेग सहसा उ पव्वईया ॥४६॥

इय बहुनिवे वह्निसुया पव्वइया दसदसार सुयबहवे ।
हरि-हलि-पुत्ता-पुत्तय-पडिपुत्तय-नत्तुया य वहू ॥४७॥

वाससय तिन्नि गेहे छउमे चउपन्नदिणाइं ।
तेहूणे वाससय सत्त केवलि सहसं सव्वाओ विहरित्ता ॥४८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सत्तो इह सिहरतले मासं पाउगमण नेसज्जी ।
छत्तीसाहिय पणसय मुणीहि अद्धरत्ति चित्तहिं ॥४९॥

सिद्धो नेमिजिणिंदो तओ अणुसुपसिद्धिपत्तस्स ।
छेलसीवा[स]सहस्स किंचूणा एय-तित्थस्स ॥५०॥

ता सिरिरेवय सिहिरिणि जिणगिह सुरसिहरिसिहरमारुहिउं ।
भविया सहेह तुरियं सिरि सग्ग-ऽपवग्ग पासायं ॥५१॥

इयं रेवयगिरिथुणणं, तह रेवयदंसण फरिसणं व ।
गुरुपुन्ना पाविंती नरिंदसुरसिरिमहिंदा वि ॥५२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ૨૫ ) नेमिशतकम्

પ્રાસાદિક અને માધુર્યપૂર્ણ સંસ્કૃતભાષામાં વિરચિત અજ્ઞાતકર્તૃક આ શતક ૧૧૭ પદ્યોનું છે. શૃંગારરસની પ્રધાનતાની સાથે મંજુલ પદાવલીઓએ કવિની કલાત્મકતાને અદ્‌ભુત રીતે શોભાવી છે. સહૃદયો માટે આ શતક હૃદયંગમ કલ્પનાઓના પ્રદર્શનમેળા જેવું છે.

અહીં કથા વસ્તુ સર્વથા ગૌણ રહી છે. 'નેમિનાથપ્રભુના લગ્ન, પાછું વળવું, રાજીમતીનો વિલાપ, દીક્ષા અને બન્નેનું મોક્ષે જવું' આ કથાંશોનુ અત્યંત સંક્ષિપ્ત આલેખન કરીને કવિશ્રીએ કાવ્યત્વને જ પ્રાધાન્ય આપ્યું છે. કવિશ્રીની કેટલી કાવ્યપ્રસાદીનું આચમન કરીએ-

પ્રથમ યોગ્ય ભૂમિકા બાંધીને પથી ૧૨ પદ્યમાં નેમિનાથપ્રભુને લગ્ન માટે કૃષ્ણએ કરેલી વિનંતિ અને નિરાગી પરમાત્માની અનુમતિનું વર્ણન છે. ત્યારબાદ રાજીમતી કન્યાના રૂપ વર્ણનમાં કાવ્યત્વ ઝંકૃત થયું છે.

રૂપવર્ણનના પ્રથમ પદ્યમાં જ લાવણ્યને આપેલું તરુનું રૂપક મનોરમ છે.

'यदिय लावण्यतरुः प्रवृद्धः, प्रफुल्लितो लोचनकैरवेण ।
प्रत्यग्रहस्ताग्रसुपल्लवोऽयं, पीनस्तनाभ्यां फलितो रराज ॥१३॥'

પ્રવાહિત વર્ણનમાં પણ કવિશ્રીએ યમક અને અનુપ્રાસનું પ્રયોજન કરવા છતાં રસપક્ષ જરા પણ ખંડિત થયો નથી.

'सुधारसाधारवराधराधरा (१४)'

રાજીમતીના 'વદન' ને ઉત્પ્રેક્ષાની સાથે વ્યતિરેક કે અતિશયોક્તિ-ઓથી શણગાર્યું છે. 'બ્રહ્માએ પીયૂષરસ ગાળીને આ રાજીમતીના વદનનું સર્જન કર્યું અને શું બાકી રહી ગયેલા મલિન પદાર્થમાંથી આ ચંદ્રનું નિર્માણ કર્યું જેથી એ કલંકિત રહ્યો છે ?' (૧૫) 'અને રાજીમતીના વદનને ચંદ્રની ઉપમા આપવી એ તો માત્ર વચન વિલાસ છે. ચંદ્રને તો રાહુ ગળી જાય છે.' (૧૬)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

વધુમાં રાજીમતીના મુખને ક્રીડા સરોવરનું અપાયેલું રૂપક પણ અત્યંત મનોહર છે. 'રાજીમતીનું મુખ ક્રીડાસરોવર છે. જેમાં નેત્રરૂપી ઉત્પલ ખીલ્યા છે. ભ્રૂયુગરૂપી ભ્રમરો છે. કામદેવરૂપી હંસને વિલાસ કરવા માટે યૌવને તેનું નિર્માણ કર્યું છે.' (૧૭)

દશનની ગૌરકાંતિ અને અધરની અરુણકાંતિનું સંમિલન જોઈને કવિશ્રીની કલ્પના અનેક વિરોધાભાસના આદર્શમાં પ્રતિબિંબિત થઈ છે. (પદ્ય-૧૮-૧૯) રાજીમતીના અધરનો રસ-આસ્વાદ અતિશયોક્તિ દ્વારા વર્ણવ્યો છે. (પદ્ય-૨૧)

'જ્યાં લવણ હોય ત્યાં જ લાવણ્ય હોય છે. જ્યાં વ્યક્તિ હોય ત્યાં જ તેની જાતિ (ગુણ) હોય, પોતે લવણ ન હોવા છતાં લાવણ્યનું ગ્રહણ કરીને આ નિયમનું ખંડન રાજીમતીના અધરોએ કર્યું છે.' (૨૨)

અધરની વિવર્ણના કર્યા બાદ કવિની દૃષ્ટિ તે બાલાના નયનો પર સ્થિર થઈ છે. 'રાજીમતીના નયનની ભવાં મન્મથના રમ્ય ધનુષ્ય છે. કટાક્ષો બાણાવલી છે. તેના દ્વારા મન્મથ માટે કોઈ અવધ્ય નથી.' (૨૩)

ચંદ્રસમાન લલાટની વિવર્ણનામાં अलीक અને दोषाकार શબ્દો દ્વારા વિરોધાલંકારની આકર્ષક ગૂંથણી થઈ છે. (૨૪)

'રાજીમતીના કુટિલ કેશપાશ એ મનોભવની ચંદ્રહાસ તલવાર છે. ત્રણ જગતને જીતવા માટે કલ્પેલી આ તલવાર હંમેશા કોશ (મ્યાન) વિનાની હોવાથી શોભે છે.' (૨૭)

'મુખેન્દુના ઉદયથી અંધકાર નાશી ગયો અને તેના કુંતલોમાં જઈને વસતિ કરી. ખરેખર, જ્યાંથી ભય ઉત્પન્ન થયો ત્યાં જ શરણ મળ્યું !' (૨૮)

શ્યામલ કેશપાશ માટે કવિ મંજુલ કલ્પનાઓને હજુ વધુ આગળ લઈ જાય છે: 'વંશાધઃ સુધી લટકતો તેનો કેશહસ્ત એ નિતમ્બની રક્ષા માટેનો નાગરાજ છે.' (૨૯)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'માલતી પુષ્પોથી શોભાયમાન અંજનવર્ણી કેશપાશ એટલે યમુનાના જલમાં ગંગાના ફીણનો સમૂહ.' (૩૦)

કેશ પછી હવે કર્ણયુગલનું પણ કવિ કાવ્યત્વના પુષ્પ દ્વારા પૂજન કરે છે. અંશપ્રદેશને આશ્લેષ આપતા તેના કર્ણ એટલે સ્મરની જાળ છે. તેથી જ તો તેને જોનારાઓના લોચનપક્ષી ત્યાં બંધાઈ જાય છે. (૩૧)

'રાજીમતિના કંઠે પોતાના મંજુલ નિસ્વન દ્વારા વીણા, કોયલ અને વેણુના મધુર નાદને જીતી લીધા છે શું એટલે જ તે કંઠ કંબુની જેમ રેખાત્રયથી અલંકૃત છે ?' (૩૨) કંઠ પર રહેલી ત્રણ રેખાને વિજયરેખા તરીકે દર્શાવીને કવિશ્રીએ આશ્ચર્ય ઉત્પન્ન કર્યું છે.

રસનિરૂપણાની ઉત્કૃષ્ટતા તરફ આગેકૂચ કરતા કવિશ્રી કુંકુમરાગથી રંગેલા મીનધ્વજરૂપી હસ્તિરાજના કુંભ સમાન (૩૩) ઉરોજ યુગ્મને કલ્પનાના રંગોથી શણગારે છે–

'જ્યારે ઇન્દ્રે વજ્ર દ્વારા પર્વતોની પાંખો છેદી નાખી હતી ત્યારે ગિરિરાજયુગલે તેના હૃદયમાં વસવાટ કર્યો.' (૩૪) 'ગિરિસ્વભાવ હોવાથી તે સ્વભાવે કઠીન છે. પરંતુ વેષ પરિવર્તન કરેલું હોવાથી મૃદુ છે, શરમને કારણે તેનું મુખ પણ શ્યામ બની ગયું છે.' (૩૫) 'આ પર્વતયુગ્મ પરથી લોકોના મન કામિત અર્થમાટે ભૃગુપાત કરે છે.' (૩૬)

'કટિની કૃશતા જોઈને કવિ વિધિને પણ દાનલમ્પટ ગણે છે. કારણકે નિતમ્બપર અતિસ્થૂલ વક્ષોજના ભારનું નિર્માણ કર્યું. અને મધ્ય-(ભાગ)ના નિર્માણમાં અતિકૃપણ બની ગયો.' (૩૮) અહીં વ્યાજસ્તુતિ દ્વારા વિધિની રચનાને પ્રશંસી છે.

રાજીમતીનો દેહ સંચારિણી કુન્દલતા (૩૯) અને મન્મથનું નગર છે. (૪૦)

તેના બાહુને કલ્પવૃક્ષની શાખાનું ભવ્યરૂપક આપ્યું છે. (૪૧)

રેખા અને યવાલિકાથી અલંકૃત તેના પ્રકોષ્ઠ (કાંડાનો ભાગ) અતિશય શોભતા હતા આથી જ વિશ્વાભૂષણ સ્વરૂપ શ્રીનેમિનાથ પરમાત્મા સાથે પાણિગ્રહણ કરવાના હતા. (૪૨)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ત્રિવલીથી અલંકૃત ગંભીરનાભીને સ્મરના ઘરની ક્રીડા માટેની સોપાન યુક્ત દીર્ઘીકા દર્શાવી છે. (૪૩) ગૂઢ ઉદર પર રાજિત શ્યામ રોમરાજીને પંકજમધ્યમાં શોભતી ભ્રમરમાલા દર્શાવી છે. (૪૪) તથા નિતમ્બભારને જગત જીતવા માટે મન્મથે કલ્પેલ દુર્ગ તરીકે પ્રદર્શિત કર્યો છે. (૪૫) બન્ને સાથળને કામદેવના કીર્તિસ્થંભ તરીકે વર્ણવી છે. (૪૬) આમ, અહીં પ્રત્યેક અવયવની વિવર્ણનામાં નવીન કલ્પનાઓ દ્વારા કવિશ્રીએ રાજીમતીના સહજ સૌંદર્યને ઉત્કૃષ્ટ અને વધુ આહ્લાદક દર્શાવ્યું છે.

જંઘાદ્વયની નિરૂપણામાં ગજસૂંઢને વ્યતિરેકાલંકાર દ્વારા હરાવી, શરમાવીને હાથી પાસે નસાડી મૂકી છે. (૪૯)

'વિભૂષણથી સર્વ નારીજન શોભે છે' એ પ્રસિદ્ધિ તો ઠીક છે. પરંતુ બ્રહ્માએ ભૂષણોને શોભાવવા માટે આ રાજીમતી કન્યાની રચના કરી છે. (૪૯) કવિની પ્રત્યેક ઉત્પ્રેક્ષાઓમાં આગવી નવ્યતા પ્રગટેલી જોવા મળે છે.

રાજીમતી ગૌરવર્ણી અને તેનો વર શ્યામવર્ણી છે. અહીં પણ કવિની પ્રકલ્પના પ્રકૃષ્ટ બની છે.

'अशेषशुभमादाय धात्रा सा गौरतनुः अकारी, ततः तादृक्ष्यंश्वेतत्वं अलक्षमाणः सः वरं श्यामरुचं चक्रे ।' (५०)

આ વિવર્ણના બાદ કથાઘટક થોડો આગળ ચલાવ્યો છે કે કૃષ્ણ વગેરે નેમિનાથ પ્રભુના લગ્નનો મહોત્સવ કરીને નેમિનાથ ભગવાનને ગજરાજ પર આરૂઢ કરીને વાજતે ગાજતે ઉગ્રસેન રાજાના ગૃહદ્વારે આવ્યા. (૫૪-૫૫)

તે સમયે નેમિકુમારને નિહાળવા માટે નગરનારીઓ ઉમટી પડી. ત્યાર તેઓની વિવિધ ચેષ્ટાઓનું કરેલું વર્ણન કલ્પસૂત્રમાં આવતા મહાવીરસ્વામી પરમાત્માના વરઘોડા સમયની સ્ત્રીઓની ચેષ્ટાઓના વર્ણનથી એકદમ મળતું આવે છે. (૫૦થી ૬૧)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

વિવાહ માટે બાંધેલા પશુઓને જોઈને નેમિનાથ પ્રભુના હૃદયમાં પ્રગટેલું ચિંતન (પદ્ય-૬૪થી ૬૬) વૈરાગ્યસભર રજૂ થયું છે.

સખીઓ રાજીમતીને તેનો વર શ્યામ હોવાને કારણે કટાક્ષ કરે છે.

'बाले ! त्वं विकसितपद्मचम्पकाभा, ते कान्तः श्रीहसिततमालमेघवर्णः । ननु तद्योगे मिथः अपि अभिख्या भाविता, श्यामाद्रेः शिरसि चन्द्रज्योत्स्ना यथेव ।' (६९)

નેમિનાથ પ્રભુએ દ્વારેથી પાછા ફરીને વાર્ષિકદાન આપીને દીક્ષા ગ્રહણ કરી આથી રાજીમતી વિલાપ કરે છે. કવિશ્રીએ આ વિલાપનું કરુણ અને લાંબુ વિવરણ અહીં કર્યું છે. (પદ્ય-૭૫થી ૧૧૩) તેના કેટલાક સુંદર પદ્યોનો આસ્વાદ માણીએ-

રાજીમતીએ સૌથી વધુ ઉપાલંભ વિધિને આપ્યા છે. એ ઉપાલંભોની પરંપરા આગળ ચાલે છે. 'રે વિધિ ! તેં કેમ મારા વલ્લભને સર્વરાગ રહિત બનાવ્યો ? અને મને તેવી અરાગી કેમ ન કરી ?'આટલું કહીને કવિએ રાજીમતીના મુખમાં લોકોક્તિ મૂકી છે.'सदृशयोगयुतेः सुखसन्ततिः' (૮१)

'દુઃખદાયક દુર્વિધિ બળવાન પુરુષોને છોડીને આ અબળા સ્ત્રી પર પડે છે.' આ વિલાપ વાક્યના સમર્થન માટે રાજુલ દૃષ્ટાંત આપે છે–'हिममपि प्रतिषिध्य महाद्रुमान् कमलिनीमबलामभिप्लुष्यति ।' (૮२)

રાજુલ સખીઓને વિધિના નયન ઢાંકવાનું કહે છે–'सखि ! कमपि कूटघटं प्रविघट्य विधेः नयनद्वयं पिधेहि,' તેની પાછળ કારણ એ છે કે 'જો વિધિ ન જુએ તો બહુ પ્રલોભનો આપીને, લોભાવીને પ્રિયને પર્વતપરથી લાવવાના છે.' (૮૩)

રાજુલના મનમાં એક પ્રશ્ન ઉદ્ભવ્યો છે.-

'अखिलसौख्यमितद्रुविशोषकः असौ विधिः केन विनिर्मितः ?' (૮૪)

વિધિ સૌનું નિર્માણ કરે છે. પરંતુ સમસ્તસુખસમુદ્રનું શોષણ કરનાર આ વિધિનું નિર્માણ કોણે કર્યું હશે ?

Jain Education International For Personal & Private Use Only www.jainelibrary.org

વિધિને 'સુરાધમ' તરીકે સંબોધીને તેનો અતિશય તિરસ્કાર કર્યો છે–

'निखिलधामवतां धुरि तिष्ठतः, मम प्रियस्य विवाहमपीच्छतः ।
सपदि वारयता भवता, त्वया वद सुराधम ! किं समुपार्जितम् ?' ॥ (૮૫)

સ્મરને પણ રાજુલ 'સકલકર્મકર' કહે છે–

'स्वकृतकर्म न वेत्सि ? यथा त्वया निजसुता किमकामि स्मर ! स्वयम् ।
प्रणयिनं परकीयमपाहरन्, सकलकर्मकरेति न लज्जसे ?' ॥૮૮॥

'રે સ્મર ! તું સકલકર્મકર છે આવું તને બધા કહે છે તો તને શરમ નથી આવતી ?'

રાજિમતીએ ચંદ્રને પણ ખૂબ કડવા શબ્દોમાં ઠપકો આપ્યો છે–

'विधुरयं विधुरं कृतवान् अलं' પરંતુ આ તો તેના કુલને ઉચિત જ છે. કારણકે કુટિલલક્ષ્મવાળાની મતિ અશુભ આચરણ જ કરે છે. (૯૧)

ચંદ્રને નિપુણ પુરુષોએ 'કુમુદબાન્ધવ' કહ્યો છે. તે યોગ્ય જ છે. કારણકે વિરહિણી સ્ત્રીઓને દાહ આપતા કિરણો દ્વારા તે કુ-મુદ બાન્ધવતાને સાચી ઠરાવે છે. (૯૨)

ઉક્ત બન્ને પદ્યોમાં विधुरयं विधुरं અને दाघकरैः करैः માં અને 'कुमुदबान्धव'એ પદની યમકરચના પદ્યના પૂર્વાર્ધ અને ઉત્તરાર્ધની આદિમાં થઈ છે. બુદ્ધિગમ્ય શબ્દાલંકારોની ગૂંથણી હોવા છતાં હૃદયગમ્ય ભાવપક્ષમાં જરા પણ શિથિલતા આવી નથી.

'આ રીતે અનાથ વધુઓનું મર્દન કરતો બહુ પાપોથી કલંકિત થયેલો આ ચંદ્ર દિવસે ભમતા શરમાય છે માટે રાત્રે ફરવા નીકળે છે.' (૯૩) અદ્ભુત ક્રિયોત્પ્રેક્ષાની આ સંરચના વિલાપની કરુણતાને વધુ ગાઢ બનાવે છે.

'સેવકોને અમૃત આપનાર ચંદ ! તું 'અમૃતસૂ' છે. પરંતુ સાથે વિષની સહોદરતા (બન્નેની ઉત્પત્તિ સમુદ્રમાંથી થઈ હોવાના કારણે) તે સફળ કરી છે. આથી જ સમુદ્રમાંથી થયેલો તારો જન્મ નિષ્ફળ ગયો છે

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(૯૪) પૌરાણિક માન્યતાઓની અને 'અમૃતસૂ' વગેરે નામોની સંયુક્તિ પૂર્વક કરેલી ઉત્પ્રેક્ષા પ્રસંગને વધુ ઉઠાવ આપે છે.

રાજીમતી સખીને કહે છે કે 'આ(ચંદ્ર)ને હવે હિમકર ન કહો હિંસિતની હિંસા કરનાર તેને ખરકર (=ઉગ્રકિરણ) કહો.' ત્યારબાદ ફરી ચંદ્રને પણ કહે છે–'તું શા માટે બહુ પાપોનો સંચય કરે છે ? શું તું પણ મારા વલ્લભ સાથે ભળી ગયો છે ?' (૯૫)

રાજુલ નેમિનાથ પ્રભુને વિનવે છે કે 'નાથ ! તું સર્વવેદી છે, તો મારા ચિત્તને કેમ નથી જાણતો ?' (૧૦૧)

'આ મેઘે ખૂબ જલવર્ષા વર્ષાવીને સમગ્ર જગતને આર્દ્રતર કરી દીધું છે. પરંતુ, તું મારા પ્રિયતમનું મન તણખલાના ત્રીજાભાગ જેટલું પણ આર્દ્ર કરી શક્યો નથી.' (૧૦૩)

'અવિધવા એવી મને તું હોવા છતાં લોકો વિધવા કહે છે.' (૧૦૮) અહીં સમાસના બળે અવિધવા અને વિધવામાં વિરોધાભાસ સર્જાયો છે.

જે પવન પ્રાણપ્રિયને સ્પર્શીને રૈવતાચલ પરથી આવે છે તે પવને પણ સુમુગ્ધ રાજીમતી આશ્લેષ આપે છે. (૧૧૩)

આમ, અહીં વિયોગજન્ય વિલાપો દ્વારા કરુણરસનું નિરૂપણ પણ અલંકારસભર કરવામાં આવ્યું છે.

અંતે ભર્તૃપથાભિલાષિણી રાજીમતીએ પણ શ્રીનેમિનાથ પરમાત્માના હાથે દીક્ષા ગ્રહણ કરી, કેવળજ્ઞાનનું સમુપાર્જન કર્યું, તે બન્ને દમ્પતી અવ્યય પદ પામ્યા ! (૧૧૭)

આમ, અહીં પૂર્ણ થયેલું શતક શૃંગારથી શરૂ થયેલું હોવા છતાં કરુણ પૂર્ણતા દ્વારા, નવીન કલ્પનાઓ સભર કાવ્યત્વનિરૂપણ દ્વારા (કવિના) પોતાના વિચારોને વ્યક્ત કરવામાં સમર્થ ભાષાસંરચના દ્વારા કાવ્યસાહિત્યમાં પોતાનું આગવું સ્થાન જમાવે છે.

પ્રસ્તુત શતકમાં શાર્દૂલ૦, સ્રગ્ધરા, ચિત્રમાલા, પ્રહર્ષિણી, દ્રુતવિલમ્બિત, પુષ્પિતાગ્રા, મન્દાક્રાન્તા, વસન્તતિલકા અને ઉપજાતિ

Jain Education International For Personal & Private Use Only www.jainelibrary.org

છંદો પ્રયોજાયા છે. જેમાં ઉપજાતિનું સંયોજન ધ્યાનાર્હ છે. સામાન્યતઃ ઇન્દ્રવજ્રા અને ઉપેન્દ્રવજ્રા બે છંદોની કે ઇન્દ્રવંશા અને વંશસ્થ એ બે છંદોની સંયુક્ત સંરચનાને ઉપજાતિ કહે છે પરંતુ અહિં ઘણા સ્થળોએ ઇન્દ્રવજ્રા કે ઉપેન્દ્રવજ્રાના ૧૧ અક્ષરના પદો સાથે ઇન્દ્રવંશા કે વંસસ્થ જેવા ૧૨ અક્ષરોના છંદોના મિશ્રણદ્વારા ઉપજાતિ છંદ પ્રયોજાયો છે. રથોદ્ધતા અને સ્વાગતાનું સંમિશ્રણ પણ (પદ્ય-૩૦) મળે છે.

हर्षादुल्लसितैः[१] स्मराद् विकसितैः[२] प्रोन्मीलितै[३] रागतो,
लज्जामन्थरितै[४]र्भयात्[५] तरलितैर्विस्फारितैर्विस्मयात् ।
अन्तःस्नेहभरालसैः[६] प्रियतमप्रेमार्द्रभावीकृतैः,
श्रीनेमिर्न चचाल रागरहितः कान्ताकटाक्षैर्नवैः ॥१॥ [शार्दूल०]

बालां पूर्णेन्दुकान्तिं प्रथमवयसि प्रेयसीं यः प्रहित्वा,
तस्थौ वै रैवताद्रेः शिरसि सरसान् कामभोगान् विहाय ।
वाचं नैवाऽनुमेने हरिमुशलिनोः प्राणिरक्षाप्रवीणो,
राजीमत्याः कुचाभ्यां कठिनहृदयः सोऽस्तु नेमिः शिवाय ॥२॥ [चित्रमाला]

निस्तर्हणं[७] प्राणिगणस्य मत्वा, कृपायुतो यः प्रजहौ च कामिनीम् ।
भवानुबद्धामवियुक्तप्रेमां, राजीमतीं रागमतीं तदानीम् ॥३॥ [उपजातिः]

द्वारावत्यां नगर्यां जलशयनृपतिः क्षीरडिण्डीरकीर्तिः,
श्रीनेमिस्तत्र नाथः कमलनयनरुक् सद्घनस्निग्धकायः ।
गोविन्दो राजकन्यां विशदगुणवतीं नाम राजीमतीं च,
सम्पप्रच्छोग्रसेनं नरपतिचतुरं पाणिपीडाय नेमेः ॥४॥ [स्रग्धरा]

---

१. उल्लासोऽन्तर्वृत्त्या शुभहेतुयुक्तभावत्वात् । २. विकसनं बहिर्वृत्या । ३. विशेषोन्मीलनं प्रियरागात् । ४. लज्जया मन्थरणं परस्परं विलोकनाऽभावात् । ५. भयं स्वाभाविकम् । ६. स्नेहभरालसत्वं नारीणां भर्तरि भवति । ७. हननम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नारायणो नेमिजिनं बभाषे, स्वामिन्नहो ! धैर्यमतिप्रकर्षः,
किमेककान्तां न करोषि रम्यां ?, मन्यस्व वाचं नरदेवदेव ! ॥५॥ [उप०]
भवादृशां नाथ ! न कोऽपि बोधकस्तथाप्यहं त्वामभिवक्तुमीशे ।
पाणिग्रहं चारु भवान् विदध्यात्, यथा दशार्हा मुदिता भवेयुः ॥६॥
भवेष्यरागी विभवेष्यरागी, संसारवारांनिधिसेतुभूतः ।
त्वं वर्तसे यादव ! रागशून्यः, किलाऽद्य पित्रोर्वचनं विधेहि ॥७॥
ये वीतरागा ऋषभादयस्ते, सर्वेऽपि पाणिग्रहणं विचक्रुः ।
सिद्धिं च जग्मुर्ननु नेमिनाथ !, प्रसीद योषाकरणे त्वतस्त्वम् ॥८॥
श्रीनेमिर्विजितेन्द्रियोऽप्यवधियुक्, शश्वद्घृणातत्परो,
भोगस्नेहविवर्जितस्तदपि यो, मेने हरेस्तद्वचः ।
कृष्णः श्रीजितसुन्दरीं वरकनीं, श्रीउग्रसेनात् ततः,
पुत्रीं याचितवांश्च नाभससिते, पक्षे तु षष्ठ्यां तिथौ ॥९॥ [शार्दूल०]
निर्वर्णनाऽर्थं किल रूपसम्पदामधोक्षजः सात्त्वतमादिदेश ।
या भाविनी नेमिविभोश्चिरण्टी, सा कीदृशीत्याऽऽशुनिरीक्षतां हि ॥१०॥ [उप०]
अथौग्रसेनीं प्रविलोक्य माधवं, स संबभाषेति विलोकिता कनी ।
यथा प्रयत्नेन कृतः स राजसूस्तथा कृता केन[८] तदीय वल्लभा ॥११॥
पराङ्गनावर्णनके[९] प्रयोजनमस्मादृशां नाथ ! न चाऽस्ति किञ्चित् ।
तथाविधानां तु यथार्थभाषया, जिह्वा पवित्रीक्रियते नितान्तम् ॥१२॥
यदीय लावण्यतरुः प्रवृद्धः, प्रफुल्लितो लोचन कैरवेण ।
प्रत्यग्रहस्ताग्रसुपल्लवोऽयं, पीनस्तनाभ्यां फलितो रराज ॥१३॥
यस्याः मुखेन्दो रदरश्मिकौमुदी, स्फुरत्प्रभामण्डलहास्यमिश्रिता ।
सुधारसाधारवराऽधराधरा[१०], मुदे न कस्मै सुभगस्य चेतसे ? ॥१४॥

---

८. ब्रह्मणा । ९. 'वराङ्गना०' - पा. । १०. सुधारसस्य आधारः सुधारसाधारः, वरश्चासौ अधरश्च वराधरः, सुधारसाधारश्चासौ वराधरश्च सः, तम् आसमन्तात् धरति इति सुधारसाधारवराधराधरा ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निगाल्य पीयूषरसं पितामहो, मरालगत्या वदनं व्यधत्त ।
तदुद्धृतं शेषमलं गृहीत्वा, किं वा विधुं येन कलङ्कितोऽसौ ? ॥१५॥
चन्द्रेण मीयेत तदीयवक्त्रं, वाङ्मात्रमेतन्न तु वास्तवं तत् ।
स्वर्भानुना गृह्यत एष चन्द्रस्तमो निगृह्णाति मुखं हि ज्योत्स्नया ॥१६॥
क्रीडातडागं मुखमेतदस्याः, नेत्रोत्पलं भ्रूयुगभृङ्गराजितम् ।
पञ्चेषुहंसस्य[११]विलासहेतोः, किं निर्मितं यौवनकारुणेव ? ॥१७॥
किमुत्पले दालिमबीजसन्ततिः ?, किं बिम्बकोशे खलु कुन्दकोरकः ।
मुक्तागणो विद्रुमभाजनाङ्कितः ?, किं पद्मरागः स्फटिकैरलङ्कृतः ? ॥१८॥
किं चन्द्रबिम्बे कलधौतकुद्मलः ?, किं राजते रोचिषि तापनीयकम् ।
वक्त्रं सुकेश्याः दशनाधरेण, विभ्राजते चा[१२]ऽरुणगौरकान्तिः ॥१९॥ युग्गम् ॥
शुचिप्रवाले मधुरत्वमाश्रेयत्,[१३] सिता यदा विद्रुमरागधारिणी ।
*तदाऽनुमीयेत सुलोचनाया, औपम्यमेतन्मधुराऽधरस्य ॥२०॥*
अनन्तपानीयजुषोऽपि वारिधेः, पयः प्रपीतं हि प्रयाति चान्तम् ।
रसत्सुबालाऽधरसम्भृतो य, उपैति सोऽन्तं न कदापि काले ॥२१॥
लावण्यमास्ते लवणेषु नूनं, यत्रेव व्यक्तिस्तत[१४] एव जातिः ।
तद्व्याकृतं तद्विपरीतवर्ति, दंतच्छदे यल्लवणत्वमात्तम्[१५] ॥२२॥
विनिर्मिते मन्मथभूधवस्य, भ्रुवौ तदीये धनुषी नु[१६] रम्ये ।
कटाक्षबाणावलिलक्ष्यपातने, न वन्ध्यशून्ये विधिना[१८] शितिच्छवी ॥२३॥
अलीकभूषाकरणं[१७] किमस्याः, वक्त्रं सदाऽलीकविवर्जितं च ।
दोषाकरार्थस्पृहयालु[१९] तत्किं, दोषाकरं[२०] वर्जयते नितान्तम् ॥२४॥

---

११. पञ्च इषवः यस्य सः इति पञ्चेषुः, सः एव हंसः इति पञ्चेषुहंसः तस्य । १२. 'च' इव अर्थे । १३. प्राण्यङ्गत्वादेकवद्भावः । १४. सार्वविभक्तिकः इति सप्तम्यर्थः । १५. लावण्यं गृहीतम् । १६. उत्प्रेक्षते । १७. अलीकं ललाटं, तस्य भूषाकरणं शोभाकरणम् । १८. अलीकं मिथ्या । १९. दोषाकरः चन्द्रस्तस्याऽर्थस्तमोनाशनं अमृतक्षरणमाल्हादनादिस्तस्य स्पृहयालु । २०. दोषाणाम् आकरः खनी, तं वर्जयते ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अपाङ्गसञ्चारविलोलचारुणी, विकोशितेन्दीवरपीवरद्युती ।
विलाससंस्मेरभृती तदम्बके[२१], सरेजतुर्मोहनमन्त्रभाजी[२२] ॥२५॥
कर्णोत्पलत्वेन व्रजन्ति तस्या, अपाङ्गसंवीक्षणभृत्कटाक्षाः ।
या काप्यभिख्या नयनश्रियोऽस्याः, तां सर्ववेदी प्रविवेद नो वयम् ॥२६॥
अरालकेश्याः[२३] खलु केशपाशाः, मनोभवस्येव हि चन्द्रहासः ।
जगत्त्रयस्येव जयाय कल्पितो, नित्यं विकोशीकृत एव राजते ॥२७॥
यस्याः मुखेन्दावुदिते नितान्तं, ध्वान्तं पलायावसतिं चकार ।
तस्याः सुकेश्याः खलु कुन्तलाल्यां, यतो भयं[२४] तत्र हि तच्छरण्यम् ॥२८॥
त्रिकस्थितो[२५] मञ्जुलकेशहस्तः, संशोभते स्निग्धच्छविः सुकृष्णः ।
तस्याः नितम्बस्थलसन्निधान, रक्षाकृते यः किमु नागराजः ? ॥२९॥
मालतीकुसुमगुम्फितो बभावञ्जनप्रकरकेशपक्षकः ।
यामुने खलु जले हि निविष्टः, फेनपुञ्ज इव हारशेखरः[२६] ॥३०॥ [रथोद्धता]
कर्णौ किमस्याः स्मरजालिपाशौ, प्रकल्पितावंससमाश्लिषन्तौ ।
नो चेत् कथं लोचनपक्षिसार्थस्तत्रैव बध्येत तदीयद्रष्टुः ॥३१॥ [उपजातिः]
वीणा-पीका-वेणुकलप्रणादाः, जिग्ये यया मञ्जुलनिस्वनेन ।
अतो हि कण्ठः किमजायताऽस्याः, रेखात्रयालङ्कृतकम्बुशोभी ॥३२॥
परस्परं मत्सरिणौ यदीयौ, पीनोन्नतौ शेखरसुन्दराकृती ।
स्तनौ च[२७] मीनध्वजकुम्भिकुम्भौ, विरेजतुः कुङ्कुमरागरङ्गितौ ॥३३॥
पुरन्दरो दारितवान्नगानां[२८], पक्षान् यदाऽसौ गिरिराजद्वन्द्वम् ।
नष्टं भयात् तद् हृदये मृगाक्ष्याश्चकार वासं स्तनवेषधारि ॥३४॥

---

२१. अम्बके नेत्रे । २२. मोहनमन्त्रं भेजते इत्येवं शीले मोहनमन्त्रभाजी, द्विवचनम् । २३. कुटिलकेश्याः । २४. भूमौ स्खलितपादानामित्यादि । २५. त्रिकं वंशाधःस्थानम् । २६. हरशेखरा गङ्गा, तस्याः अयं हारशेखरः, तस्यायमित्यण् । २७. 'च' इवार्थे । २८. नगाः पर्वताः तेषां नगानाम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गिरिस्वभावात् कठिनं त्वतस्तत्, वेषान्तरत्वात् मृदु बाह्यवृत्त्या ।
ह्रिया हि तत् श्याममुखं तथाऽपि, जघान चेतांसि जनस्य रागिणः ॥३५॥
अघाटि धात्रा यदियं घनस्तनी, तत्कामितस्थान[२९]मिदं नु मन्ये ।
वक्षोजशैलोपरि यज्जनानां, भृगुप्रपातं ददते मनांसि[३०] ॥३६॥
अन्तर्दधौ यद् वयसि प्रबाल्ये, कुचद्वयं चञ्चलपद्मनेत्रा ।
समागते कामनृपे च[३१] तद्बहिः, सङ्कर्ष्यते यौवनकिङ्करेण ॥३७॥
नितम्बवक्षोजभरं विनिर्ममे[३२], विधिस्तदाऽयं खलु दानलम्पटः ।
मध्यस्य[३३] निर्माणविधौ हि तस्या, अतीवजातः कृपणो नु मन्ये ॥३८॥
वक्षोजभारादतिसंनताङ्गी, तथा नितम्बादतिसंस्खलन्ती ।
चचाल सा मत्तगजेन्द्रगामिनी, सञ्चारिणी कुन्दलतेव रम्या ॥३९॥
तदीयमङ्गं किल पुष्पधन्विनः, पुरं नु मेने वरधाम[३४]शोभि ।
न चेत् कथं तत्र मनांसि यूनां, वसन्ति नित्यं च सुनिश्चलानि ॥४०॥
यदीय बाहू नितरां बभासतुः, कफोणिविस्तीर्णसुवृत्तकूर्प्परौ[३५] ।
नखप्रभाभूषितपाणिपल्लवौ, शाखे इव श्रीयुतकल्पशाखिनः ॥४१॥
यवालिकाऽलङ्कृतसुप्रकोष्ठौ, रेखायुतौ तौ सुतरां चकासतुः ।
अतो हि विश्वाऽभरणस्य नेमेः, यौ पाणिपीडस्य कृते भविष्यतः ॥४२॥
गम्भीरनाभी नितरां बभाषे, वलित्रयाऽलङ्करणैव तस्याः ।
संक्रीडनार्थं स्मरमानसौकसः, सोपानयुक्ता खलु दीर्घिकेव ॥४३॥
गूढोदरेऽरोचत रोमराजी, कृष्णच्छविस्तामरसानुकारे ।
संलक्ष्यते पङ्कजमध्यसंस्थिता, द्विरेफमालेव[३६] नितान्तरम्या ॥४४॥

---

२९. यत्र लोकाः कमलपूजां तथा क्रकचमोचनं तथा भृगुपातं कुर्वन्ति कामार्थे तद् कामितस्थानम् । ३०. मनांसि भृगुपातं दत्त्वा मग्नानि भवन्ति । ३१. इवार्थे 'च' । ३२. अतिस्थूलत्वात् । ३३. मध्यावतीवकृशमनः कृपणत्वम् । ३४. धाम गृहं तेजः वा । ३५. कफोणिः भुजमध्यं तत्र विस्तीर्णौ पुष्टौ सुवृत्तकूर्परौ, अनेन पुष्टत्वम् । ३६. पङ्कजमध्ये द्विरेफमालायाः बहिर्दर्शनं स्वल्पं स्तोकम् अत एव रोमावल्युपमानम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नितम्बभारं सुतरां बभार सा, यस्योपमानं खलु नास्ति सम्यक् ।
दुर्गं प्रकल्प्येव मनोभवस्तमद्यापि जेतुं जगदिच्छतीदम् ॥४५॥
रम्भे इवाऽस्याः किल सुन्दरोर्वौ, सुवृत्तगौरत्वगुणप्रकृष्टौ ।
विजित्य विश्वं हि मनोभवेन, तौ कीर्तिघाटाविव[३७] संप्रकल्पितौ ॥४६॥
जङ्घाद्वयं यद् ध्रुवमेतदीयं, करं गजस्येव परं जिगाय ।
ततः प्रणश्यैव करीन्द्रपार्श्वे[३८], स्थितश्च तत्राऽप्यंऽघ एव वीक्ष्यते ॥४७॥
हेमारविन्दे इव चारुपादका[३९]वुताऽथवा काञ्चनकूर्मकाकृती ।
किं वा श्रियो वासनिवासपद्मे, पुपोष लक्ष्मीमिति[४०] कम्रतायाः ॥४८॥
विभूषणैर्भूष्यत एष सर्वो, नारीजनो नूनमिति प्रसिद्धिः ।
किं भूषणानां प्रविभूषणाय, विधिर्मृगाक्षीं कृतवानिवैताम् ? ॥४९॥
अकारि धात्रा यदशेषशुभ्रमादाय सा गौरतनुः ततश्च ।
तादृक्ष्यश्वेतत्वमलक्ष्यमाणो, मन्ये वरं[४१] श्यामरुचं स चक्रे ॥५०॥
सुखस्तनारोहकराधरावरास्तथा प्रचक्रे विधिना स्फुटा ध्रुवम् ।
तनूदरं मध्यगतं कृतं न वा, मया न दृष्टं खलु संशयान्वितम् ॥५१॥
बिम्बोष्ठी तुङ्गनाशा कमलनयना कुन्ददन्ता सुकेशी,
सुश्रोणी तुच्छमध्या रुचिरगमना संनता सुस्तनाभ्याम् ।
वामोरुर्निम्ननाभी सुभगजघना सुन्दराङ्गी च बाला,
सा कन्याऽतीवरम्या ननु नरपते नाम राजीमतीति ॥५२॥ [चित्रमाला]
संङ्कर्षणो रुपमुदीर्य तस्या, इति प्रकारं वचनं जजल्प चेत् ।
राजीमती नेमिजिनं वृणीते, योगस्तडित्-तोयदयोस्तदा भवेत् ॥५३॥ [उप०]
इतः समुद्रं विजयं बभाषे हरिस्तथेति[४२] क्रियते जिनस्य ।
पाणिग्रहार्थे हि महो महागुणाः, कदाऽपि नो वृद्धपराङ्मुखाः स्युः ॥५४॥

---

३७. कीर्तिस्तम्भौ इव । ३८. ऐरावणस्य पार्श्वे । ३९. संज्ञायां 'क' प्रत्ययः । ४०. लक्ष्मीं-शोभां पुपोष इव । ४१. वरं धवं नेमिजिनम् । ४२. इतः बलदेवकथना-ऽनन्तरं हरिः तथा तेन प्रकारेण इति वचनं समुद्रं प्रति बभाषे-द्विकर्मकोऽयं वचनत्वात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इतश्च[४३] नेमिं करिकुम्भसंश्रितं, विधाय विष्णुर्यदुसेनया वृतः ।
आतोद्यनिर्घोषरवैर्जगत्त्रयं, संपूरयंस्तोरणमाससाद ॥५५॥

तस्यां नगर्यां च तदाङ्गनानामालोकनाऽर्थं विविधा विचेष्टा ।
बभूवुरासां[४४] सुमनोहराणां सम्भूय मार्गान्तरसंस्थितानाम् ॥५६॥

काचिज्जहौ हारलतां स्तनाभ्यां, काचिच्च सख्यै ददयङ्कपालीम्[४५] ।
काचिन्नितम्बात् स्खलितं दुकूलं, न संजहारेति विलोकलालसा ॥५७॥

कयाचिदेकं नयनं निरञ्जितं, कया च कान्तोऽप्यऽवधीरितो निजः ।
कया स्वबालं प्रविहाय श्वानः[४६], कट्यां दधे चञ्चलनेत्रया तदा ॥५८॥

काचिल्ललाटे वरपत्रवल्लरीं, चक्रेऽथ गण्डे तिलकं नितम्बिनी ।
काचिच्च लीलागमनाऽलसाऽपि, क्षामोदरी शीघ्रगतिं ततान ॥५९॥

काचिद् गवाक्षं नवचन्द्रशोभिनं, वक्त्रेण चक्रे[४७] परमोज्ज्वलेन ।
काचिद् विशालेक्षणतोरणस्त्रजं, बबन्ध हास्यैः कुसुमोत्करं तथा[४८] ॥६०॥

काचिज्जलार्द्रं निजकेशपाशं, स्नेहाद् गलद्बाष्पमिमं न दध्रे ।
काचिन्नखाङ्कं न जुगोप लीलया, विलोकमाना यदुपुङ्गवं जिनम् ॥६१॥

एवं च नेमिः पुरहूतसंयुतो, यावद् गृहं प्राप सदौग्रसेनम् ।
तावत् पशून्वाटकसन्निरुद्धान्, ददर्श कारुण्यनिधिर्भयद्रुतान् ॥६२॥

पप्रच्छ सूतं[४९] किल केन हेतुना, धृता इमे प्राणिगणा अनेकशः ? ।
विवाहकार्ये तव सोऽब्रवीदिदं, विचिन्तयामास ततः स्वचेतसि ॥६३॥

अहो ! दुरन्तो विषयाऽभिलाषस्तथाऽप्यऽहो ! मोहनरेन्द्रचेष्टा ।
अहो ! विरुद्धा खलकर्मणां गतिरहो ! महामूढजनस्वभावः ॥६४॥

---

४३. अस्ति नास्ति वा इति संशयान्वितम् । ४४. आसाम्बभूवुः इत्यर्थः – क्वचिदेवंविधोऽपि प्रयोगो दृष्टः । ४५. उभयप्रतौ 'ददिरंकपालीम्' इत्येवं पाठः, अङ्कपालीं–आलिङ्गनम् । ४६. 'श्व' शब्दादन्यः 'श्वान' शब्दोऽप्यकारान्तोऽस्ति । ४७. प्रतौ 'चक्रिः' इति पाठः । ४८. तथेति पुनरर्थे । ४९. सूतं सारथिम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथाऽप्यऽहो ! वैरिगणः प्रमादः, कष्टं महत्पूर्वभवोपसञ्चितम् ।
अहो ! हि मारो नरमारणोद्यतस्ततो बताऽज्ञानविजृम्भितं च ॥६५॥

अयं हि रागोरगदृष्टिपातस्तथेदृशाऽहो ! महती विडम्बना ।
अहो ! भवः शाश्वतचारकाशे यतो स्थितिर्भूरितराऽशुभायते ॥६६॥

एवं जिनश्चेतसि[५०] चिन्तयन् सन्, ध्यानेन निष्कम्प इवाऽद्रिराजः ।
प्रियंवदा राजसुतां जगाद, वरस्रजं धारय सावधाना ॥६७॥

श्रीनेमिः सखिवरणाय कान्त एष-
स्त्रैलोक्यप्रचिततरावदातकीर्तिः ।
त्वं राजीमति ! वरवैभवाऽसि धन्या,
यस्यास्ते पतिरयमीश्वरोऽधिनाथः ॥६८॥ [प्रहर्षिणी]

त्वं बाले ! विकसितपद्मचम्पकाभा,
कान्तः श्रीहसिततमालमेघवर्णः ।
तद्योगे ननु भविता मिथोऽप्यभिख्या,
श्यामाद्रेः शिरसि यथेव चन्द्रज्योत्स्ना ॥६९॥

आल्यस्मासु चिरकृतं न हापयेथाः, प्रेमाऽनेन प्रियतमेन सम्प्रयुक्ता ।
अद्याऽस्मन्मनसि सुवाञ्छितं प्रजातं, तुष्टस्ते शुभमतिपूजितो जिनेशः ॥७०॥

इत्येवं सखिनिकरे विभाषमाणे, एतस्याः नयनमवाममाचकम्पे ।
तत्कालं मुकुलितनेत्रया तयाऽपि, सख्योघस्तदनु तथा च सम्बभाषे ॥७१॥

निश्रेयसाप प्रनिबर्हणं क्वचित्, संवालयामास रथं स पश्चात् ।
वितीर्य दानं स च वार्षिकं जिनो, दीक्षां ललौ रैवतकाननेऽस्मिन् ॥७२॥ [उप०]

अथ विरह-धनञ्जयाऽऽकुला सा,
बहु विललाप ततो मुमूर्छबाला ।

---

५०. प्रतौ 'जिनेश्चेतसि' इत्येवं पाठः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

घनतरशिशिरोपचारकारै-
रथ खलु तामवबोधयन्ति सख्यः ॥७३॥ [पुष्पिताग्रा]

अतिशयतरमीरिता नताङ्गी, पुनरपि मोहमवाप राजकन्या ।
विदरितमिलितालिवारवाग्भिरपि न विबोधकरं तथाऽपि लेभे ॥७४॥

कुवलयदलकोमलां च बालां, कथमिह मामबलां च रागमुग्धाम् ।
कुलिशकठिननेमिनाथहस्ते, शठतर ! पातयसि स्म पुण्डरीक ! ॥७५॥

इह पिकरटन-प्रमेघनाद-प्लवशिखि-चातककूजितं विश्रुत्य ।
यदि न चयति ते चिरार्द्रभावं, मन इति किं करवाणि ? नेमिनाथ ! ॥७६॥

अपि च कुटज-नीप-कुन्दकाख्याः विकसित पुष्पसमूहजातशोभाः ।
तदनु च पथिकाः गृहेषु जग्मुः, सखि ! न च सुन्दरवल्लभः समेतः ॥७७॥

इयं शिरीषादपि सौकुमारी,
स एव वज्रादतिसङ्कठोरः ।
यदेतयोर्योजनसंविधाने,
तदा विधे ! त्वां न घृणा रुरोध ॥७८॥ [इन्द्रवज्रा]

निपतितं मम मूर्ध्नि यथेदृशं,
सपदि तादृशमाशु पतिष्यति ।
शिरसि चेत् तव कर्मवशाद्विधे !
त्यजसि तां खलु, शीघ्रमहं युताम् ॥७९॥ [द्रुतविलम्बितम्]

विधिरसौ न निषेधतिं कुत्रचित्, नयविदः प्रवदन्ति सुतार्किकाः ।
प्रणयिनं प्रतिषिध्य च मामकं, कथमहो ! अभिधा तव सार्थका ? ॥८०॥

अयि विधे ! किमकारि स वल्लभः, सकलरागवितानविवर्जितः ।
कथमहं न कृता बत तादृशी, सदृशयोगयुतेः सुखसन्ततिः ॥८१॥

पतति दुःखकरो हत दुर्विधिर्बलवतः प्रविहाय वशाजने ।
हिममपि प्रतिषिध्य महाद्रुमान् कमलिनीमबलामभिप्लुष्यति ॥८२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सखि ! पिधेहि विधेर्नयनद्वयं, कमपि कूटघटं प्रविघट्य सः ।
यदि न पश्यति तं प्रियमानये, बहु विलुभ्य गिरेः शिरसः स्वयम् ॥८३॥
अयि ! कठोरकुकर्म्मणि[५२] कर्मठः, परनिकृन्तनमर्मणि कर्मठः[५१] ।
अखिलसौख्यमितद्रुविशोषको, विधिरसौ किल केन विनिर्मितः ? ॥८४॥
निखिलधामवतां धुरि तिष्ठतो, मम प्रियस्य विवाहमपीच्छतः ।
सपदि वारयता भवता त्वया, वद सुराधम ! किं समुपार्जितम् ? ॥८५॥
विधिरसौ परिघः परिकथ्यतां, न पुनरेष जगत्प्रविधायकः ।
हृदि निविश्य प्रियस्य दयाच्छलात्, प्रवलनाय मतिं समकारयत् ॥८६॥
न हि मया तव किञ्चिदुपाहृतं, न च कृता तव मानविखण्डना ।
अथ च कार्यविधिर्न च नाशितः, कथमहं वनिताऽपि विडम्बिता ? ॥८७॥
स्वकृतकर्म न वेत्सि यथा त्वया, निजसुता किमकामि स्मरं स्वयम् ।
प्रणयिनं परकीयमपाहरन् सकलकर्मकरेति न लज्जसे ? ॥८८॥
यदि गतः खलु नेमिजिनेश्वरः, प्रियतमो मयि मोहविवर्जितः ।
तदनु किं सुखमाशु गतं मम, चिरतरं निजधाम विमुच्य च ॥८९॥
मलयमारुत-कोकिल-चन्द्रमःप्रभृतयः प्रतिकुलविधायकाः ।
इह भवन्त्यनुकूलप्रदायिनो, विधिकृतं न हि केन निवार्यते ? ॥९०॥
विधुरयं विधुरं कृतवानलं, यदिदमेव हि तस्य कुलोचितम् ।
कुटिललक्ष्मभृतामशुभायती, मतिरहो ! परसौख्यनिकृन्तिनी ॥९१॥
कुमुदबान्धवएष[५३] उदीरितः, सुनिपुणैरिदमेव च सूनृतम् ।
कुमुदबान्धवतामनुकारयन्, विरहिणी जनदाघकरैः करैः ॥९२॥
इममनाथवधूव्रजमर्दयन्, हिमरुचिर्बहुपापकलङ्कितः ।
अहनि तेन भ्रमन्नभिलज्जते, तदनु रात्रिमुखे चरतीव सः ॥९३॥

---

५१. मर्मठः-ला. । ५२. मितद्रुः समुद्रः । ५३. प्रतौ 'कुमदबान्धव' इति पाठः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अमृतसूः प्रथमं यदि विस्तृतस्त्वमसि किङ्करवर्गमृतप्रसूः ।
विषसहोदरता सफलीकृता, जलधिजन्म मुधा गतमेव ते ॥९४॥

हिमकरं सखि ! हिंसितहिंसकं, खरकरं कथयेति मदीरितम् ।
अयि ! हि किं कुरुषे बहुपातकं, त्वमसि किं मम वल्लभसङ्गतः ? ॥९५॥

सखि ! हरिं प्रतिबोधय मद्गिरा, कथमहो ! उदपादि त्वया विधुः ।
वृजिन[54]व्यूहनिरूहकदर्थितः, प्रथितकृष्णतनुर्भवसीत्यतः ॥९६॥

अपि विधुन्तुदसीति विधुंतुदस्त्वमिह नासि परं तु विधुंतुदः ।
अमुमतीव परासनकारणं शशभृतं विनिगल्य विमुक्तवान् ॥९७॥

त्वमपि किं कुरुषे मयि नेदृशं, जिनवरस्तु वरोऽप्यकरोदिदम् ।
यदि निजोऽपि भजेदतिवैरितां, तदपरस्य परस्य हि का कथा ? ॥९८॥

जाने नेमिः सखि ! शिखरितः, प्राप्त एवाऽस्मदीये,
गेहे स्वप्ने तदनु च मया, लज्जया भाषितोनो ।
व्रीडां यावद् हृदयजनितां, मोक्तुमत्युद्यताऽहं,
क्रूरो दैवः प्रियसुखकरीं, तां प्रमीलां जहार ॥९९॥ [मन्दाक्रान्ता]

राजीमती रात्रिषु नाभसीषु[55],
दीर्घा सुनिश्वासविवर्णिताऽधरा ।
रहस्युपालम्भवचस्तु नेमये,
ध्रुवं बभाषे स्वयमेव केवलम् ॥१००॥ [उपजातिः]

अहं तु जाने नितरां मदीयः, प्राणेश्वरो नैव परस्य कस्य ।
त्वं सर्ववेदी भवसीति नाथ !, कथं न जानासि मदीयचित्तम् ? ॥१०१॥

तव वपुर्मलिनं बहिरेव यत्,
तदखिलं जनताऽवगतं च माम् ।

---

५४. 'व्रजिन' - ला., 'वुजिन'-पा. । ५५. नभसः इमाः नाभस्यः तासु, श्रावणसम्बन्धिनीषु इत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रविजहौ तनुदोषमृते त्वतो,
मनसि मे मलिनं च बहिःस्थितम् ।।१०२।। [द्रुतविलम्बितम्]

जलमुचा जगदार्द्रतं कृतं, घनतरं प्रवितीर्य जलं नवम् ।
न पुनरस्य प्रियस्य ध्रुवं मनस्तिलतुषस्य त्रिभागतयाऽऽर्द्रितम् ।।१०३।।

नवभवेषु स एव मया कृतः, सहचरः प्रविहाय परान् जनान् ।
इह पराभवपात्रमहं कृता, न खलताकरणं प्रिय ! साम्प्रतम् ? ।।१०४।।

अहह नाथ ! गतो यदि तोरणाद्, मृगवधमनुकम्प्य दयान्वितः ।
निजवधूं विरहय्य भवादृशां, न तु कृतं हि त्वया शुभमात्मना ।।१०५।।

वदसि देव ! विचो हि यदीदृशं, नियतिभावविवादवियुक्तकम् ।
ममकृतं त्यजनं नियतिश्रितं, तदपि चारुतरं न भवादृशाम् ।।१०६।।

सखि ! बभूव निरुत्सवमाधवो, विरहदुःखकरो ननु माधवः ।
किमपि भूषणमद्य न रोचते, विरहपावक एष निरोधते ।।१०७।।

अविधवां विधवां कथयन्ति मां, त्वयि सति स्मितलोचन ! यज्जनः ।
दहति गात्रलतां च यथा मम, तव मनो दहति स्म कथं न तत् ? ।।१०८।।

इह हि तेन च सर्वमरोचकं, प्रियतमेन ममाऽद्य विनिर्मितम् ।
बत तथाऽपि हि तत्र रुचिः कथं ?, न खलु वेद्मि चरित्रममुष्य वा ।।१०९।।

विरहपावकदीपितमद्हृदः, सखि ! ननाश न धृष्टतरोऽलसः ।
न च कदाऽपि शमाऽमृतशीतले, स्वहृदि वेशमकारयदाऽशुभे ।।११०।।

न कुचहारमणी न च कुण्डले, वसनकङ्कणकान्तिगणस्रजः ।
अपजहार स एव न तस्करः, सखि ! मुमोष मनो मम तद्भृतम् ।।१११।।

भूषां भज त्यज जिनं च नवं वृणीष्व,
कान्तं वरं हि किमनेन सुनिष्ठुरेण ।
आलीरिताह वरराजसुतेति मुग्धा,
नेमिः श्रृणोति हृदिगः सखि मा प्रजल्प ।।११२।। [वसन्ततिलका]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यो मातरिश्वा शुभरैवताद्रेः,
समागतः प्राणप्रियं विस्पृश्य ।
आश्लिष्यते सोऽपि तया सुमुग्धया,
संयोगजं योगगुणं[५६] विचिन्त्य ॥११३॥ [उपजातिः]

एवं स्मरव्याधिवियोगसङ्कुला, विलप्य कन्या निजगाद चालीः ।
गतो हि नेमिर्ननु नाऽऽगतोऽसौ, भद्रं च भूयात् सखि ! कान्तनेमये ॥११४॥

सख्यस्तदानीमिति सम्बभाषुः, नेमिः स्म सङ्क्रामयते प्रव्रज्याम् ।
राजीमती भर्तृपथाऽभिलाषिणी, वक्तुं तदैवं सततं प्रचक्रमे ॥११५॥

त्वं मित्राशु करोत्करं हिमसमं कुर्यास्त्वमेवं धरे !,
काठिन्यं त्यज मारुत ! त्वमपि च स्वेदप्रणोदी भव ।
त्वं क्रीडाचल ! मार्गसुन्दरतरं दद्याः यतो वल्लभः,
श्रीनेमिर्नवनीतकोमलतनुर्दीक्षां समालिङ्गते ॥११६॥ [शार्दूलविक्रीडितम्]

राजीमती नेमिजिनस्य पार्श्वे,
दीक्षां गृहीत्वा समुपार्ज्य केवलम् ।
तौ दम्पती प्रापतुरव्ययं पदं,
देयात् स नेमिः श्रियमेव मञ्जुलाम् ॥११७॥ [उपजातिः]

---

५६. संयोगजसंयोगं यथा हस्ततरुसंयोगात् कायतरुसंयोगो भवति तथा रैवताद्रिवायुसंयोगात् राजीमती नेमिसंयोगो भवति इति चिन्तयति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## २६ ) नेमिजिनस्तुतिः

ચાર પદ્યની સ્તુતિ અર્થાત્ થોય બપ્પભટ્ટિસૂરિજી કૃત ચતુર્વિંશતિ જિનસ્તુતિની અંતર્ગત નેમિનાથ પ્રભુની સ્તુતિ છે. બપ્પભટ્ટસૂરિજી કૃત એક ચતુર્વિંશતિજિનસ્તુતિ આગમોદય સમિતિ દ્વારા (સં. ૧૯૮૨માં) પ્રસિદ્ધ થઈ છે. પરંતુ, પ્રસ્તુત સ્તુતિ અને પ્રસિદ્ધ સ્તુતિ બન્ને ભિન્ન છે. સરળ સંસ્કૃત ભાષામાં પદાન્ત યમકના આધારે આ સ્તુતિની રચના થઈ છે.

આમરાજાપ્રતિબોધક આચાર્ય બપ્પભટ્ટિસૂરિજીનો જન્મ વિ.સં. ૮૦૦માં દીક્ષા ૮૦૭માં આચાર્યપદવી-૮૧૧માં અને સ્વર્ગવાસ-૮૯૫માં થયા હતા. પૂજ્યશ્રીનું જીવન ચરિત્ર[1] અતિ પ્રસિદ્ધ હોવાથી અહીં સમાવ્યું નથી.

सुकृतसुरविहारं मुक्तिरामोपहारं,
भवभयभयहारं त्यक्तचण्डप्रहारम्[2] ।
प्रणमत सुकुमारं निर्जितोद्दाममारं,
जिनवरमुनिसारं नेमिनाथं कुमारम् ॥ [मालिनी]

प्रहतजडिममुद्रा ज्ञानसम्पत्समुद्राः,
प्रणतजनितभद्रा मोहनिद्रादरिद्रा ।
मदनकरिमृगेन्द्रा भी-मरुत्पन्नगेन्द्रा,
विनतसुरनरेन्द्राः शान्ति-भूत्यै जिनेन्द्राः ॥२॥

निहत[3]कुमतमानं विष्टपैस्स्तूयमानं,
जिनमतमसमानं भव्यपोतायमानम् ।

---

૧. જુઓ - જૈન પરંપરાનો ઈતિહાસ - ભા. ૧, પૃ. ૪૩૪-૪૪૨.
२. प्रतौ 'तिक्तचण्डप्रहारम्' इति पाठः । ३. प्रतौ 'निहित०' इति पाठः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कुगतिबिल-पिधानं सूक्तमुक्तानिधानं,
श्रयत शिवनिधानं विश्वविश्वप्रधानम् ॥३॥

कुवलयनयनायाः पूर्णचन्द्राननायाः,
रूचिजिततपनायाः सिंहसद्वाहनायाः ।
स्मरत सुरनताया नेमिसेवाद्युतायाः,
प्रतिहतदुरिताया अम्बिकादेवितायाः ॥४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# २७) नेमिजिनस्तुतिः

સરળ સંસ્કૃત ભાષામાં રચાયેલી આ સ્તુતિના કર્તા અજ્ઞાત છે. લલિત પદાવલિદ્વારા કર્તાએ સ્વ ભાવના વ્યક્ત કરી છે. ત્રણ-ત્રણ વિશેષણો દ્વારા નેમિનાથ પરમાત્મા, સર્વ જિનેશ્વરો, જિનદર્શન અને અમ્બિકાદેવીની સ્તવના કરી છે.

भुवनमोहनरूपमनोहरं, सकलमङ्गलवल्लिपयोधरम् ।
त्रिभुवनामितकामितदायकं, नमत नेमिजिनं जिननायकम् ॥१॥

[द्रूतविलम्बितम्]

विमलकेवलकेलिविभासुराः, पदसरोजविनम्रसुरासुराः ।
स्मरपराभवभङ्गजिनेश्वराः, जगति जातु ज़यन्तु जिनेश्वराः ॥२॥

बहुलमोहमहाजलतारणं, विपुलपातकजातनिवारणम् ।
जनितमुक्तिपुरीपथदर्शनं, भजत भव्यजना ! जिनदर्शनम् ॥३॥

विकटसङ्कटकोटिविनाशिनी, प्रकटपर्वतरैवतवासिनी ।
जिनमतस्य मतस्य विलम्बिका, मम ददातु सदा सुखमम्बिका ! ॥४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# २८ ) एकादशीस्तुतिः

અજ્ઞાતકર્તૃક આ સ્તુતિ અર્થાત્ થોય એકાદશી પર્વતિથિની છે. સરળ સંસ્કૃતભાષામાં કર્તાએ ભાવમાધુર્ય ભર્યું છે. ચારે ય પદ્ય 'एकादशी' થી શરૂ થયા છે.

एकादशीं यः किल मार्गशीर्षे, कल्याणकप्रौढतिथिं दिदेश ।
कृष्णाय तृष्णाब्धिघटोद्भवाभः, कल्याणवृद्धिं, स तनोतु नेमिः ॥१॥
[इन्द्र०]

एकादशीवासरसन्निबद्धैः, कल्याणकैर्ये जगतीमरक्षन् ।
कल्याणसिद्धिं रचयन्तु ते नस्तीर्थंकराश्चित्तरसातिशुद्ध्या ॥२॥

एकादशीघस्रमहाप्रभावः, संवर्णितो यत्र विवेकरम्यः ।
तमागमं मोहतमोनिरासभास्वत्प्रकाशं विनयेन वन्दे ॥३॥ [उपजाति]

एकादशीदिव्यतपस्समाधौ, या विघ्नजातं भविनां निहन्ति ।
शैवेयदेवाङ्घ्रिसरोजभृङ्गी, सा मेऽम्बिका रातु यशोभिवृद्धिम् ॥४॥
[इन्द्र०]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## २९ ) नेमिजिनस्तुतिः

પ્રાકૃતભાષામાં શાર્દૂલવિક્રીડિત છંદમાં રચાયેલ આ સ્તુતિમાં કર્તાએ સ્વનામોલ્લેખ કર્યો નથી. સરસ્વતીદેવીની પ્રસિદ્ધ સ્તુતિ 'या कुन्देदु० નો પ્રથમ પાદાર્ધ અહીં ચતુર્થ પદ્યમાં ભાષાન્તરે જોવા મળે છે.

मुत्ता जेणि तिणं व सिद्धिरमणीसङ्गिच्छिणा जुव्वणे,
कंदंती करुणं सिणेह विहुरा राईमई कन्नया ।
उज्जिते चडिऊण चारु चरणं नाणं च जो पावीओ,
पत्तो सिद्धिसुखं स होउ सरणं अम्हाण नेमी जिणो ॥१॥ [शार्दूल०]

निच्चंतामरसुंदरीहि सुहओ मेरुम्मि जम्मूसवो,
जेसिं सव्वसुरा किरिंसु हरिसा फुल्लंति 'चित्तंतणं ।
जे निक्कारणबधुणो जयमिमं भावारिनिट्ठावणे,
ते अम्हि भवपारगा भवभयं सुंभंतु तित्थंकरा ॥२॥

जस्सिक्कं पि पयं पयच्छए वरं संपाविउं पाणिणो,
पत्ता पारमणंतसो भवमहासिंधुम्मि भीमे सया ।
सो अम्हं निहणेउ मोहपसरं भावारिनिट्ठावणं,
दिंताऽणेयकुतित्थदंतिदलणो सिद्धंतपंचाणणो ॥३॥

जा कुंदेंदु-तुसार-हारधवला संपुण्णचंदाणणा,
फुल्लिंदीवरसत्थपुत्थयहरा नीसेसनाणब्भवा ।
साणंदं विबुहेहि वंदियकमा हुज्जं म्ह साणुग्गहा,
सा निच्चं सुयदेवया भगवई सन्नाण दाणे रया ॥४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३० ) नेमिनाथस्तवनम्

અજ્ઞાતકર્તૃક પાંચ પદ્યમય આ સ્તવન પણ સરળ ભાષામાં રચાયેલું છે. એક-એક પદના વિશેષણ વાપરવાની પ્રથા રાખેલી છે. ચતુર્થ પદ્યની 'મર્દનશત્રુના પુરુષપત્રના પરાભવને કારણે વિશદશીલનું બખ્તર પ્રભુએ ધારણ કર્યું છે.' આ ઉત્પ્રેક્ષા વિચારણીય લાગે છે.

निजगुरुक्रमपङ्कजयामलं, समुपनम्य लसद्गुणसागरम् ।
पतनुसंसृतिजन्तुनतं सदा, परमनेमिजिनं प्रकवे मुदा ॥१॥ [द्रुत०]
नवघनाघनभूघनदीधितिं, किल फलादनसन्निभशिङ्खिनिम् ।
विकसिताम्बुरुहाम्बकयामलं, नमतनेमिजिनं सुखमन्दिरम् ॥२॥
पटुपराक्रमभासुरतेजसं, भुजमनामयदाशु वृषाकपेः ।
कमलनालमिवोद्धृतसंसृति-क्षितिरुहोस्तु स नेमिजिनः श्रिये ॥३॥
विशदशीलतनुत्रमलं तनौ, परिदधौ मदनाभिधवैरिणः ।
परुषपत्रिपराभवसाध्वसादिव स नेमिजिनः शिवशं क्रियात् ॥४॥
इति हि मयकाऽनावि स्वामी जगत्त्रितयस्य यः,
शुचिकुमुदिनीनाथप्रख्याननः समतानिधिः ।
क्षितिपतियदुश्रेयोवंशाम्बुजन्मविवर्धने,
दिनमणिसमः शैवेयोऽसौ जिनः शुभदायकः ॥५॥ [हरिणी]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३१ ) रैवतगिरिमण्डननेमिनमस्कारस्तोत्रम्

અપભ્રંશ ભાષાના પાંચ વસ્તુ છંદમાં રચાયેલ આ કૃતિ શ્રી ગિરનારની યાત્રા કરીને રચાયેલી છે. પ્રભુના દર્શનના આનંદને, પ્રભુસ્તવનમાં ઢાળ્યો છે. પ્રથમ વસ્તુમાં સહસામ્રવનમાં શ્રીનેમિનાથ પરમાત્માના ત્રણ કલ્યાણક થવાનો ઉલ્લેખ છે. જિનપ્રભસૂરિજી વિરચિત (વિ.સં. ૧૩૮૯) રૈવતગિરિકલ્પમાં પણ એ જ ઉલ્લેખ છે. પરંતુ અન્યત્ર[1] છત્રશિલાના અન્તભાગમાં દીક્ષા, સહસામ્રવનમાં કેવલજ્ઞાન, અને અવલોકનશિખર પર નિર્વાણકલ્યાણકોનો ઉલ્લેખ છે.

ત્રીજા પદ્યમાં વ્યાજસ્તુતિનો પ્રયોગ કર્યો છે–

'धन्नजुव्वण रुवसंपुन्न, राइमई कणि कन्न छंडिअ,

जरइ विरई असईण धुरि, मुत्तिमणिरसमंडिय'

'જેનું યૌવન લસલસતું છે, જે અતિશય રૂપવાન પણ છે, જે પોતાના પર રાગવતી છે તે કન્યાને છોડીને જેમણે (નેમિનાથ પરમાત્માએ) ઘરડી વિરક્ત અને અત્યંત અસતી મુક્તિરમણી સાથે રસ માંડ્યો.'

जिणि निज्जिय जिणि निज्जिय मयण भडवाय,
बालप्पणि परिहरिय रज्ज कज्ज सावज्ज जाणिअ,
पसूअह बंध छोडावि करि दयाधम्मवली चित्ति आणिय ।
उग्गसेन-धूअ रायमइं छंडिय संजमभार,
जिणि आदरीउ सो जयउ उज्जलि गिरि सिणगार ॥१॥ [वस्तु]
सयलतीरथ सयलतीरथ मज्झि सिणगार,
सिरिरेवइं गिरिमंडणउ मुत्तिरमणि-रसरंग-विद्धउ,
कज्जलजलदसमाणतणु मोहपासजिणिदूरिकिद्धउ ।

---

૧. ધર્મઘોષસૂરિવિરચિત રૈવતગિરિકલ્પ, અજ્ઞાતકર્તૃક રૈવતગિરિકલ્પ આદિ.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जिणिसहसंबवणम्मि कियकल्लाणत्रयसार,
भविअह भवभयाउपहरइं सामीनेमिकुमार ॥२॥

धन्नजुव्वण धन्नजुव्वण रुवसंपन्न,
रायमई रायमई रायमई जे कणि कन्न छंडिअ,
जरइ विरई असईण धुरि मुत्तिरमणि रसरंगमंडिय ।
उज्जलि उज्जलि गिरि चडीअ सामीनेमिकुमार,
समुद्दविजयसुअ जे नमइं धन धन ते नरनारि ॥३॥

माणमयगल माणमयगल दप्पमाहप्प,
उज्जूरण पडवजस मयणमाण केसरि किसोरह,
भवभयवारण नेमिजिण दलिअकम्मपब्भारघोरह ।
मरगय-कज्जल-जलयतणु मोहमल्लपडिमल्ल,
जे नर वंदइ भावधुरि ते न भमइं भुवि भुल्ल ॥४॥

जेण भुअबलि जेण भुअबलि हरिअ हरिमाण,
खिल्लंतइं बालपणि जेणि चक्क अंगुलि भमाडिय,
धणुह चडावीय हरितणउ गदा जेणि गयणि रमाडिय ।
संख जि पूरिउ बलि करीअ चमकिउ चित्ति हरीस,
सिरिगिरिनारिइं जत्र करि बंदउं ते जगदीस ॥५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ३२ ) नेमिजिनकल्याणकतिथिस्तोत्रम्

અજ્ઞાતકર્તૃક પંચસ્તવી અંતર્ગત આ સ્તોત્રના નામ પરથી જ તેનો પરિચય મળી જાય છે. આ સ્તવ ઉપરાંતના શ્રી આદિનાથ, શાંતિનાથ, પાર્શ્વનાથ અને મહાવીરસ્વામી પરમાત્માના કલ્યાણક તિથિ સ્તોત્ર પરિશિષ્ટમાં આપેલ છે. શ્રી મહાવીરસ્વામી પરમાત્માના સ્તોત્રના અન્ત્ય પદ્યમાં ચ્યવન વગેરે ૧૫ પદાર્થનું પ્રગટન કરનારા સ્તોત્રથી સ્તવના કરવાનો ઉલ્લેખ છે.

निबिडपडिबंधबंधुरबंधव ! राइमइचाइ दुललियं[१] ।
जायवकुलनहियल[२]सरयससिहरं नमह नेमिजिणं ॥१॥ [आर्या]

कत्तिय किन्हाए बारसीए अवराइयाउ अवयरणं ।
सोरियपुरम्मि नेमिस्स, वंछियत्थं पयच्छउ मो ॥२॥

कन्नोवगए ससंके सावणसिय पंचमी य घणवन्नो ।
जम्मम्मि न्हविज्जंतो नेमी निन्नासउ भवोहं ॥३॥

सावण सिय छट्ठीए, छट्ठेण सहस्स-भूयइ-समेओ ।
गहियवओ उज्जिते नेमि धन्नेहिं पणिवइओ ॥४॥

अछिय चउपन्नदिणे छउमत्थोऽमावसाइ आसोए ।
उज्जितपव्वए पत्तकेवलो जयउ नेमिजिणो ॥५॥

वास सहस्सं एगं, सव्वाउं पालिऊण उज्जिंते ।
सिद्धं आसढसिय अट्ठमीए नेमी सया वंदे ॥६॥

---

१. दुर्ललित (देश्य) हेवाकी । २. '०नहियल०'-नभस्तल० इत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ३३ ) नेमिनाथस्तवनम्

મધુર પદાવલી યુક્ત આ સ્તવનની સાથે સમાન રચના પદ્ધતિ યુક્ત સુપાર્શ્વનાથ પરમાત્માનું સ્તવન પણ એ જ પ્રતમાં છે. બન્ને સ્તોત્રોમાં છન્દ-ભાષા-વિશેષણમયતા વગેરે સર્વ સમાન હોવાની સાથે બન્ને સ્તોત્રોના અંતિમ પદ્યમાં 'विजय' શબ્દોલ્લેખ છે. જેનાથી કર્તાનું નામ સૂચન થયું હોઈ શકે.

સમાનકર્તૃક હોવાથી સુપાર્શ્વનાથ સ્તવન પરિશિષ્ટમાં આપ્યું છે.

विमलकेलकेलिपरायणं, शमरमाऽपरिभङ्गनरायणम् ।
नवभवागतभोगनिरञ्जनं, नमत नेमिजिनं जनरञ्जनम् ॥ [द्रुतवि०]

चतुरलोकचकोरनिशाकरं, हरिकुलाम्बरदीप्तिदिवाकरम् ।
मदनमत्तमतङ्गजगञ्जनं, नमत नेमिजिनं जनरञ्जनम् ॥२॥

भविकमानसवाससितच्छदं, विशदकोकनदाऽऽभरदच्छदम् ।
विकटमोहमहाभटभञ्जनं, नमत नेमिजिनं जनरञ्जनम् ॥३॥

नतजनाऽमितकामितकारणं, स्मरमहातरुवारणवारणम् ।
नयनमञ्जिमतर्जितखञ्जनं, नमत नेमिजिनं जनरञ्जनम् ॥४॥

स्वपदपावित[प]र्वतरैवतं, नरसुरासुरनायकसेवितम् ।
स्वतनुभानुवरीभवदञ्जनं, नमत नेमिजिनं जनरञ्जनम् ॥५॥

इति नुतिं गमितः शमिनायकः, सकलमञ्जुलमङ्गदायकः ।
सृजतु नेमिजिनो मम सर्वतो, **विजय**मेव सदा सुखकारणम् ॥६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३४) नेमिनमस्कारस्तोत्रम्

પંચજિન નમસ્કાર અંતર્ગત આ સ્તોત્ર નાનું હોવા છતાં સુચારુ ભાવાભિવ્યક્તિથી યુક્ત છે.

પ્રભુના દર્શનની પ્રાપ્તિને સુંદર ત્રણ ઉપમાઓ પ્રથમ શ્લોકમાં આપી છે. દ્વિતીય પદ્યમાં પ્રભુના સૌભાગ્ય વગેરેની અસીમતા દર્શાવી છે. અન્ત્ય પદ્યના ભાવમાં કવિ સ્વને ધન્યાતિધન્ય માને છે.

બાકીના જિન ચતુષ્કના સ્તોત્રો પણ માત્ર ૫-૫ પદ્યમાં હોવા છતાં ભાવાર્દ્ર છે. તેમાં–

●> આદિનાથ નમસ્કાર સ્તોત્રમાં–પ્રભુના દર્શનથી મનોરથ પૂર્તિની તથા જન્માદિ સાફલ્યની અભિવ્યક્તિ છે. (પદ્ય-૧-૨), ત્રીજા પદ્યમાં પ્રાતઃકાલે કરેલા પ્રભુ નમસ્કાર દ્વારા મોહરાજા પર વિજય સરળ બની જવાનું વર્ણવ્યું છે.

●> શાંતિનાથ નમસ્કારમાં તૃતીયપદ્યમાં પ્રભુપદ કમલમાં શ્રીનો વાસ દર્શાવ્યો છે. તે શ્રીને 'भुवनानन्दविधात्री' વિશેષણ આપીને શ્રીનું સાફલ્ય પ્રભુ ચરણોમાં દર્શાવ્યું છે. શાંતિનાથ પ્રભુને પરમદાની, પરમજ્ઞાની, પરમમુનિ, પરમસ્વામી, પરમ ગુરુ, પરમદેવ વર્ણવ્યા છે. (પદ્ય-૪, ૫)

●> 'अभिनवमङ्गलमालाकरणं'ના સુંદર વિશેષણથી આરંભિત પાર્શ્વનાથ નમસ્કાર સ્તોત્રમાં પ્રભુનામના જાપનો પ્રભાવ (પદ્ય-૨) વર્ણવ્યા બાદ પ્રભુના શાસન પાસે વિવેકતેજની યાચના કરે છે. અન્યત્ર જ્ઞાનને તેજનું રૂપક અપાયું હોય છે. અહીં જ્ઞાનના ફળ સ્વરૂપ વિવેકને તેજનું રૂપક આપ્યું છે. પદ્ય ૪થું ભાવાર્દ્ર એટલા માટે છે કે પરમેશ્વરના દર્શન કરનાર પોતે પોતાના અવયવોને કહે છે. કે 'ચરણો ! તમે ઉતાવળ કરો, હે જિહ્વા ! તું સ્તોત્ર કર, હે મસ્તક ! તું નમન કર, હે દૃષ્ટિ ! તું હર્ષાશ્રુઓ વહાવ, કારણ કે પરમેશ્વર તમારી સન્મુખ છે.'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

●> ઉક્ત પદ્ય જેવું જ ભાવભીનું પદ્ય કવિશ્રીએ મહાવીર નમસ્કાર સ્તોત્રમાં પ્રયોજ્યું છે.-

'मनः प्रमोदेन नृत्य, वपुः ! रोमाञ्चैः उल्लस, नेत्रे ! चिराद् उन्मीलतं, ननु वीरवरः अग्रतः ।' (પદ્ય-૩)

શ્રીવીરપ્રભુને અજન્મદાયી પીતા, અવિરોધી બાન્ધવ, અદ્રોહિ મિત્ર કહ્યા છે. (પદ્ય-૪) અહીં 'अजन्मदायिने पित्रे' માં વિરોધાલંકાર છે. અન્ય બે વિશેષણોમાં પુનરુક્તવદ આભાસ છે...

નેમિનાથ પરમાત્મા સિવાયના ચાર જિન નમસ્કાર સ્તોત્ર પરિશિષ્ટમાં આપ્યા છે.

परमान्नं क्षुधार्त्तेन, तृषितेन भृशं[1] रसः ।
दरिद्रेण निधानं वा, मयाप्तं नेमिदर्शनम् ॥१॥ [अनुष्टुभ्]
निःसीमसौभाग्यमसीमकान्ति, निःसीमलावण्यमसीमशान्तिम् ।
निःसीमकारूण्यमसीमरूपं, नेमीश्वरं रैवतके नमामि ॥२॥ [इन्द्रवज्रा]
आलोकने जिनेन्द्रस्य, दिनेन्द्रस्येव रैवते ।
तमोमयी निशा नष्टा, जातं सुदिनमद्य मे ॥३॥ [अनुष्टुभ्]
कुलेषु यादवकुलं, श्लाघ्यं मेरुरिवाद्रिषु ।
नेमिः कल्पद्रुमः पुंसां, यत्राऽऽस्ते सर्वकामदः ॥४॥
यद्येकवारं जिननायकं यः, ननाम नेमिं शिरसा स धन्यः ।
मुहुर्मुहुस्तं प्रणमन् विशेषादहं कथं धन्यतमो न गम्यः ? ॥५॥ [उपेन्द्र०]

---

१. प्रतौ 'भृतं' इति पाठः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ३५ ) नेमिनाथस्तवनम्

હંસચંદ્રજીના શિષ્ય 'मण्डन' (મુનિ કે ગૃહસ્થ) દ્વારા આ કૃતિ વિ.સં. ૧૬૩૫ વૈશાખ સુદ-૧૫ના દિવસે રચાઈ છે.

૬ પદ્યમાં ઢાળેલું આ સ્તવન અત્યંત સરળ સંસ્કૃત ભાષામાં છે. કવિશ્રીએ રચનામાં કેટલીક ભાષાકીય શિથિલતાઓ સ્વીકારી છે. સાથે, અન્ત્ય પદ્ય મંદાક્રાન્તામાં યતિ જાળવી નથી. આ વસ્તુસ્થિતિ પરથી એવું અનુમાન થાય કે કવિશ્રી સંસ્કૃતભાષાના પ્રાથમિક અભ્યાસુ હશે ત્યારે આ કૃતિની રચના કરી હશે.

તેઓશ્રીની અન્યકૃતિ 'शत्रुञ्जयमण्डनआदिनाथस्तवन' છે. જે ઉક્ત સ્તવનની સાથે એ જ હસ્તપ્રતમાં છે. ૬ પદ્યમય આ સ્તવન પણ ભાષા વગેરે દૃષ્ટિએ નેમિનાથ સ્તવનની સમાન જ છે. આ સ્તવન પરિશિષ્ટમાં આપેલું છે.

जयोग्रादिजम्बालिनीनाथपुत्रं,
शमज्ञं पराभूतदैत्यारिपुत्रम् ।
विभक्त्यादियुक्त्या हितार्थप्रवादं,
जगत्तारकं नौमि धौतप्रमादम् ॥१॥ [भुजङ्गप्रयातम्]

कृताराधनं देववृन्दैश्च धीरं, महानन्ददं प्राप्तसंसारतीरम् ।
शरच्चन्द्रसौम्यं जिताम्भोदनादं, जगत्तारकं नौमि धौतप्रमादम् ॥२॥

सहर्षालिसन्दोहजीमूतभासं, विलोभं विमानं कृतक्रोधनाशम् ।
सुरक्ताङ्कवाल्हीकमाञ्जिष्टपादं, जगत्तारकं नौमि धौतप्रमादम् ॥३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनन्तेन्दु[१]कोदण्डगात्रप्रमाणं, कजाङ्कं कजास्यं कजाऽऽनं सुवर्णम् ।
अनिद्रं जिनेन्द्रं मनोज्ञाङ्गभादं, जगत्तारकं नौमि धौतप्रमादम् ॥४॥

निरीहं विशोकं गुणैराजमानं, गतानेकरागाद्यरिं दत्तदानम् ।
सुधाहारकुम्भोपमं चाविषादं, जगत्तारकं नौमि धौतप्रमादम् ॥५॥

इत्थं श्रीनेमिजिनवरदुष्टाष्टदोषैर्विमुक्तः,
धात्रीशैरर्च्चितपद-सरोजो दयायुक्तदेहः ।
भक्त्यारो[५]पाग्नि[३]रस[६]-विधु[१]वर्षे स्तुतो विष्टपेन,
सम्पूर्णेन्दौ विशदमधुमासे मया **मण्डनेन** ॥६॥

---

१. अनन्तेन्दुः इति – १० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३६ ) नेमिनाथस्तोत्रम्

આ સ્તોત્ર 'પંચજિનસ્તોત્ર' અંતર્ગત છે. માત્ર ત્રણ-ત્રણ પદ્યના આ પંચ સ્તવનો અલંકારસભર રચના છે.

આદિનાથ પ્રભુનું સ્તોત્ર પદાન્ત માલા યમકમય છે. શાંતિનાથ પ્રભુના સ્તોત્રમાં સુંદર લય અને અનુપ્રાસો છે. જેવા કે—त्वरा निजाः प्रजाव्रजा रुजा विवर्जिताः कृताः (१), किर्तिनर्तकीवनर्तिता (२), યમક પણ પ્રયોજ્યા છે—'तमाचिरेयमाचिरेयमीश्वरम्' (३) 'भवे भवेस्त्वमेव' (३) નેમિનાથ પ્રભુના સ્તોત્રોમાં પ્રથમ પદ્ય 'राजी'નો પદાન્ત યમક છે. દ્વિતીય પદ્યના પૂર્વાધમાં 'रत्न'નો ઉતરાર્ધમાં 'देव'નો યમક છે. તૃતીય પદ્ય 'न-म' દ્વિ-અક્ષરમય છે. પાર્શ્વનાથ પ્રભુના સ્તોત્રમાં 'अरा'નો અનુપ્રાસ સંપૂર્ણતયા ફેલાઈ ગયો છે. મહાવીરસ્વામીના સ્તોત્રમાં નવગ્રહના નામથી પરમાત્માની સ્તુતિ થઈ છે.

પાંચેય સ્તોત્રોમાં પદ્ધડિકા, પંચચામર, પ્રમાણિકા, શાલિની, માલિની, ઉપજાતિ વગેરે છંદો પ્રયોજાયા છે. નાના સ્તોત્રમાં ભરેલી આટલી છંદો વૈવિધ્યતા કર્તાની વિદ્વત્તાનું ઉદ્દ્ગાન કરે છે.

નેમિનાથ પ્રભુના સ્તોત્ર સિવાય બાકીના ચારેય સ્તોત્રના અંતે 'ધર્મશીલ' શબ્દ પ્રયોગ છે. જે કર્તાનું નામ સૂચન કરે છે. આ ચારેય સ્તોત્ર પરિશિષ્ટમાં સમાવ્યા છે.

जिगाय यः प्राज्यतरः स्मराजीं, तत्याज तूर्णं रमणीं च राजीम् ।
राजेव योगीन्द्रगणे व्यराजीद्देयात्स नेमिर्बहु सौख्यराजीः ॥१॥ [उपजातिः]

निजकुलकुलरत्नं वाञ्छितार्थद्युरत्नं,
तमसि गगनरत्नं चित्कलारात्रिरत्नम् ।
नमितसकलदेवः क्रोधदावैक देवः,
प्रभवतु समुदेवः सन्ततं नेमिदेवः ॥२॥ [मालिनी]

मानं मानं मानिनीमानमिन्नं, मीनं नानै नोमनोनेन नूनं ।
नामं नामं नेमिनामानमेनं, नो नोमीनं नामनामामनामि ॥३॥ [शालिनी]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ૩૭ ) नेमिनाथस्तुतिः

પંચજિનસ્તુતિ અંતર્ગત આ સ્તુતિ જે હસ્તપ્રતમાં છે તેમાં શ્રીઆદિનાથ, શાંતિનાથ અને નેમિનાથ પરમાત્માની સ્તુતિ પછી પ્રત અપૂર્ણ છે. પરંતુ विपुलमङ्गमङ्गल૦થી પાર્શ્વનાથ સ્તુતિ શરૂ થાય છે. પાછળના પત્રમાં એ સ્તુતિ અને મહાવીરસ્વામી સ્તુતિ પણ હશે જ. તેના અંતે કદાચ કર્તાના નામનો ઉલ્લેખ હોય, અહીં પ્રાપ્ત ત્રણેય સ્તોત્રમાં કર્તાના નામનો ઉલ્લેખ નથી.

પ્રાસાદિક સંસ્કૃત ભાષાના ૩-૩ પદ્યમાં રચાયેલ આ લઘુ સ્તોત્રોને કવિશ્રીએ કાવ્યકલાથી અલંકૃત કર્યા છે. આદિનાથ સ્તોત્રમાં પરમાત્માને अनन्त (=વિષ્ણુ), नाभिभूत (=બ્રહ્મા) सद्वृषश्रीविषालं (=શિવ) વગેરે વિશેષણોનો શ્લેષ પ્રયોજીને અન્ય દેવોના નામ દ્વારા પરમાત્માની સ્તુતિ કરી છે. શાન્તિનાથ પરમાત્માને અપૂર્વચન્દ્ર દર્શાવ્યા છે. જ્યારે નેમિનાથ પરમાત્માની સ્તુતિમાં પ્રથમ બન્ને પદ્યમાં દરેક વિશેષણો રાજીમતી અને ગિરનારગિરિની ભૂમિના શ્લેષમાં પ્રયોજીને 'मुक्ता श्रिता च' પદદ્વારા વિરોધાભાસ ઉત્પન્ન કર્યો છે. તૃતીય પદ્યમાં 'पङ्कजा', 'नेमये' અને 'काम' પદોનો યમક પ્રયોજ્યો છે.

આદિનાથ તથા શાન્તિનાથ પ્રભુના સ્તોત્ર પરિશિષ્ટમાં આપ્યા છે.

रम्भारामा रुचिरतिलका चारुजातिसुवंस्या,
स्निग्धच्छाया वरतर-लसन्मेखलाऽशोकपूर्णा ।
भूमीभृद्भूर्मदनगहना येन मुक्ता श्रिता च,
स श्रीनेमिर्जयति जिनपोऽपूर्वसौभाग्यभाग् यः ॥१॥ [मन्दाक्रान्ता]
एतां श्यामां सकूटां श्रितजलनिवहां सेव्यमानां भुजङ्गै-
र्मातङ्गैः पूरिताशां बहुलधवपरां स्थूलताभृत् कुनाभिम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वामिन् भूभृन्महेलां श्रयसि कथमथो नेक्षते दोषमद्धी-
त्येतां रागार्त्तभोज्यागिरमवगणयन् नेमिनाथः श्रियेऽस्तु ॥२॥ [स्रग्धरा]

आबालब्रह्मचारिन् ! सुगतिपथरथ ! च्छिन्नमोहप्ररोह !,
शङ्खाङ्क ! श्रीशिवादेव्युदरवरसरःपङ्कजाऽपङ्कजात ! ।
कामं कामाग्निवारे ! यदुकुलति[ल]क ! श्यामलाङ्गाऽपवर्ग-
गामिन् ! स्वामिन् ! नमस्ते दुरिततितलतानेमये नेमयेऽस्मै ॥३॥ [स्रग्धरा]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ३८ ) क्रियागुप्तनेमिजिनस्तोत्रम्

અજ્ઞાતકર્તૃક ચતુર્વિંશતિ જિનસ્તોત્ર અન્તર્ગત આ સ્તોત્રમાં ક્રિયાપદ ગુપ્ત રાખ્યા છે. ચોવીશ જિનના ૫-૫ અનુષ્ટુભ્માં રચાયેલા સ્તોત્રમાંથી આદિનાથ, અભિનંદન સ્વામી, સુમતિનાથ, મલ્લિનાથ, મુનિસુવ્રતસ્વામી, પાર્શ્વનાથ અને મહાવીરસ્વામી આ પરમાત્માના સ્તોત્રો યમકાલંકારમંડિત છે. બાકીના સર્વસ્તોત્રો ભાવાર્દ્રતાથી ભરેલા છે જેમાં સુંદર ભાષા અને ઉદાત્ત ભાવનાઓનો સમન્વય દૃષ્ટિગોચર થાય છે. આ સ્તોત્રો કલિકાલ સર્વજ્ઞ શ્રીહેમચંદ્રસૂરિજીવિરચિત વિતરાગસ્તોત્રનું સાદૃશ્ય દર્શાવે છે.

જો કે વીતરાગ સ્તોત્રના અનુશરણરૂપ રચના નથી પરંતુ, તેના જેવા મૌલિક અને મંજુલ પદ્યોની ગુંથણી અહીં રહેલી છે.

नेमिनाथ ! त्वया विश्वं, निमज्जद् भवसागरे ।
अनाथं दुःखितं मत्वा, विज्ञातरूप ! विभुना ॥१॥

प्रभो ! मदतमोमायालोभ-कोप-भयोज्झितः ।
मम त्राणाय मोहरेरुदासीनस्त्वमन्वहम् ॥२॥

दृढानामपि निर्मूलोन्मूलनं कर्मशाखिनाम् ।
लीलया कृतकन्दर्पदर्पनाश ! जवाद् भवान् ॥३॥

त्वयि यस्तनुते भक्तिं, शस्वद्देही शमाऽऽलय ।
भवभीतिहर ! त्रातः स्वस्य शस्यसुखं विभो ! ॥४॥

ना तमोहंससारश्रीदायकं जिननायकम् ।
दुर्गतिं त्वामरं नत्वाऽमदं नाऽशमवर्जित ॥५॥[१]

---

१. अत्र प्रथमश्लोके 'आवि', द्वितीये 'न असि', तृतीय 'अकृत', चतुर्थे 'देहि', पञ्चमे 'न ससार' इति गुप्तानि क्रियापदानि यथामति शोधितानि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३९ ) श्रीनेमिसमस्यास्तोत्रम्
## ४० ) महाकाव्यसप्तकपादपूर्तिरुपा नेमिनाथस्तुतिः

આ બન્ને સ્તોત્રો પાદપૂર્તિરૂપ છે. પાદપૂર્તિ એક સુંદર કાવ્યપ્રકાર છે. જેનો વિકાસ જૈનકવિઓએ ખૂબ કર્યો છે. અજૈન સાહિત્યમાં આ પ્રકાર ખૂબ અલ્પ પ્રચલિત કે અપ્રચલિતપ્રાયઃ છે. પાદપૂર્તિ એ વિશિષ્ટ પ્રતિભા, અસાધારણ કવિત્વશક્તિ, ભાષાપ્રભુત્વ અને નવીન અર્થોદ્-ભાવનશક્તિ વગેરેના સુયોગે રચાય છે. અન્યકર્તાની પદાવલિઓને પોતાના ભાવ, અર્થ અને અનુપ્રાસાદિ સાથે સુમેળ કરીને ગોઠવવું એક કપરું કાર્ય છે. આ દિશાનું સૌથી પ્રાચીન પગલું દીગંબરીય જિનસેનાચાર્ય (પ્રથમ,–૯મી સદી) વિરચિત પાર્શ્વાભ્યુદય કાવ્ય છે. જે મેઘદૂતની પાદપૂર્તિરૂપ છે. અજૈનોના પ્રસિદ્ધ મહાકાવ્યો તેમજ જૈનકૃતિઓમાં પ્રસિદ્ધ સ્તુતિસ્તોત્રો પરનું પાદપૂર્તિ સાહિત્ય ૧૫થી ૧૭મી સદીમાં ખૂબ રચાયું છે.

અહીં પાદપૂર્તિ કાવ્યની પ્રસ્તુત બે કૃતિઓમાંથી પ્રથમ કૃતિ જ્ઞાનપંચમી પર્વની 'श्रीनेमि०'થી શરૂ થતી પ્રસિદ્ધ સ્તુતિની પાદપૂર્તિરૂપ છે. અહીં પ્રૌઢભાષામાં ઉક્ત સ્તુતિના સર્વ (=૧૬) ચરણોની પાદપૂર્તિ કરી ૧૮ પદ્યનું સ્તોત્ર બનાવ્યું છે.

આ સ્તોત્રની રચના વિ.સં. ૧૭૩૭ ફાગણ વદ-૯, શુક્રવાના દિવસે થઈ છે. જેના કર્તા રામચંદ્ર ગણિ છે. તેઓ તપાગચ્છીય વિજયપ્રભસૂરિજી (૧૬૭૭-૧૭૪૯) > મુક્તિચંદ્રજી > ઉપાધ્યાય ભીમચંદ્રજીના શિષ્ય છે.

પ્રસ્તુત કૃતિની વિશેષતા એ છે કે કવિશ્રીએ પ્રશસ્તિના બે પદ્યો શાર્દૂલ૦ છંદને બદલે સ્રગ્ધરા છંદમાં પણ આપ્યા છે. અર્થાત્ ૧૭ અને ૧૮ એ પદ્ય બે વાર આપ્યા છે. તથા પ્રતિલેખક પણ કવિવર પોતે જ છે.

દ્વિતીય પાદપૂર્તિ સ્તોત્ર પ્રસિદ્ધ-૭ મહાકાવ્યો-મેઘદૂત, રઘુવંશ,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

કુમારસંભવ, ઋતુસંહાર, કિરાતાર્જુનીયમ્, નૈષધીય અને માઘ આમાંથી પ્રત્યેકના પ્રથમ પદ્યના પ્રથમ ચરણની પાદપૂર્તિ કરીને શ્રીનેમિનાથ-પ્રભુની સ્તુતિ કરી છે.

પ્રસ્તુત સ્તુતિના કર્તા મુનિ રાજસિંહજી છે. નાગપૂરીય લોકાગચ્છમાં ઋષિ ભોજરાજ > ઋષિ લઘુરાજના શિષ્ય રાજસિંહજી (૧૯મી સદી) થયા છે. જેઓ ખૂબ વિદ્વાન હતા પ્રાયઃ પ્રસ્તુત કૃતિના કર્તા એ આ રાજસિંહજી જ હોવા જોઈએ.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३९ ) श्रीनेमिसमस्यास्तोत्रम्

स्वस्तिश्रीकीर्त्तिकान्तिप्रगुणगुणचयोच्चुम्बिचिद्धर्मकर्म-
प्रारम्भोत्कर्षहर्षाऽधिगतजिनमतप्राप्ततत्वप्रतिष्ठाः ।
इष्टाऽनुष्ठानशिष्टव्रतशतपरिचर्याऽर्य ! शं नो ददातु,
श्रीनेमिः पञ्चरूपत्रिदशपतिकृतप्राज्यजन्माभिषेकः ॥१॥ [स्रग्धरा]

सिद्धिस्त्रीदक्षवक्षोप्रविलुठदशठस्पष्टसुष्ठुद्विबाहु-
र्व्याहूतक्षान्ति-शान्तिस्त्रिदशपतिनतांह्रिद्वयश्चिन्मयो नः ।
मोक्षाऽक्षामक्षमोच्चैः पदमुदयदयं प्रादिशत्वेष नेमि-
श्चञ्चत्पञ्चाक्षमत्तद्विरदमदभिदापञ्चवक्त्रोपमानः ॥२॥

ऐश्वर्यस्वैर्यपर्या यतिकलितकला कोटिराटीकतेऽस्मिन्,
विश्वे शस्वद् विपश्चिद् वरगुरुवदना ऽ । ऽ सा यदीया ।
अस्माकं विस्मयाऽर्हं वितरतु चतुरं चिंच्च राजीमतीशो,
निर्मुक्तः पञ्चदेह्याः परमसुखमयः प्रास्तकर्मप्रपञ्चः ॥३॥

आरूढः प्रोढधर्मद्विरदमपगतत्राशपाशप्रयाशः(सः),
क्रोधान्धध्वान्ततान्तिप्रमथनदिनकृद्दीप्रदीप्तिप्रतापः ।
निन्द्यं भिन्दस्तमोन्तःप्रसृतमपि नृणां शङ्खलक्ष्मा जिनेन्द्रः,
कल्याणं पञ्चमीसत्ततपसि वितनुतां पञ्चमज्ञानवान् वः ॥४॥

सद्वंशप्रांशुशुंभत्सदुदयसुरवर्त्मोहुतप्रोज्झिताऽहो,
रंहो राहुप्रसङ्गोऽक्षरदतुलयशोराशिशोभाभिरामः ।
अक्षीणक्षान्तिज्योत्स्नाधवलितभुवनो ज्ञानकामैकबन्धुः,
सम्प्रीणन् सच्चकोरान् शिवतिलकसमः कौशिकानन्दिमूर्तिः ॥५॥

हिंसावैयुक्तयोषिद्हृदयकुवलयाऽऽतापदो व्यापदोघम्,
प्राश्यन् सन् सम्मुखीनः शमरसशशभृद्वाक्सुधाधारिवक्त्रः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सच्चेतःकैरवालीवलयविकसनोद्दामधामा सुभाढ्यः,
पुण्याब्धिप्रीतिदायी सितरुचिरिव यः स्वीयगोभिस्तमांसि ॥६॥
जीवाहिंसाप्रशंसाशुचिपथगतिभृद्रोहिणीप्राणनाथः,
कारुण्यानन्ददायी प्रवरबुधसुतो वन्द्यलोकावतारः ।
कैवल्योल्लासि-लीला-जलनिधितनयाबान्धवोऽमित्रमित्रं,
सान्द्राणि ध्वंसमानः सकलकुवलयोल्लासमुच्चैश्चकार ॥७॥
दुष्कर्मध्वंसतारानिकरपरिवृतोऽत्यन्तचन्द्रत्वमैतः,
संसारसारपाटच्चरपटुगतिहन् मोदयन्नङ्गभाजः ।
सद्वक्त्रकेन्द्रसंस्थः किमपि तनुभृतां ध्वन्सयन् निःस्वयोगं,
ज्ञानं पुष्पाज्जिनौघः स तपसि भविनां पञ्चमीवासरस्य ॥८॥ [चतुर्भिः०]
मोहद्रोहप्ररोहप्रलयविधिपराऽपारसंसारमाला-
हालाहेलानुसङ्गप्रदलनकुशलं दुर्ल्लभं दुष्कृतीभिः ।
आस्वाद्याऽवद्यमाद्यद्गिरिगरिम-रणद्वज्रसङ्घातपातं,
पीत्वा नानाविधार्थामृतरसमसमं यान्ति यास्यन्ति जग्मुः ॥९॥
जीवाजीवादितत्वव्यतिकरबहुलान्तर्द्विषद्वर्गचञ्चत्,
सम्पर्कोदर्कदावप्रचयसुदहनाऽनल्पदावाग्निकल्पात् ।
सम्यक्त्वानन्दिचक्षुःक्षपितखलतमस्तोमसोमानुकारा-
जीवा यस्मादनेके विधिवदऽमरतां प्राज्यनिर्वाणपुर्याम् ॥१०॥
आदेय-ध्येयं-पेय-प्रचुरतरवरोदारसम्बन्धवीचि-
व्याकीर्णं जीर्णनिम्नं किमपि शुचितरं प्रोल्लसन्तं च सन्तम् ।
नाना षष्टाऽष्टमादिप्रगुणतरतपोजातिसोपानमार्गं,
यात्वा देवाधिदेवाऽऽगमद-शमसुधाकुण्डमानन्दहेतुः ॥११॥
श्रीमच्छ्रीवीतरागाऽमलचलनसरोजद्वयाशक्तचेतो-
वृत्तीनां सन्मतीनां मुनिवरनिवहैरादृतेऽर्हन्मुखोत्थे ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गच्छाऽतुच्छाधिनाथैरधिगतमतुलं सन्मतं सत्कृतान्तं,
तत्पञ्चम्यास्तपस्युद्यतविशदधियां भाविनामस्तु नित्यम् ॥१२॥ [चतुर्भिः०]

ओमर्हं श्रीमती श्रीजिनगुणकलितं मन्त्रराजं स्मरन्ती,
देवी देवासुरालीसुविनतपदनालीकयुग्माऽम्बिकाख्या ।
प्राज्यां राज्यश्रियं नो दिशतु शिवतरां धुर्यसाम्राज्यकाम्यां,
स्वर्णालङ्कारवल्गन्मणिकिरणगणध्वस्तनित्यान्धकारम् ॥१३॥

उग्रोग्रोद्घाटिताऽस्त्रप्रसृमरभयदार्च्चिःशिखाभिश्च दुष्टान्,
साक्रोसं संशयन्ती बहुदनुजगणान्खड्गमुद्दिम्यसम्यक् ।
श्रीसंघस्याऽनघस्य क्षपयतु दुरितं देवता सा सुनाशा,
हुङ्काराखदूरीकृतसुकृतिजनव्रातविघ्नप्रचारा ॥१४॥

चन्द्रांशुशंशुदन्तद्युतिमिलितमुखाऽभिख्यया ख्यातशोभा,
भासाऽऽशा भासयन्ती दश निजवपुषोऽनङ्गरामा प्रियस्य ।
आर्यं साहाय्य शौर्यं रचयतु भवतां जैनधर्मे सुलभ्ये,
देवी श्रीअम्बिकाख्या जिनवरचरणाम्भोजभृङ्गीसमाना ॥१५॥

आर्हद्धर्माऽर्हभावोद्भवगलदखिलांऽहस्समूहासमूह-
व्याश्लेषाऽऽश्लिष्टचेता विदलित सुकृतोत्तर्ज्जिगर्ज्जत्परेता ।
दोषा दोषानसङ्ख्यान्प्रमुदितवदना भापयन्ती च यान्ती,
पञ्चम्यहन्यस्तपोऽर्थं वितरतु कुशलं धीमतां सावधना ॥१६॥ [चतु०]

इत्थं शैवेयतीर्थाधिपतिरतिलसच्चिच्चमत्कारधारा-
पारावारोपमोऽसावुदधिगतसदानन्दलक्ष्मीसनाथः ।
*प्राज्ञश्री**मुक्तिचन्द्रो**त्तमपटसरसीजन्मभृङ्गानुरूपाः ।*
श्रीमच्छ्री**भीमचन्द्रा** इति बुधसुभगा भूरि सौन्दर्यवर्याः ॥१७॥

तच्छिष्येण प्रशस्तस्तवपथगतिना **रामचन्द्रेण** नाम्ना,
सप्त-त्र्यत्यष्टिवर्षे सितहरिदिवसे फाल्गुने मासि शुक्रे ।

पद्यैः प्रोद्यत्स्फुटार्थै[रनघ]समुधुरैस्सत्समस्याभिधानै-
रानीतः स्तोत्रवर्त्माऽनुदिवसमतुलश्रेयसे स्तात् सदा वः ॥१८॥

• • •

इत्थं तीर्थपतिर्नतामलयती राजीमतीवल्लभः,
सूरिश्री**विजयप्रभो**त्करचिदानन्दप्रदानोचितः ।
अंहोव्यूह-हृति-प्रवीण-विलसच्छ्री**मुक्तिचन्द्रो**ज्ज्वल-
श्लोको दुष्कृतवैरि-धर्मसुहृदोऽसद्**भीमचन्द्रः** स्फुटः ॥१७॥ [शार्दूल०]
पृथ्वीभृत्[७]त्रि[३]मुनी[७]न्दु[१]संमित समुत् संवत्सरे फाल्गुने,
मासे कृष्णसदिष्टकृष्णदिवसे शुक्रेञ्चिते पावने ।
आनीतः स्तुतिमार्गमुद्भुतवचःपद्यैः समस्याभिधैस्-
स्ताद् वः सन्ततशमर्णे बहुमुदा **चन्द्रेण रामा**दिना ॥१८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ४० ) महाकाव्यसप्तकपादपूर्तिरुपा नेमिनाथस्तुतिः

कश्चित्कान्ताऽविरह ! गुरुणाऽस्वाधिकारप्रमत् ! त ![१],
स्तोता पारं सदृगपि तवेयाद् गुणाब्धेर्जनोत्र ।
प्रान्त्योदन्वत्समधिकतरस्येति तुष्टाव मोदात्-
सुत्रामाऽयं दिशतु स शिवं श्रीशिवानन्दनो वः ॥१॥ [मन्द्राक्रान्ता]

वागर्थाऽविवसंपृक्तौ[२]र्यस्य सज्ञानशालिनः ।
श्रुता महोदयावाप्त्यै नूनं नेमिः श्रिये स वः ॥२॥ [अनुष्टुभ्]

अस्त्युत्तर ! स्यां दिशि देव ! तात्मा-
द्यसारमं[३]ह्यब्जयुगे यथात्र ।

---

१. ● कश्चित्कान्ता - कः जनः, चित् - प्रज्ञा ज्ञानं, तस्याः तस्य वा कान्तः, तत्सम्बोधने हे चित्कान्त ! ।

● आविरह - रलयोः ऐक्यात् आविल-हृ । आविलं कलुषं हन्ति इति आविलहः, तत्सम्बोधने हे आविलह ! ।

● गुरुणा - जिनेन ।

● अस्वाधिकार - अस्वा - न विद्यते स्वं-धनं येषां ते अश्वाः-निर्धनाः, तेषां आधयः-मानसिकव्यथाः, ताः एव काः - वह्नयः, तेषां आ-सन्तापः, तस्य रः-जलं इव, अस्वाधिकारः, तत्सम्बोधने अस्वाऽऽधिकाऽऽर ! ।

● प्रमत् ! - प्रकर्षेण मथ्नाति मिथ्यात्वादिप्रत्यर्थिनः इति प्रमथ्, तत्सम्बोधने-हे प्रमत् ! ।

● त ! - ता - लक्ष्मीः, ज्ञानलक्ष्मी इति यावत्, अस्ति अस्य इति तः, तत्सम्बोधने - हे त ! ।

२. वागर्थाविवसम्पृक्तौ -

● वाग्-वाणी, अर्थाऽविवसम्पृक्ता - अर्थतो अविवा विवादरहिता, तेन सम्पृक्ता-मिलिता, ऊः रक्षार्थको अव्ययः, अर्थात् रक्षति ।

३. उत्तर ! हे श्रेष्ठ !, स्यां-भवेयम्, दिशि-दिशति सोऽयं इति दिक्, तस्मिन् दिशि, हे देव ! तात्माद्यसारं - ता-लक्ष्मीः, आत्मा - देहः, तदादिवस्तुनि तात्मादि, तद् एव असारं तात्माद्यसारम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुष्पन्धयीभूतशिरास्त्वदीये
तथा विधेयं विबुधार्च्यनेमे ! ॥३॥ [उपजातिः]

विशेषसुर्यः स्पृहणीयचन्द्रमाः[४],
सितं यशःपुञ्जमिवाधितप्रभुः ।
अलं पदोः कम्बु स एव मादृशे,
पदं शिवाजो वितरीतुमव्ययम् ॥४॥ [इन्द्रवंशा]

श्रियः करूणामधिपस्य पालिर्नी[५]
गराडथालीं त्वकदंह्रिसेविनाम् ।
करोमि विज्ञप्तिमिमां कृताञ्जलिः
प्रसीद नेमे ! वितराऽक्षरं पदम् ॥५॥

निपीय यस्य क्षितिरक्षिणः कथा,
प्रसङ्गकल्पा भवभोगिभिः श्रियः ।
उपद्रुतानां भविकाद्रुतं गिरो,
ययुः सुधाशित्वमथंसनः स्यतु ॥६॥

श्रियः पतिः श्रीमति शाशितुं जगत्त्रयस्यहेतुः किल रैवताचले ।
अनश्वरं मुक्तिमहन्महद्यकः, सिषेध नेमिः स ददातु वः शुभम् ॥७॥

इति स्तुतः श्रीमुनि**राजसिंह**-
प्रसत्तितो यो रघुणा सुकाव्यैः ।
प्रसद्यं सद्यो मयि सेवके प्रभु-
र्ददातुनेमिः स हि दीर्घदर्शिताम् ॥८॥ [उपजातिः]

---

४. विशे (विश् पु. ४/१) मनुजाय, षं-शं सुखं, तद् सूते इति षसुः यः, स्पृहणीया चन्द्रः इव मा यस्य सः इति स्पृहणीयचन्द्रमा । अथवा - स्पृहणीयौ चन्द्रौ-कर्पूरचन्द्रौ, तद्वद् माः यस्य सः इति स्पृहनीयचन्द्रमा ।

५. अतः परं प्रतौ अस्पष्टत्वाद् अपठनीयम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ૪૧ ) विविधछन्दोनामगर्भं नेमिजिनस्तोत्रम्

અજ્ઞાતકર્તૃક ૨૮ પદ્યમય આ સ્તોત્ર પ્રૌઢ સંસ્કૃત ભાષામાં રચાયું છે. સ્તોત્રના નામ પરથી જ તેની વિશિષ્ટતા પ્રગટ થાય છે. કુટિલ (૧૪ અક્ષરમય) છંદથી શરૂ કરીને વેગવતી (૨૬ અક્ષરમય) છંદ સુધીના વિવિધ છંદોનામને પદ્યની અંદર જ ગૂંથી લીધા છે. ક્યારેક એક છંદના અનેક નામો પ્રચલિત હોય તો તે છંદના બેકે વધુ નામો પણ પદ્યમાં ગૂંથ્યા છે. (જુઓ-પદ્ય-૩) માત્ર યતિભેદે છંદોનામ બદલાતા હોય તો તેવા છંદોના ૪ જેટલા નામ પણ એક પદ્યમાં સમાવ્યા છે. (જુઓ-પદ્ય-૧૦) પદ્ય-૨૧ પછી તો ચરણદીઠ સમાનાક્ષરીય કે અસમાનાક્ષરીય પણ વિવિધ છંદો અને તેના નામો કવિશ્રીએ પ્રયોજ્યા છે. આમ આ કૃતિ વિશિષ્ટ છંદોનન્દન જન્માવે છે. છંદરસિકો માટે આ એક અભ્યસનીય કૃતિ બની રહી છે.

અહીં છંદની સાથે અલંકારો અને ભાવોની અભિવ્યક્તિ પણ સુચારુ થઈ છે. કેટલાક ઉદાહરણ જોઈએ–

કવિશ્રી પ્રભુની વિરાગતાને અભિનવ ગણે છે. તે ગણવા પાછળની ઉત્પ્રેક્ષા છે કે 'ધૃતિ-મતિ-કીર્તિ-નિર્વૃત્તિ વગેરે વધૂઓને એક સાથે પરણવા માટે (તેઓની) રજ જેવી રાજીમતીનો પ્રભુએ ત્યાગ કર્યો.' (પદ્ય-૪) અહીં 'विभो ! तव विरागिता अभिनवा !' દ્વારા વ્યાજસ્તુતિના આશ્રયે પ્રભુ સંસ્તવના થઈ છે.

વિરોધાભાસ, શ્લેષ, વ્યાજસ્તુતિ વગેરે અલંકારોનું સંમિશ્રણ એક જ પદ્યમાં કર્યું છે–

'प्रभो ! मध्यस्थोऽपि क्षिपसि बहूधा कर्मयोगा-
नभव्यानां सिद्धिं जनयसि न मैत्रीं श्रितोऽपि ।
तथा कन्यात्यागेप्यनुभवसि यत्प्रोच्यभावं,
बुधत्वं तन्नव्यं तव शिव ! जयाऽऽनन्ददायिन् !' ॥१२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'પ્રભુ ! મધ્યસ્થ હોવા છતાં આપ કર્મયોગને છેદો છો. પરમ મિત્ર હોવા છતાં અભવ્યોની સિદ્ધિ આપ કરી આપતા નથી, કન્યા (રાશી)માં બુધ (ગ્રહ) ઉચ્ચતા પામે છે. પરંતુ, પ્રભુ ! આપ કન્યાનો ત્યાગ કરીને પણ ઉચ્ચતાને ધારણ કરો છો. આથી આપનું બુધત્વ નવ્ય છે.'અહીં પ્રથમ બે પાદમાં વિરોધાભાસ ત્યારબાદ कन्या અને बुधत्व શબ્દોમાં શ્લેષ અને સમગ્રપદ્ય વ્યાજસ્તુતિસ્વરૂપ છે.

'પ્રભો ! આપના વદનકમલમાં મારા નયનો ભ્રમરરૂપ બને' આ વિનંતિને વદનકમલના મનોરમ રૂપક દ્વારા વર્ણવી છે. (૧૩)

'वाणिनीव वाणी' કહીને પદ્યના પ્રત્યેક વિશેષણોની શ્લેષરચના દ્વારા પ્રભુની વાણીને સ્ત્રીનું અદ્ભુત રૂપક આપ્યું છે. (૧૪)

વિરોધાલંકારની ચમત્કારી પ્રસ્તુતિ-

सदादोषोच्छेदिन् हिमशिखरिणीह त्वत्मुतः,
समं सच्चक्रैर्यन्मदयसितमां कौशिककुलम् ।
समं पद्मोल्लासैः कुवलयविबोधं च कुरुषे,
चमत्कारं स्फारं जनयसि न केषां मनसि तत् ॥१७॥

અહીં જેમ શ્લેષમય પદાવલી સંરચના છે તેવી જ શ્લેષપદાવલીઓ દ્વારા પરમાત્માને કૃષ્ણની સમાનતા સુંદર રીતે દર્શાવી છે અને સાથે પ્રભુને મનરૂપી સમુદ્રમાં વસવા માટેની વિનંતિ કરી છે–

'नयन्नसमविस्मयं स्वचरितेन पृथ्वीजनं,
क्षमोद्धणधीर ! हे नरकभेदन ! त्वं जिन !
प्रमोदलहरीभृते मम मनोर्णवे ब्रह्मणा-
ऽन्वितो निरूपमश्रिया वसतमामनन्तेन च' ॥१८॥

કૃષ્ણની સમાનતા દર્શાવીને અનન્તર પદ્યમાં જ વિરોધાલંકારના આશ્રયે કૃષ્ણ હોવા છતાં પ્રભુમાં તેના અશુભપક્ષનું નિરશન કર્યું છે.

ईश ! त्वं शुचिशङ्ख-सुचक्र-चापभागपि गदान्वितो नो, पुरुषोत्तमतां

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रयन्नपि त्वं अजनार्दनः च, छलवर्ज्यपि पुरा अश्नुषे त्रिपाद्या त्रिभुवनं, (अतः) तत्र त्वयि मम अतिशायिनी भक्तिः भवतु ॥१९॥

અમિતતેજોમય પરમાત્માની સિંહગર્જનાની સુંદર ઉત્પ્રેક્ષા કવિશ્રીએ કરી છે–'ભવ્યજીવોના મનોવનમાં મોહગજની ગર્જના મિથ્યાત્વનો ઘુર્ઘુરારવ અને કામદેવરૂપી સાંઢની ત્રાડો ત્યાં સુધી જ સંભવી શકે છે અને મદમૃગનું ભ્રમણ પણ ત્યાં સુધી જ છે કે જ્યાં સુધી પ્રભુએ સિંહગર્જના નથી કરી !' (૨૪)

આમ, પ્રસ્તુત સ્તોત્રમાં વિશિષ્ટ છંદોરચનાની સાથે અલંકારની આકર્ષક ગૂંથણી પણ થઈ છે. જે કવિપ્રતિભાની ઉચ્ચતા દર્શાવે છે.

श्रीशैवेयं विनयविनतमर्त्याऽमर्त्या-
धीशश्रेणीविरचितपदपूजं भक्त्या ।
छन्दोभेदैः प्रकटितनिजनामन्यासैः
स्तोष्ये तार्क्ष्यं **कुटिल**मदनसर्पापास्त्यै ॥१॥

भुजलीलया तुलितकृष्णशङ्खस्वनैः,
समितारिराट् समरभानु**पथ्या** च ते ।
सुभटी च दृग् त्वरितमुग्रसेनाग्रतो,
यदमोचयन्मृगवराहमुख्यान् विभो ! ॥२॥

**सिंहोद्धता**ऽहि-गज-भूत-भयोज्झितस्य,
श्रीरैवतक्षितिभृतक्षितिमालभागे ।
भव्याङ्गिमानसवनी नवसम्मदाऽऽम्र-
वल्ली**वसंततिलका**ऽनुकृतिं दधासि ॥३॥

**धृति**-मति-कीर्त्ति-निर्वृत्ति-वधूः प्रणया-
दसमशुखाय मङ्क्षु परिणेतुमनाः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्यजसि यदि स्म रेणुमित राज[जि]मतीं,
तदिह विरागिता तव विभोऽभिनवा ।।४।।

उद्दामपञ्चमतरङ्गितगीतिभिर्विभो !,
चङ्गाङ्गहार-करणाद्भूतनर्त्तनैरपि ।
वीणा-**मृदङ्ग**-पटहादिरवैरनीह ते,
तूर्यत्रयं प्रमुदितास्त्रिदशा अदीदृशन् ।।५।।

**ऋषभ**स्त्वया जिन ! जितः स मतङ्गजोऽपि,
गमनैः शुभैर्गुरु गभीरिमतः समुद्रः ।
निजधैर्यतः सुरगिरिश्च यदीदृशं नो,
तदमी कथं क्रमतले कलयन्ति सेवाम् ।।६।।

नखकिरणजलोर्मी **मालिनी**श ! त्वदीये,
चरणसरसि शश्वद् राजहंसैर्निषेव्ये ।
सकमल-तिमिचक्रे स्नानमातन्वतः श्राग्,
मम भवतु भवाध्व[१]भ्रान्तिखेदापनोदः ।।७।।

विष्टपाऽद्भूतसमस्तगुणोत्कर**सुन्दरं**,
तावकीनवदनं जिननाथ ! समानताम् ।
यातु केन विधिना सतताऽविधृतश्रिया,
पङ्कजेन शशिना च समं जलजन्मना ।।८।।

वीतव्रीडाः **कामक्रीडाः** खिङ्गापीडाः स्त्रीप्रेष्याः,
प्रास्तत्राण-प्राणिप्राण-क्षोदामोदिस्वान्ता ये ।
देवाः सेवाहेवाकित्वं तन्वानैस्तेप्यज्ञानै
र्मन्यन्ते सर्वज्ञ ! स्वामिन् ! निर्दोषं त्वां हित्वा हा ! ।।९।।

---

१. 'भवाब्धि०' - को. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**स्रग**समसुमवसुविजितशशिकला-
ऽप्यपहृतमदमतिरिव तव यशसा ।
जिनवर ! रुचिजित**मणिगुणनिकर** !,
त्यजति सपदि विकसनमतिविरसा ॥१०॥

त्व**मंचलधृति**रसि यदि जिन ! कथमिव,
तदधिकतररुचिरसि शिववरपुरि ।
समिति सततकृततततरतिरसि यदि,
किमिव तदुपशमरसमयमतिरसि ॥११॥

प्रभो ! मध्यस्थोऽपि क्षिपसि बहुधा कर्मयोगा-
नभव्यानां सिद्धिं जनयसि न मैत्रीं श्रितोऽपि ।
तथा कन्यात्यागेऽप्यनुभवसि यत्प्रोच्चभावं,
बुधत्वं तन्नव्यं तव शिव ! **जयाऽऽनन्द**दायिन् ! ॥१२॥

रमाऽऽस्पदे जिताऽमरापगातरङ्गचङ्गभा
**प्रपञ्चचामरा**वलीमरालमण्डलीश्रिते ।
विलोचने लसद्दले[२] रदांशुकेसरेऽलितां-
प्रभो ! प्रयातु ते मुखाम्बुजे मदीक्षणद्वयम् ॥१३॥

ललितपदा सुलक्षणगुणा सुवर्णकान्ति-
र्मृदुमधुरोक्तियुक्तिसुभगा सुवृत्तरम्या ।
विलसदलङ्क्रिया रुचिरविग्रहा न केषां,
हरति मनांसि नाथ ! तव **वाणिनी**व वाणी ॥१४॥

सद्दानाम्भोमिलदलिकुलभ्राजमानेभमाला,
**मन्दाक्रान्ता**ऽर्णवनिवसन-स्यन्दनश्रेणिरम्या ।

---

२. 'विलोचनोल्यसद्दले' - अ. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नाथ ! न्याय्या सरय-हययुग्वीर्यवत्यत्तियुक्ता,
यद् राज्यश्रीर्भवति भविनां स त्वदंह्रिप्रसादः ॥१५॥

युवतिविरतोऽप्युच्चैर्मोदप्रदो **हरिणी**दृशां-
निखिलविषयग्रामच्छेदोत्सुकोऽपि जगत्सुहृत् ।
क्षितिभृति सदाचारोऽप्यत्र स्थिरत्वमितः प्रभो !,
वद मृदुतया युक्तोऽप्याप्तः क्षमाधरतां कथम् ॥१६॥

सदा दोषोच्छेदिन् हिम**शिखरिणी**ह त्वमुदितः,
समं सच्चक्रैर्यन्मदयसितमां कौशिककुलम् ।
समं पद्मोल्लासैः कुवलयविबोधं च कुरुषे,
चमत्कारं स्फारं जनयसि न केषां मनसि तत् ॥१७॥

नयन्नसमविस्मयं स्वचरितेन **पृथ्वी**जनं,
क्षमोद्धरणधीर ! हे नरकभेदन[3] ! त्वं जिन ! ।
प्रमोदलहरीभृते मम मनोऽर्णवे ब्रह्मणा-
ऽन्वितो निरुपमश्रिया वसतमामनन्तेन च ॥१८॥

शुचि-शङ्ख-सुचक्रचापभागपि गदाऽन्वितो नो,
पुरुषोत्तमतां श्रयन्नपि त्वमजनार्दनश्च ।
छलवर्ज्यपि यः पराऽश्नुषे त्रिभुवनं त्रिपाद्या,[4]
त्वयि तत्र मम**ाऽतिशायिनी** भवतु भक्तिरीश ! ॥१९॥

शारचन्द्रमः समयशस्ततिधवलित ! सद्-
यादव**वंशपत्रपतितं** चपलजलरुहः ।
प्रोज्झ्य चलं पयोलवमिव क्षितिपपदसुखं,
नित्यमशिश्रियः शिवसुखं त्वमिन ! शमधन[5] ! ॥२०॥

---

३. '०भेदिन' - को. । ४. 'त्रिपद्या' - को. । ५. '०धर' - को. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अवितथ**वादिनस्तव न कोकिलकण्ठरूचा-
मसमतमसां[६] दूरीभूता प्राप्यते **पद्म**नेत्र ! ।
निःपुण्यैर्यै दृगिव विशदा वाग् **हारिणी** तेऽघधी-
**भाराक्रान्ता** ध्रुवमपथगाः[७] पतन्ति भवावटे ॥२१॥

शुचितरचमरै**र्निशा**धीश्वराभीशु[८]भङ्गप्रदै-
स्त्रिदिवयुवतिभिर्लसत्प्रीतिभिर्वीजितः स्वःपतिः ।
प्रणतसुरशतः पुरः प्रस्फुरन्नृत्यसङ्गीतकः
समनुभवति यत्सुखौघं प्रभो ! तत् तवाऽऽज्ञाफलम् ॥२२॥

रामाः कामास्त्रं **कुसुमितलता चित्रलेखा**मरन्दो-
न्माद्यद्भृङ्गा लसदसमसुधा**श्चन्द्रलेखा** त्विषश्च-
चित्तं हर्तुं नलिनवनभुवोऽप्युत्**केसर**श्रीभरा
नासन्नीशा जिन ! तव शिवकृच्छमामृतनि**श्चलम्** ॥२३॥

तावन्मोहगजेन गर्जितमथो मिथ्यात्वदुःप्रोथिना,
स्वैरं घुर्घुरितं मनोभवमहाशण्डेन च त्राट्कृतम् ।
भव्यप्राणिमनोवने मदमृगैर्भ्रान्तं च यावत्त्वया,
स्वामिन् ! नाऽमिततेजसा प्रकटितं **शार्दूलविक्रीडितम्** ॥२४॥

परिस्फुर्जत्तूर्यध्वनिभिरभित**च्छाया**ऽनुमेयाऽचिर-
प्रभारोचिर्भारैः श्रितघनरसै**र्मेघविस्फूर्जिता**नि ।
वितन्वानैः स्वामिन्नमरवरभैरैर्देशनाभूमि**शोभा**-
शैलस्त्वं सेवितोऽस्ताऽन्यमत-**सुवदना**ऽम्भोजन्मरुचिभिः ॥२५॥

त्वदुदित**सिद्धि**शर्मपरमाऽमृतपानमनाजनावली,
हृदयनिबद्धवसन्तविकाशिरसालसद्**वनमञ्जरी** ।

---

६. '०तमसं' - अ. । ७. '०पथगा' - को. । ८. '०भीश०' - को.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

षट्पदमालिकेव कलय**त्यमद्र**कलिकां कदर्कतरुजां,
किं जिनराज ! कदाचन वैषयिकाऽशुचि-सौख्यभवां **मदिराम्** ॥२६॥

आनन्दवशंवद दैवतताडितदुन्दुभि-मर्दल-**शङ्ख**-रवं,
नवलवणिमभृद्द्युयुवति**ललिता**ऽभिनयजनितजनचित्रम् ।
ध्वनिमधुरिमधृतविविधसविधभाग्मेकचकिसारस**हंस-लयं**,
समवसृति क्षितितलमिनसे**वेगवति** हि तव यदनुपमरुचा ॥२७॥

यः श्रीमन्नेमिनाथं मदनमदभिदं छन्दसां व्यक्तभक्त्यु-
ल्लासो भेदैर्विचित्रैर्नमदमरमिति स्तौति शस्तप्रसूत्यै ।
प्रेमस्थेमाशुशर्मस्मितसुमवरण**स्रग्धरा**साक्षरश्री-
स्तं प्रक्षीणाऽघसङ्गं वरि[1]तुमभिसरत्यात्मविद्यालयस्थम् ॥२८॥

१. 'विर०' - को. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ૪૨ ) नेमिनाथस्तवनम्

સરળ સંસ્કૃતભાષાબદ્ધ આ સ્તવનમાં પણ પૂર્વોક્ત સ્તોત્રની જેમ વિશિષ્ટ છંદોભાવન રહેલું છે. પ્રાયઃ અપભ્રંશ અને ગુર્જરભાષામાં પ્રયોજાતા રાસ, અઢીયા, ત્રિપદી, હરિગીત વગેરે માત્રામેળ છંદો અહીં સંસ્કૃતભાષામાં પ્રયોજયા છે, સંસ્કૃતમાં આવો પ્રયોગ અભિનવપ્રાયઃ છે.

સરળ યમકનો પ્રયોગ અને પદલવણિમા એ સ્તવનને આકર્ષક બનાવ્યું છે. તો સાથે, કવિશ્રીએ કેટલીક ભાષાકીય શિથિલતાઓનો સ્વીકાર કર્યો છે.

આ સ્તોત્રના કર્તા તરીકે પ્રતની પુષ્પિકામાં 'अमरहर्षगणिशिष्येण कृतं' એવો ઉલ્લેખ છે. જ્યારે સ્તવનાન્તે કર્તા તરીકે વિજયદાનસૂરિના શિષ્ય 'અમરહર્ષજી'નો ઉલ્લેખ છે. આનંદવિમલસૂરિજીના શિષ્ય વિજયદાનસૂરિજી (૧૫૫૩-૧૬૨૨)ને દીક્ષા દાનહર્ષજીએ આપેલી હતી. તેમનું દીક્ષા નામ ઉદયધર્મ હતું ઉદયધર્મજીને આચાર્યપદવી સમયે દાનહર્ષજીનું નામ રહે તે માટે 'વિજયદાનસૂરિ' નામકરણ કરવામાં આવ્યું હતું. બની શકે કે દાનહર્ષજીનું નામ રાખવા પોતાના શિષ્યનું નામ અમરહર્ષ રાખ્યું હોય. આથી અમરહર્ષજીનો સમય ૧૭ સદીનાં પૂર્વાર્દ્ધ સુધી ગણી શકાય છે. પુષ્પિકાના ઉલ્લેખને પ્રતલેખન સંબંધી ગણિએ કે કૃતિરચના સંબંધી ગણીએ પરંતુ કૃતિનો રચના સમય ૧૭મી સદીનો પૂર્વાર્દ્ધ નક્કી થાય છે. જોકે હેમચંદ્રાચાર્ય જ્ઞાનમંદિર-પાટણના હસ્તપ્રત સૂચિપત્રમાં કર્તા નામ 'અમરહર્ષગણિ' જ આપ્યું છે.

विमलकीर्तिवधूकुलमन्दिरं, हृदयनिश्चलताजितमन्दरम् ।
वरयशोहरिवंशविभूषणं, नमत नेमिजिनं गतदूषणम् ॥१॥ [द्रुतवि०]

रासकः-

श्रीयादवकुलकमलविरोचन !, विषयमहीरुहदाहविरोचन ! ।
लोचनसुखकरशरीर तु जय, जय लोचनसुखकरशरीर ॥२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मङ्गलपादपसेचनजीवन !, सूदितसाधुजनानघजीवन ! ।
जीवनमण्डलपाल तु जय जय जीवनमण्डलपाल ॥३॥
उपशमविनयविवेकनिकेतन, सुरपतिनतपद शङ्खसुकेतन ।
केतनसाधनधीर तु जय जय केतनसाधनधीर ॥४॥
स्वचरणभासितश्रीजिनशासन, भविकजनावलिहितकरशासन ।
शासनपरनरतार तु जय जय शासनपरनरतार ॥५॥
सूरीपुरावनिवशाहृदि सारहारं,
पुण्याम्बुना विहितकर्ममलापहारम् ।
पापाग्नितापितजगद्वनमेघधारं,
देवं नवीमि मदचौरवधासिधारम् ॥६॥ [वसन्ततिलका]

काव्यम् :-

कुमतिलताततिपाटननेमिं, नेमिं नौमि जिनेशं रे ।
पूरितसेवकमानसकामं, कामं प्रणत जिनेशं रे ॥७॥
सकलनरामरहितकरवाचं, वाचंयमनेतारं रे ।
भुवनत्रयतारणपरमोहं, मोहतिमिरसवितारं रे ॥८॥
भुवनवंशकर ! मन्मथशङ्कर !, शङ्कर ! शिवकर ! नेमे ! रे ।
विश्रुतशीलदयादमतपनय !, व्यपनय मरजननेमे रे ॥९॥
निर्मितपुण्यपरायणजनशिव !, शिवकैरवसितभानो ! रे ।
नन्द चिरं जिन ! विनतनरामर !, मरकतसमतनुभानो ! रे ॥१०॥
श्रीमत्समुद्रविजयाङ्गजनेमिनाथं,
वन्दे दयारसकुलीनसुसिन्धुनाथम् ।
वाणीविलासगुणरञ्जितभूमिनाथं,
संसारसिन्धुवहनं जगदेकनाथम् ॥११॥ [वसन्ततिलका]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

काव्यम् :- अढिआ :-

शिवतरुणीहृदि हार कृतदुःकृतसंहार ।
सारमुमुक्षुयते नतनरदेवपते रे जय जय नतनरदेवपते रे ॥१२॥
केवलपिकसहकार, हृदये हितसुखकार ।
चारुदयालुमते नाशितजनकुमते रे जय जय नाशितजनकुमते रे ॥१३॥
कलिमलहरणासार, निरुपमकरुणासार ।
सारमरालगते दर्शितसिद्धिगते रे जय जय दर्शितसिद्धिगते रे ॥१४॥
उज्झितमान समान, विश्वसुरद्रुसमान ।
मानवमुर्ध्वगते सूक्तभवान्तगते रे जय जय सूक्तभवान्तगते रे ॥१५॥
राजीमतीपतिमपूर्वगुणालिगेहं,
लोकत्रयीनयनसंमददायिदेहम् ।
शान्तारितोत्तमजनोच्चलचिन्तितेहं
नेमीश्वरं विमलभक्तिभृतो नुवेऽहम् ॥१६॥ [वसन्ततिलका]

फाग :-

जिन ! जननत ! नरमोदक ! मोद-कराङ्गरुचे ! ।
जय वरशिवद ! विशारद ! शारदचन्द्रशुचे ! ॥१७॥
जय जिन ! त्रिभुवनमोहन ! मोहनदीशतरी ।
वाञ्छितदानसुराऽगमरागमहीजकरी ॥१८॥
निर्मितनित्यतपाऽवन ! पावन ! साधुयते ! ।
जीव चिरं यदुनन्दन ! नन्दननिपुणमते ! ॥१९॥
स्थिर-चरजीवकृपापर ! पापरजौघहरे ! ।
त्वमसि विशुद्धशमाऽनघ ! मानघनेभहरे ! ॥२०॥
श्रीनन्दनस्मयनिवारणनीलकण्ठं,
कोपानिलाशनविनाशननीलकण्ठम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भव्यावलीहृदयहर्षकरोपकण्ठं,

नेमिं नमामि कलकण्ठसरूपकण्ठम् ॥२१॥ [वसन्ततिलका]

काव्यम् :- त्रिपदी :-

सुधामुधाकरवाणी नतहरीन्द्राणी रे ।

भीतन्तुकृपाणी रे, त्वमसि जिनाऽमलप्राणी रे ॥२२॥

महानन्दसुखकारी सुकृताधिकारी रे ।

कषायापकारी रे, जिन ! नन्द जगदुपकारी रे ॥२३॥

मुदा नतनर-नारी महागुणधारी रे ।

सकलविचारी रे, जय बालब्रह्मचारी रे ॥२४॥

जयेनाऽघपरिहारी व्यापदपहारी रे ।

अनियतविहारी रे, प्रमुदितागमव्यवहारी रे ॥२५॥

इति परमभक्तिभरेण मयका यः स्तुतो जिननायकः,

सकलमङ्गलकमलकाननबोधने ग्रहनायकः ।

श्री**विजयदान**प्रधानतरधी**रमरहर्ष**विधायकः,

श्रीनेमिनामा क्षेमधामा भवतु मे सुखदायकः ॥२६॥ [हरिगीतः]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ४३ ) स्वमनोविज्ञप्तिगर्भितं श्रीनेमिजिनस्तवनम्

તપાગચ્છીય યુગપ્રધાન શ્રીસોમસુંદરસૂરિજી[1] (૧૪૩૦-૧૪૯૯) વિરચિત પ્રસ્તુત સ્તવન અપભ્રંશ ભાષામાં રચાયેલું છે. ૪૩ કડીમાં ગુંફિત આ સ્તોત્રમાં વિશિષ્ટ છંદોચયન થયેલું છે. વસ્તુ તથા ૨૪ માત્રક ચંદ્રલેખા ઉપરાંત 'ભાષા' નામથી વિવિધરીતે છંદ પ્રયોજાયેલ છે.

સ્તવનની અભ્યંતર સંરચનાનું દિશાસૂચન આપેલા શીર્ષક પરથી જ પ્રાપ્ત થઈ જાય છે. અનાદિકાળથી આજપર્યંત સંસારપરિભ્રમણમાં આત્માએ સહન કરેલા દુઃખોની વેદના કવિહૃદય પરમાત્માને જણાવે છે.

સ્તવનની શરૂઆતમાં કવિશ્રી નેમિનાથ પરમાત્માની ગુણસંસ્તવનાના બહાને 'પ્રભુ ! તું કેવો છે ?' નું દર્શન કરાવ્યું છે, અને ત્યાર બાદ નિગોદથી આરંભી વ્યવહારરાશિમાં એકેન્દ્રિયત્વ, વિકલેન્દ્રિયત્વ, અસંજ્ઞીત્વ અને સંજ્ઞીત્વમાં સહન કરેલા કાતિલ દુઃખોની સંવેદનાસભર વિનવણી છે. જેના દ્વારા 'પ્રભુ ! હું કેવો છું ?' નો પરિચય આપ્યો છે. અહીં ૮૪ લાખ જીવયોનિ, કર્મોનિ પ્રકૃતિ-સ્થિતિ આદિનો નામ નિર્દેશ થયો છે. ત્યાર બાદ મનુષ્યભવાદિ દુર્લભ સામગ્રીની પ્રાપ્તિનો આનંદ વર્ણવાયો છે. શ્રીરૈવતગિરિરાજ અને શ્રીનેમિનાથજિનરાજની થઈ ગયેલી સંપ્રાપ્તિને કારણે કવિશ્રીનું હૈયું નાચી ઊઠ્યું છે. અંતે પરમાત્મા પાસે ભવે-ભવે બોધિબીજ અને પ્રભુપદસેવાની યાચના કરી છે.

जय सिरिनेमिजिणंदचन्द ! वंदिअपयसुरनर !,
भविअणजणमणवंछिअपूरण ! पहु सरतरु ।

---

૧. સોમસુંદરસૂરિજીનો આંશિક પરિચય સ્તોત્ર ક્રમાંક-૫ માં આવી ગયો છે. તેમના જીવનની વિશેષમાહિતી માટે જુઓ જૈન પરંપરાનો ઇતિહાસ-૩/૧૫૧ થી ૧૫૫.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हरिकुलगयणविभासभाणु जय जय सिरिनाह !,
जय जय तिहुअणकामकुंभ जय पुन्नपवाह ॥१॥ [चन्द्रलेखा]
रेवयगिरिवरतित्थरायसिरि मउडसमाण !,
जय जय दुज्जय मोहजोहमयनिज्जिअमाण ! ।
दुक्खदवानलसजलमेह निअदेहपहाभर-
तज्जिय कज्जल कसिणकाय ! जय जय जणसुहकर ! ॥२॥
सामीय सिवपुरनयरनाह ! असिरण जणसिरण !,
भवतरुभंजण ! अंतरंगरिउदलबलगंजण ! ।
करुणासायर ! भुवणराय ! अवधारु सामी !,
वीनती कर जोडि दोइ करुं निअसिरनामी ॥३॥
पढम निगोअ अणाइ-अणंत ओसप्पिणि वसिउ,
जम्मण-मरणिइं सयललोअ सामी ! मइं फसिउ ।
बायरआदिनिगोदमज्झि रहिउ काल अणंत,
छेयण-भेयण-ताव-सीय दुहकोडि सहंत ॥४॥
विवहारिइं कह कहवि पत्त पुढवी जलण,
जोणी लक्ख सत्त सत्त हउं भमीउ पवण ।
वणसइ पत्त-अणंत माहि दस-चउदसलक्खा,
बि-ति-चउरिंदी-विगलि लक्ख जोणी दो दो संखा ॥५॥
भमीउ काल असंख-संख तुह आणविहीणु,
दुक्ख असंख सहंत तत्थ भुवणत्तयि दीणु ।
जल-थल-नहचर उरग-सप्पर भुअपरि तिरीया गयि,
बंधण-ताडण-वहणदुक्ख अणुहूअ संखागय ॥६॥
रयणपहाई य नरय सत्ति हउं भमीउ रंक,
तुह आणा विणा जोणि लक्ख चउ चउ गय संक ।

भवणवई-वाण-जोसिमज्झि वेमाणीयसुरभवि,
न हि चउलक्खा जीव जोणि साया सुह कत्थ वि ।।७।।

भरहेरवय-विदेह पंचदस कम्महभूमिइं,
जिणवरदेव-सुसाहु-धम्म लब्भइ सुह कम्मिइं ।
अंतरदीव छपन्न तीस सुरभोग समाणा,
जिणमयि कहीअ अकम्मभूमि लहीइं सुह दाणा ।।८।।

चउदस लक्खा जीवजोणि हउं नरभवि सहीउ,
इणि परि जीवहं जोणि लक्ख चउरासी भमीउ ।
पूरिअ पुग्गल वारऽणंत सामी मइं दुहभरि,
सुकय पसाइं दिट्ठ देव सिरिरेवयगिरि सिरि ।।९।।

वस्तु :-

तिजयसामीय ! तिजयसामीय ! निसुणि जिणनाह !,
चउगइ भवि इम भमिउ जीव जोणि हउं लक्ख चउरासीय ।
छुह-तण्हा-जम्म-जर-मरण रासिइं दुक्खाण पासीय,
पूरिअ चऊदरज्ज इम सामी ! वार अणंत,
भमतां भायगि भेटीउ भवभंजण भगवंत ।।१०।।

भाषा :-

हिव हउं जिम नव-नव रूप वेसि,
लही बायर सुहम देसप्पएसि ।
जेहिं अणुबद्धउ भवमज्झारि,
भमीउ भवउदहि अणोरपारि ।।११।।

नवि पामिउ जहं कह वि पार,
हउं वीनवउं सामी तीहं पयार ।
मूल पगई य अट्ठकम्म हुंति,
भेया पुण अडवन सय लहंति ।।१२।।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नाणावरणीय-दंसण-वेअ कम्म,
पण-नव-दुह-उत्तर पगइ मम्म ।
थिइ तीस कोडाकोडि उदहि जिट्ठ,
ईयरेणिग बार मुहुत्त दिट्ठ ॥१३॥

जिव वागुरी बांधउ रहइ जीव,
तिम मोहणि बद्धउ रहिअ जीव ।
ठिइ अपर कोडाकोडि सतरि देव,
परमेसर अंतमुहुत्त लेवि ॥१४॥

अडवीस उत्तरपगइ नाह !, इक्किक्कादिइं दुह दुसह जाहं ।
नवसयपंचाणुभंग जेअ, दिइं उदयिइं दुक्ख अणंता तेअ ॥१५॥

देवाईय चउगइ आउकम्म, जिअ पामइं निअ-निअ उदयिं जम्म ।
तीस-तिगहिअ सायर जिट्ठ आय, जहन्न मुहुत्तिइं अंति जाइ ॥१६॥

नामकम्मिइं उत्तरपगइ जोइ, इगसय वलि तिन्नि अ दुन्निगोइ ।
कोड़ाकोडि ठिइ तीससागराण, बीआ अड अन्तमुहुत्त जाणि ॥१७॥

पंचुत्तरपगई य अंतराय, दाणाई य वीरिअ अंतराय ।
परमा ठिइ कोडाकोडि तीस, सागर बिअ अंतमुहुत्ति सीस ॥१८॥

भमी काल अणंतु एहं पसाइ, आविउ नरभवि हउं कहकहवि ताय ।
बहु पुन्न पसाइं अज्ज नाह !, मइं दीठउ रेवयगिरिसणाह ॥१९॥

वस्तु :-

भवह सायरि भवह सायरि अट्ठकम्मेहिं,
दुक्ख अणंता इम सहीय, भमीय नाह ! तु वल्लह विण दिट्ठउ ।
तत्थ य करिअ पमाय घण बहुअ वार तुह आणभट्ठउ ।
चिहुं कसाए ओलविउ, चउगइ भव मज्झारि ।
हिव तूं सामी ओलिखिउ चउगइगमण निवारि ॥२०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भाषा :-

सहजि सलूणा सोहग सुंदर, राव करुं सिरिनेमिजिणेसर ! ।
तित्थेसर भयहरण जगजणमणचिंतीयचिंतामणि
भवियकमलपडिबोहणदिणमणि तिहूयणतारणजाण ॥२१॥

अंतरंगवयरीडे पामी जिम रहउं रोलवीउ सामी ।
तिम जगगुरु अवधारि विवहरूवि कीय कम्म कुललिइं ।
दुह भंडागर दंड पमायिइं भमी नइ भवचक्कि ॥२२॥

भवपुरि विनडिउ मोहनरेसारि, बहूअ परिइं तुह विण अलवेसरि ।
चउगइ चउपथमाहि सुजन-घर-सुत हउं वनितानइ ।
नेह बंध निबंधीयउ चउगइनइ, पालिउ भव दुह चारि ॥२३॥

विसय रसिइं हउं मूढ विलूधउ, पंचपयारि भववारणि रूधउ ।
लीधउ दुह भंडार राग-दोसि हउं जगहवदीउ ।
जीतु असिरण भमीउ मयउ, रंक परिइं संसार ॥२४॥

तुह सासण वरयो अविहूणइ दुरुत्तर मइं भवजलहि लही नइ,
पामीय दुक्ख अणंत, तिहुयणि सुरनरमाणविहंडण ।
सिवसुखसंपय मइबलभंजण, दुज्जयइंदिअ चराड ॥२५॥

सच्छाहिव तूं सरसि छतइ पहु जानु सिवपुरपंथि लहीहउं,
लुसिउह भवरण्णे सुकय हीणदीणु भव पंकि ।
खुतु पाप करंत निसंक, कायर भव बीहंत ॥२६॥

अडवडीयां आधार जिनेसर, दुत्थिअ जण पीहर परमेसर,
भावठि भंजण देव ! तूं करुणारस सायर सामी ।
सिरणागय रक्खण मइं पामी राखि राखि जगनाह ! ॥२७॥

अंतरंग अरिदल निव्वारण कोइ न रक्खण तिहुअणि तूं विण,
समरथ साहस धीर तूं जगवच्छल हउं निरधार ।
आयर करि मूं हिव करि सार, वंछीय सुह दायार ॥२८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वस्तु :-

नेमि जिणवर नेमि जिणवर भुवण जण ताय !,
निलुप्पल सरिसतणु अमिअवाणि गय ललीय गामिअ,
नव जुव्वणि मयणजिअ, मोहमल्लबल हेलि नामिअ ।
वयरीयडे तुह आण विण रोलिउ हउ भवमाहि,
तूं ठाकुर मइ पामीउ वारि न अरिदललीह ॥२९॥

भाषा :-

इम हउं भवसायर मज्झारे, भमीउ दुक्ख अणंत पयारे,
कम्मपसाइ अतिघणू ए ।
तूं तिहुअणजणतारणदेव !, नयणे दीठउ सामि हेव,
तूं मनहरखिइं गहगहिउं ए ॥३०॥

आज सुधन दिन धन सुविहाणउं, धन ए पहुर सुखिण खिण जाणउं,
माणउ सुखसंपद सयल ए ।
आज सुकय कीय कलीउं नाह !, ओल्हाणु मुझ भवनु दाह ।
नाह ! पणासिय पावभर सयल ए ॥३१॥

अमीयरसायण वूठउ मेह, सुरतरु फलीउ आंगणि गेह,
कामकुंभ मुझ करि चडिउं ए ।
कामगवी आवी घरबारि, फलीया सयल मनोरथ पारि,
सारचिंतामणि करि चडिउं ए ॥३२॥

आज जिनेसर एह ज मारुं, सफल हूउ माणसनु सारुं,
पार भवोदहि पामीउं ए ।
चउदरयण नव निहि घरि आज, पामीउं त्रिभुवन केरुं राज,
आज सबल पहु पामीउं ए ॥३३॥

तिहुअणि निरुवम तीरथ उ, भमरुली गिरि गुरुउ गिरिनार ।
तसु सिरि भुवणदिणेसर उ, भमरुली सिरि मुनिसुंदर सार ॥३४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यादव वर कुल नहयल उ, भमरुली पयड विसाल दिणेस ।
सीस लेस नीय करजोडि उ, भमरुली विनवइ नेमि जिणेस ॥३५॥
जम्म-मरणिइं इणि परि उ, भमरुली पूरिअ लोअ असेस ।
फरिसि चऊदइ रज्जमइं उ, भमरुली वारणंत देस पएसि ॥३६॥
पुग्गल परिअट पूरिआ उ, भमरुली आठइ वार अणंत ।
भमतां मइं भवसायर उ, भमरुली लाधु कह वि न अन्तं ॥३७॥
भमीय भमी हउं ऊसन्नउ उ, भमरुली आवि तुह पाय हेव ।
माय बाप तूं बंधव उ, भमरुली तुं गुरुं ठाकुर देव ॥३८॥
तूं चिंतामणि सुरतरु उ, भमरुली चउगइ गमण मूं वारि ।
राज-रिद्धि-धण-कण-रयण उ, भणरुली मांग्गउ रमणि न सार ॥३९॥
बोधिबीज मझ अविचल उ, भमरुली देजे निय पयसेव ।
इम सामी जे जीनवरू तु उ, भमरुली भविअण भावि नमेवि ॥४०॥
पामइ सुरनर संपद उ, भमरुली सिवसुख भोग रसाल ! ।
आठइ सिद्धि वसइं घरि उ, भमरुली अविहड मंगल माल ॥४१॥

वस्तुः-

भत्ति पूरिअ भत्ति पूरिअ मणह आणंदि,
सिरि रेवयगिरिमण्डणु तित्थराय सिरि नेमिजिणवर,
मइं सामी इम वीनविउ, आलमाल नयणे जिणेसर ।
राज-रिद्धि-धण-कण-रमणि-कंचण-रयण न किं पि,
मागउं भवि-भवि बोहिबीय तुह पयसेवा पंति ॥४२॥

कलशः-

ईय रेवयगिरि सीरि सुंदर-तिलय नेमि जिणेसरं,
वीनवइं अणुदिण जेअ भविअण पणयसव्वसुरेसरं ।
तवगच्छसुंदर**सोमसुंदर**सूरिवन्निअसंपयं,
सिवरमणिपिम्मह हीययवल्लह लहइं ते सुह सासयं ॥४३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ૪૪ ) नेमिजिनस्तोत्रम्

# ૪૫ ) नेमिजिनस्तवनम्

# ૪૬ ) नेमिजिनस्तवनम्

આ ત્રણેય સ્તોત્રો અનેક ભાષામાં રચાયા છે. જેમાંથી પ્રથમ સ્તોત્ર સંસ્કૃત-પ્રાકૃત તથા શૌરસેની ભાષામાં રચાયું છે. દ્વિતીય સ્તોત્ર એ ત્રણ ઉપરાંત માગધી, ચૂલિકાપૈશાચી તથા અપભ્રંશ એ ત્રણ ઉમેરીને છ ભાષામાં રચાયું છે અને આ છ ભાષામાં પૈશાચી અને સમસંસ્કૃત એમ બે ઉમેરીને અષ્ટભાષામાં ત્રીજું સ્તોત્ર રચાયું છે. જો કે દ્વિતીય સ્તોત્રમાં પણ સમસંસ્કૃતનો પ્રયોગ છે પરંતુ તેને ગણતરીમાં જુદું ગણ્યું નથી જ્યારે તૃતીય સ્તોત્રમાં તેનો જુદો ઉલ્લેખ કર્યો છે. આ તૃતીય સ્તોત્રમાં અન્ત્ય બે પદ્યોમાં ક્રમશઃ આઠેઆઠ ભાષાની પદાવલીઓ યોજી છે. ત્રણેય સ્તોત્રમાં ભાવાર્દ્રતા અને મધુરતા પણ રહેલી છે.

પ્રથમ સ્તોત્રના કર્તા રત્નપ્રભસૂરિજી છે. દ્વિતીય સ્તોત્ર પદ્મસુંદરજીએ રચ્યું છે. તૃતીય સ્તોત્રના કર્તા વિજયદિન્નસૂરિજી છે. ત્રણેય રચનાકાર સંબંધી અન્ય કોઈ માહિતી પ્રાપ્ત નથી. જોકે રત્નપ્રભસૂરિજી અને પદ્મસુંદરજી નામક અનેક સૂરીશ્વરો કે મુનિપુંગવો થઈ ગયા છે. પરંતુ પ્રસ્તુત રચનાકાર તરીકે તેમાંથી કયા ગણવા તેનો નિર્ણય થઈ શકે તેમ નથી.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ४४ ) संस्कृत-प्राकृत-शौरसेनीभाषात्रितयनिबद्धं नेमिजिनस्तोत्रम्

अमन्दभन्दोदयकंदसारं, संसारपारीणमरीणसारम् ।
इन्द्रावलीकैरववृन्द्रचन्द्रं, नेमिं नमंसामि चिरं वितन्द्रम् ॥१॥ [उपजाति]

उत्तालकोलाहलकाहला वा, नन्दन्तु[१] हे देव ! नरा भवन्तम् ।
कामं महाभावसमुद्धरा वा, नुवन्तु चित्तं भविनो विभिन्नम् ॥२॥

विमलमङ्गलमण्डलमन्दिरं, निबिडडिम्बविडम्बसुडम्बरम् ।
चरणवारिरुहं रिणरीणते, परिरुणद्धि विरुद्धधियं मम ॥३॥ [द्रुतवि०]

कुसुमबाणकुलीरनिमीलिरे, विरहमोहपरं सहसा नरं ।
परमनेमिपरायणधारणा, मम सहा न चिरं तव सङ्गमे[२] ॥४॥

चन्द्रचारुकिरणावलीवरच्छायदन्तकरसुन्दरोदय ! ।
नेमिकुञ्जर ! दुरन्तदारुणं किं न हंसि भव पंजरं मम ॥५॥ [रथोद्धता]

काम[३]केलिकलहच्छलाविले, मत्तमोहमरिमामहाभरे ।
देव ! देहि करुणा तरङ्गिणी, चारुचित्तमरुजन्तु मण्डले ॥६॥

तालीतमालदलकज्जलनीलभासं,
निःसङ्गरङ्गगुणचित्तनिबद्धवासम् ।
उद्दामधामधरमुद्धर[४]धीरभावं,
नेमिं नमामि[५] भवसिन्धुसुसन्धिनावम् ॥७॥ [वसन्ततिलका]

आबद्धबन्धुरविलाससमिद्धसिद्धि,
सम्बन्धबद्ध[६]विसबन्धु[७]तमाभिसन्धिम्[८] ।

---

१. 'निन्दन्तु' - पा. । २. 'संयमे' - पा. । ३. 'काल०' - पा. ।
४. 'उद्दाममध्वरसुद्वर०' - को. । ५. 'नुवामि' - को. । ६. 'बन्ध' - को. ।
७. 'विसबन्ध' - पा. । ८. '०भिसिद्धिम्' - पा. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हिंसासरोरुहसमूहमहारिमानं,
नेमिं नमामि[९] नवभाववरो भवन्तम् ॥८॥

कुवलवलयनीलं वेणिदण्डं वहन्ती,
तरलतरलतारामण्डलं सारयन्ती ।
[१०]तरुणकिरणजालं कङ्कणाली करालं[११],
सरलमलसयन्ती बन्धुरं बाहुदण्डम् ॥९॥ [मालिनी]

करकुवलयभङ्गी चारुसञ्चारचारी,
[१२]चरणकरणकेली कोमला कम्बुकण्ठी ।
नवलवणिमलीलाहारिणी हारिणी सा,
गरलमिव निबद्धा[१३] देवरामा पुरा ते ॥१०॥ [युगलम्]

महाबाणाऽऽसारे हरिकरिकरे कालकलिले,
कराले हुंकारे [१४]करणवरवीरं रणभरे ।
चिरं चित्तासङ्गी तव चरणराजीवरमणे,
जयं धीरो धत्ते धवलगुणसंसंग[१५]सुभगम् ॥११॥ [शिखरिणी]

अपारे संसारे समहिमसमीहाभरसहे,
हहा हिंडे भूयोऽनुड[१६] निविडपीडाजडरसं ।
दयालोऽदंभाले[१७] तरुणतरणे पङ्कहरणे,
सहेनाहं नेमे ! चिरममरसं पाहि सरसा ॥१२॥

कलिमलजलाऽऽसारे रामातरङ्गनिरन्तरे,
विरहकुरुलीवेलावासे[१८] विमोहतिमिङ्गिले ।

---

९. 'नुवामि' – पा. । १०. 'तरणि' – पा. । ११. 'करालीं' – पा. । १२. 'करण०' – पा. । १३. 'निबद्धा – पा. । १४. 'करुण०' – पा. । १५. 'सुगमम्' – पा. । १६. 'नणु' – को. । १७. '०दंभारे' – पा. । १८. '०मासे' – को. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निविडजडिमारम्भे[१९] भीमे महाभवसागरे,
चरणकमलं ते निस्सीमं महामि तरीसमं ॥१३॥ [हरिणी]

बन्धो ! नेमे ! विमलकरुणानीरसंभारसिन्धौ,
नीलीनीलच्छविनवमणि सञ्चयच्छायकाय ! ।
कामं वामं कलहकलिलं कामकल्लोललोलं,
मूढं गूढं नियमयमसा मङ्गलाऽऽसङ्गिचित्तम् ॥१४॥ [मन्दाक्रान्ता]

समुद्धरतरा रमा निरयकंदराकारिणी,
समीरलहरीचला सरससुन्दरी सुन्दरी ।
भवे किमिव सुन्दरं दरदुन्तहेलाहरं,
विहाय तव केवलं चरणचारुपङ्केरुहं ॥१५॥ [पृथ्वी]

कामं कुङ्कुमपङ्कपिञ्जरतरं वन्दारुदेवावली-
चूडाचुम्बिसुचारुसञ्चयमणीसण्टङ्किटङ्कारवम् ।
नेमे ! निस्समसामधामपरमच्छिन्नच्छलायास ते,
संसेवे चरणारविन्दमसमं भूमण्डलीमण्डनम्[२०] ॥१६॥

यः[२१] संस्कृतप्राकृतशौरसेनभाषाभिरामिस्तिसृभिर्निबद्धां ।
एनामधीते स्तुतिमेष मान्य[२२], **रत्नप्रभो**ऽभीष्टघटापटुः स्यात् ॥१७॥ [इन्द्र०]

---

१९. '०रम्मे' - पा. । २०. 'मङ्गलम्' - को. । २१. 'यत्' - को. । २२. 'मान्या' - पा. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ४५ ) षड्भाषानिबद्धं श्रीनेमिजिनस्तवनम्

**संस्कृतम् -**

विजित्यदुर्वारमनङ्गविभ्रमं,
विहाय बालामबलामतन्द्रितः ।
समापयन् ब्रह्मसमाधिसम्पदं,
शिवाय नेमिः शिवतातिरस्तु सः ॥१॥ [वंशस्थ]

चलत्पताका चलपत्रपत्रवच्चलं विदित्वा किल सौख्यमक्षजम् ।
अनन्तदृग्बोधमयि सुधामनि स्फुरच्चिदानन्दसुखेऽवृतद्भवान् ॥२॥

अयि ! क्व लीलाम्बुजधर्मवारणः श्रियश्चलच्चामरचारुचञ्चलाः ।
क्व साम्यसाम्राज्यमहोदयो ध्रुवो हृदीति सङ्ख्याय समाददे व्रतम् ॥३॥

स्वरूपतः सोहमिहास्मि तत् कथं, परोपतापं करवाणि तुल्यदृग् ।
इति त्वदीयं करुणारुणं मनः, समस्तसत्वेषु वधान्न्यवीव्यथत् ॥४॥

तमालनीलाऽम्बुजपुञ्जमञ्जुलं, लसत्तडित्ताण्डवलोलकुण्डलम् ।
स्वरूपमाधाय करग्रहे सुरीदृशां निमेषत्वमपाहरद्भवान् ॥५॥

घटप्रतिभरस्तनीमखिलचन्द्रबिम्बाननां,
कनत्कनकचम्पकद्युतितनूमनुनश्रियम् ।
मरालगमनामनाकुलमनाः स वोऽव्याज्जिनो,
निभाल्य जरतीनिभां परिजहार राजीमतीम् ॥६॥ [पृथ्वी]

वातव्याधूतनूतद्रुमगलितलताम्लानमन्दारमालां,
लीलामालापयन्ती विलपति विरहादीनवोपघ्ननिघ्ना ।
राजीमत्यङ्गनायाः किमिति हत विधे ! लेख एष व्यलेखि,
भावी योगे वियोगो ह्यकरुण ! करुणा त्वन्मनो नो रुणद्धि ॥७॥ [स्रग्धरा]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**प्राकृतम् :-**

किं ते भंते ! सिववरवधूसंगमेरंगमेलो,
जाहं वाहंबुधरनयणा रोयमाणा विसन्ना ।
चित्तं रत्तं तव गुणगुणे रुवलावण्णपुण्णे,
चत्ताऽऽसत्ता जइ जिण ! तए सुंदरो ते विवेओ ॥८॥ [मन्दाक्रान्ता]

किं वा लीलामराली नवघुसिणरसेणाणुलित्ता पुरा मे,
संभंतो रायहंसो रहचरणपियं मन्नमाणो विरत्तो ।
तम्हा तुम्हाण णाहामुहकमलसिरीदंसणे वंचियाऽहं,
एसो मे कम्मदोसो परिणयसमए जं न दिट्ठीहि दिट्ठो ॥९॥ [स्रग्धरा]

एसा चंपयमालिय व्व सुहया सिंगारभिंगारिया,
फुल्लिंदीवरलोयणा ससिमुही राईमई तं तुमं ।
मुत्तूणं जमदिट्ठि सिद्धिरमणिं पत्थेसि जुत्तं ण' तं,
एवं णो खुहिओ वयंसभणिओ णिव्विण्णचित्तो जिणो ॥१०॥ [शार्दूल०]

दाऊण दाणमणुवच्छरमत्थिएहिं,
आभोइऊण णियणिक्खमणस्स कालं ।
उज्जिंतसेलसिहरे गहिऊण दिक्खं,
कासी य छट्ठतवसा भयवं विहारं ॥११॥ [वसन्ततिलका]

पव्वज्जमज्झवगया तुह पायमूले,
सा उग्गसेणतणया पइणिच्चभत्ता ।
तुम्हारिसाण दुलहं लहिऊण संगं,
किं सुद्धि-बुद्धिणिउणा विरमंति धन्ना ? ॥१२॥

**शौरसेनी:-**

चिंतेहि जो हिदयमंदरकंदरम्मि,
णाधस्स णाम हरिमुद्दरिदं महंदो ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उच्चासिदूण भवकुंजरमुत्तमट्टं,
साधेदि णिव्वुदिपदे रमदे सलीलं ॥१३॥ [वसन्ततिलका]

पणदसुरकरीडोदारमंदारदाम-
च्छविकिरणपरागुम्मीसिदं पादपोम्मं ।
णमध णमध णिच्चं भत्तसत्ताणताणं,
कधमध भविया भे अण्णधा भोदि भंदं ॥१४॥ [मालिनी]

गद-मदण-वियारऽण्णाण-हासादिछक्कं,
विघडिदपणविग्घं चत्तमिच्छत्तसंगं ।
जिद-अविरदिणिद्दा-रागदोसादिदोसं,
समरसरससिंधुं देवदेवं णमामि ॥१५॥

दव्वं अत्थि त्ति णत्थि त्ति य उभयमवत्तव्वमाहोसयं वा,
सच्चं णिच्चं अणिच्चं णय-गमबसदो णेगमेगं कथंवि ।
अत्थे धम्मा अणंदा इदिजिणभणिदो ते अणेगंदवादो,
एगंदो जत्थ मिच्छा तव वयणसुधासिंधुणीसिंदबिंदू ॥१६॥ [स्रग्धरा]

**मागधी:-**

तव मुदं कुणये हि अणेलिशं, णयमिधोमिलणेण विलाइदं ।
मम शदा शलणं चलणं च ते, नलशुलाशुलमोलिणमंशिदं ॥१७॥ [द्रुत०]

यदिहगे यिणदंशणमुत्तमं सुदुलहं लहिऊण पमादवं ।
कधमणंदशुहोहपलंपलापलिणदंपदमस्स भविस्सिदि ॥१८॥

पलमकालुणिए भयवं भवं, कुणदि हंदि कधं अवधीलणं ।
मम मणम्मि तुमं शमुवस्तिदे, अहह गज्जदि मोहमहाकली ॥१९॥

**चुलिकापैशाची :-**

हितपकं चलणेसु नियोजितं, तुह कुनक्कहने महा फालती ।
कलन मच्छतु ते अफिपंतने, इति सताचिरकंखतिमेतिसो ॥२०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तुव कुवकनंफोधिस्स तं न एति पुहस्पती,
कथमहमथो नातुं सक्को विसंथुलमंतथी ।
चलन-कमलं सेवे निच्चं तुमं कलुनानिधी,
मम हलिकुलुत्तंसासेयं तुमा तु फविस्सति ॥२१॥ [हरिणी]

नवचलतपितानतेहकंती कुमततमोहलने सहस्सलस्सी ।
मतनमतखनालिकंथवाहो चयतु सिवातनयो अरिट्ठनेमी ॥२२॥ [पुष्पिताग्रा]

**अपभ्रंश :-**

पइं दिठिहिं जिणनाह, जांह न दिठि समुल्लसइ ।
तं पुण गुरुकम्माह, दोसु न तांह कुबुद्धि यांह ॥२३॥ [गाहा]

जे जिणवर तुह आण पालहिं तहिं संजमु सहलु ।
जं विणु आण-विनाण तं तु सखंडण जिम्व अहलु ॥२४॥

अन्नारिसु तुहमग्ग, अवराइ सुतवु आयरइ ।
सगड जेम्व धुरभग्गु, किम्व सथर पहि संचरइ ॥२५॥

**समसंस्कृतम् :-**

तरणिकर-तरुणतर-विमलकेवलधरं,
धरणिधरसारसमसमयगुणसुंदरं ।
देवमघहरणमहमसदसम्मदपदं,
भीमभवभय भिदाकरणमभिभवनुदं ॥२६॥ [सुप्रभा]

विधुरभरदंतिदरदलनकंठीरवं,
तं भजे गतजरा-मरण दारुणभवं ।
तार तर हार हर हास गुणगणमयं,
सिद्धिरमणीरमणलीलालयं ॥२७॥ युगलं ॥

देव-गुरुरेव नहि देवमहिमोदयं,
भणति तव कोहमानंदकमलालयं ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किंतु कलिकाल-मलहरणकारणमलं,
कामये चरणपरिचरणमिह मंगलं ॥२८॥

● ● ●

षड्भाषाभिस्तवनमिह मे निर्म्मिमाणस्य जज्ञे,
पुण्यं तस्मात्तव नवपदं द्वंद्वराजीवराजी ।
चेतः सद्मन्यविरतमलं भासमाना समाना,
क्षेमामोदं दिशतु शिवपदानन्दमन्दारकन्दम् ॥२९॥ [मन्दाक्रान्ता]

ये त्वच्छासनमामनन्ति मनसि स्याद्वादमुद्राङ्कितं,
तैस्तत्वं निरटङ्किसङ्कटकुटीकोणायमानं परैः ।
तद्भक्ताः किल **पद्मसुन्दर**पदामोदप्रमोदास्पदं,
साम्राज्यं विलसन्तु सन्तु सततध्यानावधानास्त्वयि ॥३०॥ [शार्दूल०]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ४६ ) अष्टभाषानिबद्धं श्रीनेमिजिनस्तवनम्

**संस्कृतम् -**

परमभक्तिपरीतपुरन्दर !, स्तुतपदद्वय ! नेमिजिनेश्वर ! ।
जलदनीलरुचेस्तव संस्तवं, विरचयामि सुवासनया नवम् ॥ [द्रुत०]

सुरगुरुप्रतिमोऽपि धिया नरस्तव गुणान् गदितुं क इहेश्वरः ।
चरमनीरनिधेर्लहरीगणं गणयितुं गणकोऽपि किमु क्षमः ॥२॥

**समसंस्कृतम् -**

करणकुंजरकेसरिदारुणं बहलमोहमहीरुहवारणं ।
चरणतामरसं नरसत्तमा महिमधाम नमंति न के तव ॥३॥

गुणमणिगणरोहणरोहणं कुसमयाऽसमरेणुसमीरणं ।
चिरमहं महयामि महादयारसमयं समयं तव देव ! हे ॥४॥

**प्राकृतम् -**

जउकुलंबरसूरि[पहा]अरं, भवियलोअचओरसुहायरं ।
सुकयपायवनीरहरोवमं, जिण ! तुमं पणमामि अणोवमं ॥५॥

सयललद्धिजुओ सुमहावई सररिऊ सइसामि ! निसेविओ ।
हवसि देव ! हर व्व तुहं पुणो, भुअणनाह ! कयावि न भेरवो ॥६॥

**शौरसेनी -**

नाध चिंदामणी दावथिं दिज्जदे,
दावदह कप्परुक्खो वि कप्पिज्जदे ।
कामधेणू वि जिण ताव कामिज्जदे,
जाव दुह पायपउमं न दीसिज्जदे ॥७॥ [मदनावतार]

वदद दुरि दास दे सुकद परिपूरिदे,
सदह दुहिदे तथा सा दसद सोहिदे ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

संजणंदो जिणे गुणमहंदो सया,
जयदु भयवं भवं भुवणसिरिसामिआ ॥८॥

**मागधी -**

उवदिस्तशदस्तमणस्त समं
भवसायलतालणलतलणिसमं ।
नदअप्पिदशुस्तिल मोक्खलमं,
[जि]ण ! धन्नयणा पणमंति तुमं ॥९॥ [पद्धदिका]

ययवश्चलमश्चल-हि दशया, शुकिवाल शशायल किल भविआ ।
हलिशेण महंति तुहं णहा.................................॥१०॥

**पैशाचिका-**

जय गुनगनमनिनिधि ! नेमितेव ! जय तज्जिततुज्जयमतनतेव ! ।
जय सज्जनहितपकनलिनहंस !, जय पनतकसटतमतमनहंस ! ॥११॥

अपुरवसिरिसार ! अनंजपुंजनर ! तिन्नसंतसन ! भुवनविज्ज ! ।
नाममंत सरने रतने पभवंति न तोसा तलितमान ! ॥१२॥

**चुलिकापैशाचिका-**

कतराकखनाखनप्पफं कुनताराककनं सुतुल्लफं ।
नमते चिनलाच यो तुमं, लफते सो अनखं महालमं ॥१३॥

चकचंतुकनान पंथवो लचनीचानिसमानकित्तिमं ।
फकवं ! फचफाचफंचने फफ बम्हानतिलेखलक्खन ! ॥१४॥

**अपभ्रंशम् -**

साह पहाव निहाणु तेउ, सासणरहुआरुहिअ ।
नाण धणेहिं समाण के के न पहुत्ता शिवनयरि ॥१५॥

तउ पयपंकय नाह भमरप्पण नर जे धरहिं ।
होइ हरियजगबाह ! तेहं जससोरहं सुरहितणु ॥१६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सामवन्नु मेह जिह, तउ रेहइ पहुदेहो ।
पुण्णधण्णकारण जगहं, अमियदाण गुरुपहो ॥१७॥

धन्ना तेहिं नयणुल्लडां, जीहा तेहिं सुकयत्थ ।
जे तउ पस्सहिं रुव तिह ब्रुवहि जेतउ गुणसत्थ ॥१८॥

**समसंस्कृताष्टभाषावृत्तम्** -

नंद महोदयफलदक १ मंदरधीरिमधर २,
शमपेशलकलकुशलकोश ३ जगति जनहितधुर ४ ।
सुरनायकनतचलननलिन ५ करुणातरुणीप्रिय ६,
विकलकेवलि ! हेलिकेलि ! ७ कुलविमल ! कलालय ! ८ ॥१९॥

**पृथगष्टभाषावृत्तम्** -

श्रयोवल्लिवनीघनाघन १ महामोहेभकण्ठीरव २,
पज्जेहिं सुकएहिं दुल्लह ! ३ भवं पत्तो मए अम्महे ४ ।
शंशालाशयभीलुआह ५ सततं तिज्जाहि मज्जुं ततो ६,
निष्फीते निचपातपंकचयुके ७ वासं तुह नेमिअ ! ८ ॥२०॥ [शार्दूल०]

इत्थं ये तव संस्तवस्त्रजमिमां स्पष्टाष्टभाषासुमां,
श्रीनेमे ! गुणगुम्फितां विदधति स्वकण्ठपीठेऽसमां ।
जातश्री**विजयादि-दिन्न**गुरवः स्वीकुर्वते निस्तुषं,
ते प्राज्ञा घनभावनर्द्धमनसः स्वश्रेयसः श्रीसुखं ॥२१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ૪૭ ) श्लोकान्तमालायमकमयं नेमिजिनस्तवनम्

શ્લોકાન્ત માલાયમકમય આ સ્તોત્ર વૃત્યનુપ્રાસથી શોભાયમાન છે. સરળ સંસ્કૃત ભાષામાં થયેલી આ રચનામાં સુંદર પદલાલિત્ય છે. કવિશ્રી પરમાત્માના ગુણકીર્તનમાં વિશેષણોની પદ્ધતિને અનુસર્યા છે.

કેટલીક લાવણ્યસભર પદાવલી-

'सकलकालकलाकणनाचण०' (१)

'विधुसुधोज्वलसद्गुणसेविधम्' (२)

'लवणिमाललिताङ्गलताजुषो (३)

शरणमस्तुसमस्तसुखावहम्' (६) વગેરે...

પ્રભુની શ્યામ દેહકાન્તિને સામાન્ય વર્ણનની જેમ 'तमालदलच्छविः' કહી છે. પરંતુ તેનું 'घनाघनमण्डलनिर्मलीकृत' વિશેષણ મૂકીને શ્યામતાને ગાઢ અને નિર્મળ બનાવી છે.

ભક્તકવિ પ્રભુને વિનંતિ કરે છે. 'પ્રભુ ! મારું મન આપનામાં સતત રમતું રહે' અહીં કવિએ સુંદર ઉપમાં પ્રયોજી છે. 'सरोरुहिणीरसे अलियुवा इव' અહીં કમલિની અને અલિયુવા શબ્દની ગૂંથણી એ ભક્તના મનની પરમાત્મામાં અતિશાયી આશક્તિ દર્શાવી છે.

પ્રસ્તુત સ્તોત્રના કર્તા પ્રાયઃ 'ગુણનંદી' છે. દિગંબર પરંપરામાં એક ગુણનંદી થયાનો ઉલ્લેખ મળે છે. કે જેમના શિષ્ય વીરનંદીએ ચંદ્રપ્રભ-સ્વામિચરિત્રની રચના (વિ.સં. ૧૦૮૨) કરી છે.

सकलकालकलाकलनाचणश्चपलपञ्चखदान्ति परायणः ।
विषमचापसमापशिवायतिर्जयति नेमिजिनाधिपतिश्चिरम् ॥१॥ [द्रुतविल०]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चरणचारुरमापरमावधिम्, विधुसुधोज्ज्वलसद्गुणसेवधिम् ।
जिनमहं यदुवंशवतंसकं, हृदि वहामि महाकरपल्लवम् ॥२॥
लवणिमाललिताङ्गलताजुषो, भगवतश्चरणाम्बुजपूजया ।
वयमघं दलयेम समन्ततो, ग्रहमणेः प्रभयेव तमोघनम् ॥३॥
घनघनाघनमण्डलनिर्मलीकृततमालदलालिकलच्छविः ।
शुभगतागुणशालिमतल्लिका, सुमनसे जिनपो मम रोचताम् ॥४॥
चतुरिमैकनिधेर्भवतः पुनः, कटकलङ्ककलापविवर्ज्जितम् ।
यदुकुलं विमलं शुशुभेऽधिकं, ध्रुवमिदं हि महापुरुषोचितम् ॥५॥
रुचितचन्दनचम्पकमालिकाकरनरामरपूजितपाद ! ते ।
शरणमस्तु समस्तसुखावहं, पदयुगं भवसंयुगगञ्जनम् ॥६॥
जनमनोनयनामृतसोदरे, दरहरे हरिणा स्वयमाऽऽश्रिते ।
मम मनो रमतां त्वयि सर्वदाऽप्यलियुवेव सरोरुहिणीरसे ॥७॥
रसिकमागधिकैरिव पण्डितैर्जयजयारवडिण्डिममण्डितैः ।
नरसुरेन्द्रगणैरविखण्डितं, कृतगुणस्तुतिपाठजया विभो ! ॥८॥
विभववृद्धि-समृद्धिसमागमः सममभीष्टतमैः सहसङ्गमः ।
सुगतिलाभसुखं च भवान्तरे, भवति देव ! सतां भवदङ्घ्रिनाम् ॥९॥
चिनु धियं तनु दुर्मतितानवं दिश विवेकगुणेन समं शिवम् ।
कुरु तथा जिनशासनवासनं, विलयमेति यथा भवसङ्कटम् ॥१०॥
कटरि ! ते मुखसुन्दरिमागुणः कटरि ! ते प्रमदोदयिदायिता ।
कटरि ! ते परसौख्यविधायिता, मम__हस्तभवान भवो गतिः ॥११॥
गतिरघो न भवे भविता क्वचित्, न च कुकर्मकदाधिविडम्बना ।
तव जिनेन्द्र ! गुणस्तवकारिणां, सुखमयः समयश्च सदा भवेत् ॥१२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भविकलोकसुकेकिकदम्बके, जलधरायितरूपनिरीक्षणः ।
क्षणविखण्डितकामपरभवो, वसतु मे हृदये भगवान् नयैः ॥१३॥

नयनयोर्भविनां सुविकासिनां, सफलतास्तु विभो ! भवदीक्षणात् ।
जिन ! तव स्तवने तु गिरोरसः, सततमस्तु मम क्रम एषकः ॥१४॥

इति मया गिरिनारविभूषणः, परिणुतो नयतो **गुणनन्दये** ।
मम ददातु स राजिमतीवरः, शिवफलं लघु नेमिजिनेश्वरः ॥१५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ४८ ) पदान्तमालायमकमयम् नेमिनाथस्तोत्रम्

અહીં પ્રત્યેક પાદ વિશેષણરૂપે પ્રભુગુણોનું રસાળગાન કરે છે. અજ્ઞાતકર્તૃક સરળ સંસ્કૃત ભાષાના ૯ પદ્યમાં રચાયેલું આ સ્તોત્ર પદાન્ત માલાયમકમય છે. અર્થાત્ પ્રત્યેક પૂર્વપાદના અંતિમ સસ્વર બે વ્યંજનોને ઉત્તરપાદની આદિમાં ગૂંથી લેવામાં આવ્યા છે.

मुखकान्तिविनिर्जितसत्कमलं,
मलवर्जितभूघनमस्तमदम् ।
मदनज्वरवर्ज्जनवैद्यनिभं,
निभनामभुजङ्गमवज्ञिजितम् ॥१॥ [तोटकम्]

जितदुर्जयमोहमहीशबलं,
वलयीकृतकान्तवपुर्महसम् ।
हसनीयकुवादिजयप्रगुणं,
गुणरञ्जितसज्जनभूमिभुजम् ॥२॥

भुजपादपलम्बितविष्णुहरिं,
हरिपाधिपशक्तितिरस्करणम् ।
रणरङ्गविनिर्हतवैरिगणं
गणनातिगगेयगुणाभ्युदयम् ॥३॥

दयया परिरक्षितजन्तुवनं
वनजोपमपादनतत्रिशम्[१] ।
दशनद्युतिदीप्रमुखैणभृतं[२],
भृतभूवलयं सुकृतैः सततम् ॥४॥

---

१. वनं - जलं, वनजं - जलजं कमलम् । २. एणः - मृगः, एणभृत् - मृगभृत्, तं, चन्द्रम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तततामसराशिविनाशकरं,
करणाह्वतुरङ्गवशीकरणम् ।
रण[3]रम्यतयानुकृताम्बुधरं,
धरणीधरवन्दितपुण्यपदम् ॥५॥

पदपद्मविभूषितमार्गभुवं,
भुवनार्च्यचरित्रपवित्रतमम् ।
तमदम्भतयाहृदि नेमिजिनं,
जिनदत्तमये द्रियतामनघं[4] ॥६॥ षड्भिः कुलकम् ॥

न घनाघनकज्जलकालरुचिं,
रुचिरां तनुमीश्वर ! किं वहसि ।
हसितद्युतिसुन्दरवक्त्रजनं,
जनयन्दृढमर्जितधर्मकलम् ॥७॥

कलयन् भुवनाद्भूतभाग्यभरं,
भरतार्द्धजनेषु मुदं जनयन् ।
नयनैर्जितपङ्कजपत्र ! महन्,
महनीयमुमुक्षुमहेन्द्र जय ॥८॥

इति कवीश्वरवाग्विषयीभवन्,
भुवनमद्भुतभाग्यभरश्रियः ।
यदुकुलाभ्रनभोमणिमण्डली,
जयतु नेमिजगत्रयनायकः ॥९॥ [द्रुतविलम्बितम् ]

---

३. रणः – ध्वनिः । ४. प्रतौ तु इदं – 'जिनदत्तमुएदंविनवीनघम्' ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ૪૯ ) कमलबन्धमयश्रीनेमिनाथस्तवनम्

આ સ્તોત્ર પંચજિન સ્તવન અંતર્ગત છે. ૮-૮ પદ્યમાં પ્રાકૃત ભાષામાં પૂર્વોક્ત પાંચ પરમાત્માની ભાવવાહી સ્તવના અહીં થયેલી છે. જો કે પ્રાપ્ત હસ્તપ્રતમાં લિપિકારથી મહાવીરસ્વામી પરમાત્માનું સ્તવન છૂટી ગયું છે. રચના તો પાંચે પરમાત્માની થઈ છે. જેનો ઉલ્લેખ કવિશ્રીએ કર્યો છે.

'इअ उसह जिणिंदे, संतिनाहे अ नेमि,
जिणवरसिरिपासे, वद्धमाणे ति पंचा ।
विमलकमलबंधेनेव सेवारएणं,
इह अमरगिरिम्मि संथुआ दिंतु सिद्धिं ॥'

આ ઉલ્લેખ પ્રમાણે પાંચ પરમાત્માના સ્તોત્ર અમરગિરિ પર રચ્યા છે અને દરેક સ્તોત્ર કમલબંધમય છે. આદિનાથ સ્તવનના અંતે કવિશ્રીએ પોતાનું નામ આપ્યું છે.

'विजयदानगुरुपयपंकए, भमरएण रएण जिणं थुओ ।
कमलबंधमएण मए थुई, नयरदेवगिरम्मि गिरंवई ॥'

આ ઉલ્લેખ અનુસારે વિજયદાનસૂરિના શિષ્ય જિનરત્નજીએ પ્રસ્તુત સ્તોત્રની રચના કરી છે. તથા અમરગિરિ=દેવગિરિ નામના નગરમાં રચના થઈ છે.

પ્રત્યેક શ્લોકની વિવક્ષા કરીએ તો ચતુષ્દલ કમલબંધમય સ્તોત્ર થાય પરંતુ સંપૂર્ણ સ્તવન પ્રમાણે દ્વાત્રિંશદ્દલ કમલબંધ થાય. અહીં ઉદાહરણ તરીકે બે શ્લોકની અષ્ટદલ કમલાકૃતિ આપી છે.

શબ્દાલંકાર ગૂંથતા પણ સ્તવનનો ભાવપક્ષ અખંડિત રહ્યો છે. જે આ કૃતિની આગવી વિશેષતા છે.

Jain Education International For Personal & Private Use Only www.jainelibrary.org




विस्सचिंतामणी नेमे, विस्सलोअसुरद्दुमे ।
विस्सलोआण विस्सामे, विस्साणंदकरागमे ॥१॥ [सिलोगो]

विस्सवाविजसुद्दामे, विस्साऽसमतणूरमे ।
अमोहमोहसंगामे, जयलच्छीवरंगमे ॥२॥

सिवापुत्ते सिवारमे, सिवानहे समासमे ।
हेलाए हयदुक्कामे, मुत्तिसुंदरीसंगमे ॥३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चंदो इव कलासोमे, तेअसा जह अज्जमे ।
देविंदवंदिए वामे, जिणिंदाणं दुवीसमे ॥४॥

सम्मं गुणेहि निस्सीमे, वासुदेवच्चिअक्कमे ।
जोगीसरकयप्पेमे, लोइक्कपुरिसुत्तमे ॥५॥

अणुत्तरकयखेमे, खंतिए णुत्तरखमे ।
अणुत्तरपहाधामे, अणुत्तर परक्कमे ॥६॥

चच्चरज्ज-रमा-रामे, भावंगीकयसंजमे ।
उच्छिन्नदव्वभावाऽऽमे, छिन्नकोहे अनिम्ममे ॥७॥

रिट्ठवण्णतणूधामे, हरिवंसाऽसमऽज्जमे ।
रिट्ठनेमि जिणिंदे मे, देउ सेवं जगुत्तमे ॥८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ૫૦ ) यमकमयं नेमिजिनस्तोत्रम्

સોમપ્રભસૂરિજી વિરચિત આ સ્તોત્રમાં યમકાલંકારની પ્રકૃષ્ટ ગૂંથણી છે. પદાન્તયમક, પદાદિયમક, સંપૂર્ણપાદયમક, તેમાં પણ દ્વિતીય-ચતુર્થપાદ, દ્વિતીય-તૃતીયપાદ, પ્રથમ-દ્વિતીયપાદ, પ્રથમ-તૃતીય પાદ, પ્રથમ-ચતુર્થપાદ વગેરે અનેક પ્રકારના યમકો આ સ્તોત્રમાં રહેલા છે.

અહીં એ નોંધવું યુક્ત ગણાશે કે આવા યમકાદિ પ્રચૂર સ્તોત્રો ટીકા વગર દુર્બોધ હોય છે. આથી યમકપ્રધાન સ્તોત્રોમાં જ્યાં પદચ્છેદ દર્શક ચિહ્નયુક્ત પ્રતો મળી ત્યાં તેનો આધાર રાખ્યો છે. અન્યથા સ્વક્ષયોપ-શમાનુસારે સંપાદન કર્યું છે.

૩૨પદ્યમય સંસ્કૃતભાષાનિબદ્ધ આ સ્તોત્રના રચયિતા સોમપ્રભસૂરિજી પ્રભુવીરની ૪૭મી પાટે બિરાજમાન તપાગચ્છીય ધર્મઘોષસૂરિજીના શિષ્ય હતા. તેમનો જન્મ વિ. સં. ૧૩૧૦માં, દીક્ષા સં. ૧૩૨૧માં, આચાર્ય પદ ૧૩૩૨માં અને સ્વર્ગગમન ૧૩૭૩માં થયા હતા. તેઓશ્રીએ યતિજીતકલ્પ તથા અનેક વિદ્વત્તાપૂર્ણ સ્તોત્રોની રચના કરી છે. તેઓ જ્યોતિષવિદ્યામાં પણ કુશળ હતા. તેઓશ્રીએ કોંકણદેશમાં વરસાદ ઘણો પડવાને કારણે થતી અપકાયની વિરાધનાથી બચવા તથા મોટી મારવાડમાં શુદ્ધ અચિત્ત જળની અછતને કારણે બન્ને દેશોમાં સાધુના વિહારોનો નિષેધ કર્યો હતો.

માંડવગઢના મંત્રી પેથડશાએ જુદા-જુદા સ્થળે બંધાવેલા ૮૪ જિનાલયોમાં પ્રતિષ્ઠા સોમપ્રભસૂરિજી પાસે કરાવેલી.

પૂર્વોક્ત જિનપ્રભસૂરિજીએ જે સોમચંદ્રસૂરિજીને પાટણમાં પદ્માવતી દેવીની આજ્ઞાથી ૯૦૦ સ્તોત્રો આપ્યા હતા તે આ જ સોમચંદ્રસૂરિજી છે.

पदपावितभूमिमण्डलं, स्वगिरा बोधितभूरिमण्डलम् ।
वदनास्तमृगाङ्कमण्डलं, नुत नेमिं जितदोषमण्डलम् ॥१॥ [प्रबोधिता]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वलितः[१] शिवसम्पदारुणक्रमणस्त्वं जिन ! पापदारुणः ।
विलयार्थमकोपदारुण-ज्वलनोऽर्त्तिकमलापदारुणः ॥२॥।
प्रत्यूत सर्वं सहसारतेजस्तापं समेस्त्वं सहसाऽरतेऽजः ।
व्यघाः सुधावाक्यनिधानवद्यः, पुंसामभीष्टं बहुधाऽनवद्यः ॥३॥ [उप०]
त्वं भिन्द्धि मे कामरसं सदेह, विराज्यऽनेकाऽमरसं स देह ।
यो वन्दितः पीवरमोदयेन, मनोरमोऽतीवरमोद ! येन ॥४॥
यस्ते गिरोऽकष्ट ! पपावनेशत् तस्मात् तमो विष्टपपावनेश ! ।
तेन स्मरश्चेभरदाऽवदातयशोऽऽघवल्ली भरदावदातः ॥५॥
तस्मै नमस्तेऽभवतादऽमाय !, येन प्रयत्नो भवता दमाय ।
चक्रे गरीयःकरुण ! क्रमेण, क्षिप्तानि कर्माण्यरुणक्रमेण ॥६॥
नयस्व मे सन्तमसं तनुत्वं, बुद्धिं सुसाधूत्तम ! संतनु त्वम् ।
भवान् शिवश्रीगलसज्जहार !, यः पापमिद्धाङ्ग ! लसज्जहार ॥७॥
त्वयीश ! यः स्यान्नतिभागऽभीराऽ-वाऽऽभाति तस्य प्रतिभा गभीरा ।
दत्ते च काऽमन्द-रमा-पदस्य, शान्तस्य कामं दरमापदऽस्य ॥८॥
स त्वं तमोऽकाम ! धुनीहि तेन, जिते रसाला-मधुनी हितेन ।
वाक्येन यस्याऽपकृताऽमृतेन, दत्ताङ्ग्रिमाला सुकृताऽमृतेन ॥९॥
वीक्ष्याऽब्जिनीबान्धवनव्यधाम ! दवोपमक्रोधवन व्यधाम् ।
मुदं तवांऽहोरहिताननन्त दहन् यदुच्चैरऽहितानऽनन्त ॥१०॥
त्वं संविदा चारु तमःकृशानोः, भियः सृजेशोरुतमः कृशानो ! ।
पयोदनिन्दाबुधराव यस्य, न्रऽयेऽघपङ्काम्बु धरावयस्य ! ॥११॥
शश्वज्जयाऽधीश्वर ! स त्वमिद्ध-प्रभाऽवशस्तारतपावनस्य ।
श्रेयस्तरो यस्य यशो बभासे, प्रभावशस्ताऽरत-पावनस्य ॥१२॥
अपाऽस्त मोहाऽनिकृते[२] पराम, निरासको येन नतस्तवमीश ! ।
अपास्तमोहा-कृतेऽपराम, कृतोद्यमस्तं भवभीमसिन्धोः ॥१३॥

१. 'कलितः' - ने. । २. 'मोहाविकृते' - ने. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्वत्पदौ नमत ईयुषः क्षमा-वास-राभसिकतामनागसौ ।
याऽलिके लगति नाऽशुभा तमो-वासराभ ! सिकता मनागसौ ॥१४॥ [रथोद्धता]
नाशमीश ! स यशोस्तपूर्णिमा-राजतार मम लम्भयाऽऽपदः ।
यस्य ते गुणकदम्बकं सदाऽराजताऽऽरममलं भयाऽऽपदः ॥१५॥
मोहमल्लमिह संपदा नमन्-मानवाऽरणमतेरऽयादिमम् ।
आन्तरारिनिकरे मम प्रभो !, मान-वारणमते ! रयादिमम् ॥१६॥
अवधि दोषततिर्भवता जवाद्, दृतसुवर्णगिरा विहतापदा ।
जिन ! सुरैः कृतजन्ममहः क्षमाऽऽदृत सुवर्णगिराविहतापदा ॥१७॥ [द्रुत०]
पदयुगं मनुजेन विनम्यतेऽमितकला वहता विनताऽऽवकम् ।
शिवपुरे गमनाय पदे श्रिया, मितकलावऽहताविन तावकम् ॥१८॥
नेमे ! महामोहतमारवेऽगधीराऽजित ! त्वामतमोक्ष ! मान ।
नेमे महामो हतमारवेग !, धीराजितत्वामत मोक्षमा न ॥१९॥ [उपेन्द्रवज्रा]
महोदयाऽऽसीन रवीरसार-महोऽदयासी नरवीर ! सार ! ।
क्षमारतेहाऽसमदानवाद्यऽक्षमारतेऽहासमदानऽवाऽद्य ॥२०॥ [इन्द्रवज्रा]
हृद्याऽऽननाऽऽगोऽपमनोऽसमाय, शमाऽतनो राम यमोहमान ।
शमाऽऽतनोऽऽरामय मोह-मान-हृद्यानना गोपम ! नोऽसमाऽय ॥२१॥ [उप०]
अष्टमीविधुसमानभाल ! यस्त्वामवन्दत वरप्रभालय ! ।
संश्रयन्ति सततं शुभालयस्तं सरोरुहमिवाऽनिभालयः ॥२२॥ [रथोद्धता]
राज-राजतगिरि-स्फुरद्यशोरा-जरा-जनन-हीन मे जिन ! ।
राजराजदमरैः पिपासितेराऽजराजस-भरं त्वमञ्जसा ॥२३॥
गतसङ्गर ! सङ्गर ! सङ्गरसो, धृतिमानऽवमानवमानवरैः ।
नृसभाऽवन-भावनभावविधे !, समतारत ! तारतताऽरतधीः ॥२४॥ [तोटकम्]
जिततमोऽक्ष ! तमोऽक्षत ! मोक्षभाग्, प्रसृमराऽऽगम-राग-मराऽऽगसां ।
अश-मनोद ! मनो-दम नोदयं, ध्रुवमऽदारमऽदाऽरमऽदारयत् ॥२५॥ [द्रुत०]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अशमना-शऽम ! नाशमना ! जिनोत्तम ! स-तामस-तामस-तातशम् ।
परमऽहार-महार-महार्यऽयाध्वगतरो-गतरोग-तरो व्यधाः ॥२६॥

प्रबलभावमलिम्लुचसञ्चयं, जिन ! वधान वधाऽनवधान ! मे ।
निधिरमामपि मय्यवृषांजगत्, सुनवधा नवधा नवधाम ! मा ॥२७॥

सपदि स त्वमपास्य मम प्रभो !, परमतार-मता-ऽरमतामिह ।
शमरसे जिन ! यस्य मनो मुनीश्वर ! मताऽरमताऽरमऽतामस ! ॥२८॥

कृतीन ! पापोनमते ! नयस्व नः, साध्वाऽऽनत ध्यानतपोनराऽवन ।
वर्याऽऽननेशानभिमानतर्जनः[३], कृपामयः सातत्तरावर्वेभितः[४] ॥२९॥ [उप०]

भविकजनहृदन्तः प्राज्य मुक्त्वार्युदन्त,
प्रहतमिति वदन्तस्तेत्रिलोकीभदन्त ।
गुणपटलमिदन्तदेहिनो व्यापदन्त,
क्षमभृशमनुदन्तस्त्वं तमः कुन्ददन्त ! ॥३०॥ [मालिनी]

सुमह-समु-हरिद्रः सुन्दराऽऽस्योदरास्यो-
नितवनितवरेण्योदर्कधामार्कधामा ।
मम शममऽशसन्नऽत्राऽममोक्षाममोक्षा,
सिक-रसिक-रजोऽरिध्वंसने तासनेता ॥३१॥

देवेन्द्रवन्दित ! शिवासुत ! यः सुविद्या-
नन्दं भवन्तमिति नौति **सुधर्मघोषम्** ।
हर्षादखण्डगुणकैरवखण्डबोध-
**सोमप्रभं** स लभते भविको भवान्तम् ॥३२॥ [वसन्ततिलका]

---

३. '०शाऽनयहा नवासनः' - ने. । ४. '०तराऽवनेयवान्' - ने. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ५१ ) गुरुशिष्यनामयुतं यमकमयं नेमिजिनस्तोत्रम्

આ સ્તોત્ર પણ ઉપર્યુક્ત સ્તોત્રની જેમ જ વિવિધ યમકાલંકાર મંડિત છે. ૩૧ અનુષ્ટુભ્ અને અન્ત્ય શાર્દૂલવિક્રીડિત છંદોબદ્ધ આ સ્તવની હસ્તપ્રતમાં રચનાન્તે 'गुरुशिष्यनामयुतं' આવો ઉલ્લેખ છે. કર્તાનું અને તેમના ગુરુનું નામ ગર્ભિત રીતે રહેલું છે. પરંતુ તે કઈ રીતે ? તેનું શોધન બાકી રહે છે. જોકે અંતિમ પદ્યમાં 'जिन', 'प्रभ' અને 'विमल' શબ્દો પ્રયોજાયેલા છે. તે પરથી કદાચ 'જિનપ્રભ' અને 'જિનવિમલ' ગુરુનું અને કર્તાનું નામ હોઈ શકે.

महिमानल्प ! नेमीश !, महिमानलतुल्य ते ।
महिमानततेः श्लाघ्य !, महिमानवमुक्तिद ! ॥१॥ [अनुष्टुभ्]
कलयाम ! वयं ब्राह्मे, कलया मतिदं वचः ।
कलयामस्तव स्वामिन् !, कलयाऽमलया युतम् ॥२॥
विशारदसमेतेश, विशारदवीद्धगीः ।
विशारदरुचाकुन्द, विशाऽऽरदमिता हृदि ॥३॥
*भाऽऽवासमहवारैर्यो, भावासमभये शिवे ।*
भाऽवासमनतेर्ज्ञात, भावासमद ! देहि मे ॥४॥
तार-काय-सुरश्रेणी-तारकाऽऽयत-संसृतेः ।
तारकाऽऽय ! गुणाऽपास्त, तारकाय ! नमेन्नते ॥५॥
रामानयननिष्कम्पो, रामान ! यमवर्जित ! ।
रामानयष्ट इष्टागा, रामाऽऽनयमुचां गुणान् ॥६॥
नवनीरदनादाख्या, नवनी-रक्षणं व्यधाः ।
नवनीरततत्वानी, नवनीरम्यमुत्तरो: ॥७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

समानमदमर्त्येशा !, समानमलते गुणान् ।
समानमदनाब्जेन्दु-समानमनसा श्रये ॥८॥

कमला मनतास्त्रैन्द्री, कमलामलदीधिती ।
कमलामतिदौ ! शङ्घा, कमलामय हृद्वयम् ॥९॥

परमायद ! क्लृप्ताघ !, परमायमिनः पदम् ।
परमायन् हतोपास्ति, परमाय ! नतास्त्वयि ॥१०॥

क्षमापदसदा पावि, क्षमापद सरोरुहैः ।
क्षमापद सनेतेस्त्रा, क्षमापद समान्तिकम् ॥११॥

विभावरीशास्य भवत्यतुल्य, विभावरीनस्यति यस्य भक्तिः ।
विभावरीयोऽगतमङ्गजद्री, विभावरीरीवसुनिर्विशेष ॥१२॥ [उपेन्द्रवज्रा]

स त्वं जयोक्त व्रतभावनाग, धीरप्रबुद्धाखिलभावनाग ।
मोहद्रूमे यस्य विभावनाग, पत्रालिसान्द्राहि बभाव नागः ॥१३॥ [उप०]

महोदयासक्तसुरेन्द्रपृष्ट ! महोदयायेश ! ममैधि बोधः ।
महोदया धामविशुद्धकर्म, महोदयामोसिथ देहिनां यः ॥१४॥

सुपर्वसार्थोऽयमशंसदार-विदारणव्यग्र ! भृशं सदारः ।
तं कामशैले कुलिशं सदार-मञ्चन्नकस्त्वां शिवशंसदार ॥१५॥

विभो ! गदामि स्तवनं तवाब्द-विभो ! गदागम्य शरीरयोभूः ।
विभोगदामोदरविक्रमाद्रा, विभो ! गदाद्यायुधसङ्गहीन ! ॥१६॥

संसारवासाय तमोहसेन ! संसेव्य संवित् परमोहसेन ।
निस्सीमभास्वन्महिमोहसेन, हीनो जिन ! त्वं हतमोहसेन ॥१७॥

कारोपमत्तस्मरभीः कृताङ्गि-कारोपमर्त्यामरसेव्य तेषाम् ।
कारोपमः कश्चभवः शुभोपकारोपमन्युस्त्वमुपासितो यैः ॥१८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सदामयोषित्पटलं महेन् [न यः] सदा महोल्लासकरौ यदङ्घ्री ।
सदा मयोपास्यत एष भिन्नः, सदा मयोभक्तिभरेण नाथ ॥१९॥
त्वद्राषितानां गुणभाजनानां, श्रेणिः सुभाग्यैः सुलभा जनानाम् ।
जगत्त्रयीदत्तशुभाजनानां, गिः संशयानां सुविभाजनानाम् ॥२०॥
स्थितः स मोक्षे विभुतापदेव, मामस्तभव्यान्तरताप देव ।
सा याद्यसा तं जनतापदेव, यस्मै नमस्कृत्य हतापदेव ॥२१॥
दयेहरीलाप नुताशिषं स, दयेहरीतिप्रददेव तेषाम् ।
दयेहरीणा घनताः सुपुण्यो-दयेहरीशत्विषि ये त्वयीश ! ॥२२॥
दिश्याः स मे शस्युपमानवारि-मुखः सुखं त्वं मतिमानवारि ।
मुक्तिः क्षमावीरुदमानवारि, येन स्मरश्चास्यत मानवारिः ॥२३॥
मयागमश्रेणिनयप्रमाणा, मयागमः सेव्यत एष देवः ।
मयागमद्योनमदं समस्ता, मयाऽगमत्तद्विरदो महत्या ॥२४॥
नवा त्वयि ध्वस्तसुधामहेलाऽवाप्ताऽमराली बहुधा महेलाः ।
वा चिक्षिपुस्त्वां गुणधामहेला, दक्षाः सुराणां विविधा महेलाः ॥२५॥
कोपायशाखीभन तुभ्यमस्त-कोपाय शास्त्रे शमिनां शिवस्य ।
कोपायशाम्यद्दुरित प्रभावौ, कोपायशोनाथ नमस्करोति ॥२६॥
प्रभो ! निरस्तस्फुरदक्षमाय, तं याति भीतिक्षयदक्षमायः ।
तुल्यं नमस्यत्यमदक्षमाय, रक्षासु पुंसां विशदक्षमाय ॥२७॥
मुक्तावदान्योत्तम ! येन दोषा, मुक्तावदारौत्सुकनन्दसत्वम् ।
मुक्तावदातोरुगुणद्रुमाम्भो, मुक्तावदास्ते रविरेष यावत् ॥२८॥
भवान् भवाब्धिर्निजपादराग-जितारुणाम्भोज ! कृपादराग ! ।
धैर्येण भव्यालिमपादराग, रणेऽस्तलक्षक्षिति पादरागः ॥२९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

महानयस्थान सृजन्तु पुंसां, महानयस्तस्य तवेश वाचः ।
महानयः शार्ङ्गिवधूभिरिद्ध, महानयः क्षोभमलोभनीतः ॥३०॥

वन्दे जिनं सर्वकलापदन्तं, सदा मुदा कुन्दकलापदन्तम् ।
कुर्वन्तमुच्चैः सकलाऽऽपदन्तं, गुणावली यस्य कलापदन्तम् ॥३१॥

यस्त्वां श्रीजिन ! शीर्ण--तमसं भूशोकनाशेश्वरं,
सद्वाचं विमलस्तुतेऽमितमुदानङ्गप्रभाखण्डनम् ।
यत्नाद्रम्यदयं शिवासुतमिति प्राणिप्रियं रक्षतं,
तन्द्रापायनिरासका भयभवारम्भादनं तद्द्रुतम् ॥३२॥ [शार्दूलविक्रीडितम्]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ५२ ) पञ्चवर्गपरिहारश्रीनेमिनाथस्तवः

૨૩ પદ્યનું આ સ્તવ સંસ્કૃત ભાષામાં રચાયું છે. સ્તવનામપરથી જ રચનાની વિશેષતાનો બોધ થઈ જાય છે. કે કર્તાએ વર્ગીય ૨૫ વ્યંજનોનો ત્યાગ કરી માત્ર य्-र्-ल्-व्-श्-ष्-स्-ह् આ આઠ વ્યંજનોનો ઉપયોગ કરી નેમિનાથ પરમાત્માની સ્તવનાસ્વરૂપે ૨૨ પદ્યોની રચના કરી છે. તેમાં પણ ઉપજાતિ, ઉપેન્દ્રવજ્રા, શાલિની, દોધક, સ્વાગતા, રથોદ્ધતા, પ્રબોધિતા, વંશસ્થ, તોટક, સ્રગ્વિણી, ભુજંગપ્રયાત, દ્રુતવિલમ્બિત, વસન્તતિલકા, મંદાક્રાન્તા, શિખરિણી, શાર્દૂલવિક્રીડિત, સ્રગ્ધરા અને માલિની આ ૧૮ છંદોનું નિયોજન કર્યું છે. આ સર્વ વસ્તુસ્થિતિ કર્તાની અસામાન્ય વિદ્વત્તાનો પ્રઘોષ કરે છે.

અન્ત્ય પદ્યમાં કર્તાએ સ્વનામોલ્લેખ કર્યો હશે કારણ કે આ પદ્ય પંચવર્ગપરિહાર નથી અને ઉત્તરોત્તર વૃદ્ધિ પામતા સ્વરબંધારણના છંદોમાં ૨૧ સ્વર સુધી ચડ્યા પછી ૧૫ સ્વરનો માલિની છંદ પ્રયુક્ત કર્યો છે. આથી, કર્તાનું નામ અહીં હોઈ શકે. પરંતુ, તેના વિષે સ્પષ્ટ મન્તવ્ય બાંધી શકાય તેવું જણાતું નથી.

शैवेयसार्वं सरसं सहस्रवर्षायुषं शीलसरोरुहांशुम् ।
सेवेऽहसं संवरवैरिवारि-वाहस्य वायुं शिवशं यियासुः ॥१॥ [उपेन्द्रवज्रा]

वयस्य विश्वावलयस्य सर्वसहर्षहर्यश्वरसेशसेव्य ! ।
सहासयोषाविसरोरुहावैरविह्वलश्रेय ऋषीश ! राहि ॥२॥

सर्वंसहायां विससारहारि, विहाय सीलाविवरेसु लीलम् ।
उल्लासि शैवेय यशोहरस्वर्वशेश हंसावलिसावहेलम् ॥३॥ [उपजाति]

श्रीशैवेयं हारदूराररसाला, सुव्याहारं शिश्रियुर्ये विशालम् ।
शश्वल्लोलं स्वैरिविश्वार्यवश्यं, ह्याशूवास श्रेय एषां सवेशे ॥४॥ [शालिनी]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शेषसहस्त्रवसुव्ययराहो, या वरसोस्त्रशयांह्रिसलीलं ।
आर्यसुलास्यरसेस्यसिशंसा, श्रीवरसारविहासिसहासं ॥५॥ [दोधक]
सारसारसवरास्य ! शरीर-व्यूहसंशयरसाव्ययसीर ! ।
अंहसां हि सहसाहरराशिं वारलावर ! शिवोरुसरस्याम् ॥६॥ [स्वागता]
वासवालिवरिवस्य ! वै सुरी-वाररासविषये रसश्रयः ।
वीषयाहरसि हर्षवल्लरीष्वालवाल-सुवृषश्रियं स्वया ॥७॥ [रथोद्धता]
व्यशसीरलसोवशास्वहो, विषयाशांविषयूषवल्लयी ।
उरशीलरसेविशैशवा, वसरेलं वयसीश हेलया ॥८॥ [प्रबोधिता]
अवार्यवीर्यो विषयैरुषेश्वरः, शिवाविशालाशयसंवरालये ।
विहारहारैः सरलैर्वरीयसीं, श्रियं स्वयं रासिरसावशोरसि ॥९॥ [वंशस्थ]
हरिवंशवहेशशशीष्यवृषव्यवहारविशेषरसूलरसे ।
अयसारहरेरुरुशैर्यशयं, सरलं सरयं महसावशयः ॥१०॥ [तोटकम्]
साहसावाससर्वंसहारं शिरः-शूलवंहीयसां वारयाश्रेयसाम् ।
वैर्यवश्यायवाराश्रयाशावृषं, रंहसा हीलविश्वासशालाविशाम् ॥११॥ [स्त्रग्विणी]
वरीयोवसायाश्रयोविश्रसो यैः, शिवासूरसावाश्रवैः शिश्रियेऽलम् ।
विलोलाश्रवाऽहौविहायोर्य एषु, श्रियः सर्ववेलर्वहेयुर्वुवूर्षा ॥१२॥ [भुजङ्ग०]
अवि-शश-र्यविसारि-सुसारसं, रुरुवराहसरौहिषसंवरम् ।
अवसि वैरिशशारुरहिंसया, विरहशल्यवशं विरसारवम् ॥१३॥ [द्रुत०]
वासः सुवेषवसुहारिहयं रिरासो,
रीशस्यहेलिसुवसोरिह रोरराशौ ।
आशासु विश्ववरशीलयशोविवेशा,
ऽशेषासु शेषशिवशैलशिलाविलासि ॥१४॥ [वसन्ततिलका]
इष्वासाऽसी अरियवशरं सौवयोरर्हयोर्ये,
श्रीवासायश्रयसि शययोरीश्वरांह्योरवश्यं-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शैवेयारं हरि-वरवृषौवासवाहार्यसिंहौ,
वारीशं वाससरसिरुहं सेव्ययोः शस्य वस्वोः ॥१५॥ [मन्दाक्रान्ता]

असाहाय्यः सायं य उषसि सिवव्यूह ! वयसाम्,
सुसालं संवासेऽहर-हरि-हसंवेशविरहे ।
सिषेवे शैवेयं सुरविसरशस्यं सवयसम्,
स शुश्रूषे सालं वरवृषरहस्यं-ह्यवससौ ॥१६॥ [शिखारिणी]

श्रेयोलालसविश्ववीरविलसल्लीलारिशांस्याहवे,
हंसेर्यो हरिवंशवर्यसरसश्रीशीर्षहीरो रुषाम् ।
हंस्येलाविशरारुवाललवलीसर्वस्वसुस्वास हे !,
सूयावाहवृहल्लुलाय सहसाशंव्यालहिंसाहरे ! ॥१७॥ [शार्दूलविक्रिडीतम्]

विस्रांहोवारिराशेरविरललहरी व्यासऋष्योर्वशे यः,
संसारायासविश्वारुहविलय उरो हव्यवाहो विवाह ।
आवासे वै शिवाह्वे शिवसलिलसरः शोषसूरार्यवर्षा,
सारो वावस्य सेरं वरसरसरवः संवरव्रीहि शस्ये ॥१८॥ [स्रग्धरा]

इति विगलदवद्यः त्वां जिनेशानुवद्यः,
प्रकटितशिवपद्य प्राज्यविभ्राजिविद्य ! ।
तमसमदयसद्यः पाहि नेमे ! प्रसद्य,
प्रचुरमहिमहृद्य ! क्लेशराशेस्त्वमद्य ॥१९॥ [मालिनी]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ५३ ) नेमिजिनस्तुतिः

સરળ સંસ્કૃતભાષામાં ૯ પદ્યમાં રચાયેલી આ સ્તુતિના કર્તા ચતુર્ભુજ નામના ગૃહસ્થ કવિ છે. શ્રીનેમિનાથપ્રભુની સ્તવનામાં વિશેષણપદ્ધતિને અનુસર્યા છે. પરંતુ, સમમાત્ર છંદનું નિયોજન અભિનવ છે.

આ સ્તુતિ પર વિ. સં. ૧૯૨૩ કાર્તક સુદ પૂર્ણિમાના દિવસે બાલુચર નગરમાં અમૃતચંદ્રસૂરિજીના સાનિધ્યમાં રહીને રામચંદ્રઋષિએ 'પ્રકાશ' નામની ટીકા રચી છે. જે પ્રસ્તુત સ્તુતિના ભાવ સુધી પહોંચવા માટે સુગમ સેતુસ્વરૂપ બની છે. ટીકાન્તે પ્રયુક્ત 'कृपालुविपश्चिद्भिः संशोध्यमेतत्' પદ કર્તાની નમ્રતાનું દ્યોતક છે. ૬ઠ્ઠા પદ્યની ટીકામાં રામચંદ્રઋષિએ ટાંક્યું છે કે 'આ પદ અશુદ્ધતર છે, યથાકથંચિત્ તેનું સમર્થન કર્યું છે.' આ ઉલ્લેખ પરથી એવું અનુમાન થાય છે કે સ્તુતિ કર્તા ચતુર્ભુજ રામચન્દ્રર્ષિ કરતા ઘણા પૂર્વવર્તી હોવા જોઈએ, જો કે કર્તાએ 'यद्वा मम बुद्धेः मान्द्यरूपदोषेण सम्यग् अर्थः न अवभासितः' કહીને સ્વનમ્રતા દર્શાવી છે. ટીકામાં રૂપસિદ્ધિ માટે પાણિનીયના સૂત્રો ટાંકવામાં આવ્યા છે.

આ સ્તુતિની વિશેષતા એ છે કે ગૃહસ્થની રચના પર શ્રમણ-ભગવંતે ટીકા રચેલી છે.

**जय जय यादववंशावतंसजगत्पते !**
**समुद्रविजयनरराजशिवासुतसन्मते ! ।**
**जय जय जनताजननजलधितारणतरे !,**
**सावभावयोगीन्द्रसहोलवजितहरे ! ॥१॥** [सममात्रम्]

नमोऽस्तु व्याप्तिरूपाय, व्यक्तिरूपाय ते नमः ।
नमोऽस्तु स्फोटरूपाय, सिद्धरूपाय ते नमः ॥१॥

अथ प्रकृतिमनुसरामः ॥ **जय जय यादववंशेति-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्वं जय त्वं जय सर्वोत्कर्षेण जेतृत्वगुणविशिष्टो भव। क्रियासमभिहारेऽत्र द्विर्वचनं, लोडन्तपदमेतत्। यदोरपत्यानि यादवास्तेषां वंशो हरिवंश इति। यद्वा यदोरयम्, इदमर्थोऽण्, यादवः, स चाऽसौ वंशश्चेति कर्म्मधारयः। यदुराज्ञः प्रादुर्भूता यादववंशस्य ख्यातिर्लोके इति। तस्य तस्मिन् वाऽवतंसः-शेखरो चूडामणिः शिरोभूषणविशेष इव प्रकटीभूतो जगतां पतिर्यः स। तस्य सम्बोधने - **हे यादववंशावतंसजगत्पते ! त्वं जय।** अत्र सर्वत्र समस्तवृत्तपदेन सम्बोधनमग्रेतनपादे तथैव प्रदर्शितत्वात्। स्तुत्यादौ पुनरुक्तिदोषोऽपि न भयावहः। पृथक् पृथक् सम्बोधनत्वेऽपि न क्षतिरिति स्वधियैव सम्यक् प्रतिवार्य (प्रविचार्य) वक्तव्यं मनीषिभिः, तत्राऽस्माकं नाऽत्यादरः, किं बहुना जल्पनेनेति दिग्। द्वौ जिनौ हरिवंशे समुत्पन्नावतो विंशति[त]मजिननिरासार्थमन्यद् विशेषणं विशिनष्टि। एवं सर्वत्र स्वधियैव भावना कार्या इति।

समुद्रविजयनरराजेति। राजते-शोभते इति राजा, तेषां तेषु वा राजा नरराज इति राजाहःसखिभ्यश्चेति तत्पुरुषे टच्-प्रत्ययस्ततः कर्मधारय-स्ततो['शिवा' तया सह] द्वन्द्वस्तयोः सुत इति तत्पुरुषस्ततः सन्मतिना सह कर्मधारयकृते यथेष्टसिद्धिस्तत्सम्बोधने-हे **समुद्रविजयनरराजशिवा-सुतसन्मते !**।

जनानां समूहो जनता, समूहेऽर्थे तल्-प्रत्ययः। जनताया - जनसमूहस्य जननं-जन्म तदेव जलधिः-समुद्रस्तस्य तस्मिन् वा तारणरूपा तरिरिव तरिर्यः स, तत्सम्बोधने-हे **जनता-जननजलधितारणतरे !** त्वं जय।

सवनं-सावः क्षयः, षोऽन्तकर्मणि, अस्माद् भावौ (भावे) घञ्-प्रत्ययः। सावरूपो भावः सावभावः, तद्धितीय-ठक्-प्रत्ययः, क्षायिकभावो निश्चलभाव इति यावत्, सप्तक्षये क्षायिक इति श्रुतेः। यद्वा षुप् सवैश्वर्ययोरस्मादपि घञि कृते सावभावो-बालभाव ऐश्वर्यरूपभावो वा। तत्र त्वं योगीन्द्रः सन्नपि मित्रादि-प्रेरणया आयुधशालायां सहसो बलस्य लवो-लेशस्तेन जितस्तिरस्कृतो हरिर्विष्णुर्येन सः। द्वितयपक्षेऽपि नेमेर्बलवर्णनावसरे हरिपदेन लक्षणया

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इन्द्रसामानिकसुरो ग्राह्यः, शेषं तथैव । एतत् सर्वमितिहासादौ प्रसिद्धमेव । तत्सम्बोधने-हे **सावभाव-योगीन्द्रसहोलवर्जितहरे !** इति ॥१॥

**जय जय जनदुर्वारमारमदगिरिपवे !,**
**सजलजलदशितिवर्णसवर्णतनुच्छवे ! ।**
**जय जय जगति प्रमदकुमुदहिमदीधिते !,**
**करुणारसकूपारविमोचितपशुसिते ! ॥२॥**

**जय जय जनदुर्वारेति** - जनैर्दुःखेन वार्यते इति जनदुर्वारः, स एव मारस्याऽनङ्गस्य मदोऽहंकारः, स एव गिरिः-पर्वतस्तस्य तत्र वा समूलोन्मूलने पविरिव पविर्वज्र इव वज्रो यः सः । 'ह्रादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पवि'रित्यमरः । तस्य सम्बोधने-हे **जनदुर्वारमार-मदगिरिपवे** ! त्वं जय । यद्वा मारश्च मदश्चेति द्वन्द्वे कृते पश्चात् बहुव्रीहिरित्यपि साधु ।

सजलो जलयुक्तो यो जलदो-मेघस्तस्य यो शितिवर्णः-कृष्णवर्ण-स्तत्सवर्णा तुल्या तनोः शरीर[स्य]च्छविर्द्युतिर्यस्य सः, तस्य सम्बोधने-हे **सजलदशितिवर्णसवर्णतनुच्छवे** ! ।

जगति-संसारे प्रमदो यः सौरभ्यगुणविशिष्टः, कुमुदं सितकमलं कुमुदिनीरूपं वा तद्विकाशने, हिमा दीधितिर्यस्य स हिमदीधितिश्चन्द्रश्चन्द्र इव चन्द्रो यः सः । यथा गगनस्थचन्द्रः कमल(कुमुद)वनं प्रकाशयति तथा त्वं तु भविकमल(कुमुद)प्रतिबोधकत्वेनाऽपूर्वचन्द्रोऽसि । 'जगति'-पदे हलदन्तादितिसूत्रेण समासे, सप्तम्या अलुक्, तस्य सम्बोधने-हे **जगतिप्रमदकुमुदहिमदीधिते** ! त्वं जय ।

कुं पृथ्वीं पिपर्ति-पालयति इति विग्रहे पॄ पालनपूरणयोर-स्मात्कर्मण्युपपदेऽण्, अन्येषामपीति दीर्घे कूपारशब्दो लाक्षणिकस्तेनाऽत्र गृहीतो मेघ इति करुणारूप एव रसो जलं तस्य यः कूपारो मेघस्तेन

Jain Education International For Personal & Private Use Only www.jainelibrary.org

करुणार्द्रचेतोभावेन तस्माद् वा विमोचिता दूरीकृता परिणयनसमये पशूनां सितिर्बन्धनता येन सः । यद्वा करुणारसः कूप इव कूपो गाम्भीर्यादिना गुणेन तमर्त्ति प्राप्नोति यः स करुणारसकूपारो गम्भीरतादिगुणयुक्तः सन्, शेषं पूर्ववदेव । अत्रापि कू गतौ, ततोऽणि यथेष्टसिद्धिः । सिंधौपृषोद-राद्याकृतिगणत्वादकारलोपे कथञ्चिद् रूपसिद्धिरिति । तस्य सम्बोधने-हे **करुणारसकूपारविमोचितपशुसिते !** । षिञ् बन्धने ततः स्त्रियां भावे क्तिस्तेन सितिशब्दो निष्पन्न इति ॥२॥

**जय जय स त्वमुदूटिधियाऽऽतुरता सती,**
**त्यक्ता येन विरागवता राजीमती ।**
**जय जय निर्गतदोषकोषनिजगुणतते !,**
**सकलसुरासुरराजरचितसार्चानते ! ॥३॥**

**जय जय स त्वमिति** । उदूटिरूपा धीस्तया आतुरता-व्याकुलीभूता सती राजीमती येन विरागवता त्वया त्यक्ता स त्वं जय इत्यन्वयः ।

निर्गतो दोषकोषो-दोषसमूहो यस्या निजगुणततेरात्मिकगुणविस्तारात् यस्य स यद्वा निर्गता-प्राप्ता दोषकोशात् अनादिकालीनमिथ्या-त्वादि(दे)निजगुणानां ततिः-श्रेणिर्येन सः, तस्य सम्बोधने-हे **निर्गत-दोषकोषनिजगुणतते** ! त्वं जय । ये गत्यर्थास्ते प्राप्त्यर्था इति वैयाकरणानां सिद्धान्तः ।

सकलसुराऽसुरराजभिः रचिता-कृता अर्चासहिता नतिर्यस्य सः, तत्सम्बोधने-हे **सकलसुरासुरराजरचितसार्चानते** ! ॥३॥

**जय जय शमदमलीनपीनसमतारते !**
**भुवनविभूषणवर्णवर्णवारिजगते !**
**जय जय कुमतिकुवाटनिशाटनिशान्तकृद् !,**
**वाग्द्युतिदर्शितभुवनभावपथपीथवद् ॥४॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जय जय शमेति** - शमः क्रोधाऽभावरूपः, दमः इन्द्रियाणां वशीकरणरूपस्तयोर्लीनस्तेन पीना-पुष्टतां प्रापिता समतायां रतिर्येन सः, तत्सम्बोधने-हे **शमदमलीनपीनसमतारते** ! त्वं जय।

भुवनस्य-लोकत्रयस्य विभूषणमिव विभूषणं यः सः सन्, वर्णेन वर्णः श्रेष्ठो वर्णः सोऽस्ति येषां येषु वा तानि वर्णवर्णानि, तान्येव वारिजानि-कमलानि अर्थात् तेषु स्वर्णकमलेषु विहारसमये गतिर्गमनं यस्य सः, तत्सम्बोधने-हे **भुवनविभूषणवर्णवर्णवारिजगते** !।

कुमतिरेव कुवाटः-कुत्सितमार्गस्तत्र प्रवृत्ता ये निशायामटन्ति ये ते निशाटा-निशाचरादयस्तद्धर्मवत्त्वात् पाखण्डिनोऽपि निशाटा एव तेषामदृश्यताकर्णे (करणे) निशान्तकृदिव सूर्य इव सूर्यो यः सः तस्य सम्बोधने-**हे कुमतिकुवाट-निशाटनिशान्तकृत्**। यथा सूर्योद्गते निशाचरादयोऽदृश्यतां यान्ति तथैव पाखण्डिनोऽपि दूरतरे व्रजन्ति अतस्त्वमपूर्वसूर्योऽसि, त्वं जय।

वाचो द्युतिः प्रभा, तया दर्शितो यो भुवनभावो-लोकत्रयात्मकस्य सदसद्रूपभावः स एव पन्थास्तस्य प्रकाशने पीथवत् प्रकृष्टदीपक इव यः सः। यद्वा वाग्द्युत्या पञ्चत्रिंशद्वाणीनां गुणतया दर्शितः-प्रकाशितो भुवनभावपथो पीथवत्-प्रदीपवत् येन तत्सम्बोधनेपि-हे **वाग्द्युतिदर्शितभुवनभावपथ-पीथवत्**!। वत्वन्तस्याऽव्ययत्वात् क्लीबत्वनिर्देशोऽत्रेति ॥४॥

**जय जय दीक्षान्यक्षवृत्तिनिर्वृतिवृते !,**
**कृतरैवतगिरिराजतीर्थताविश्रुते !।**
**जय जय संश्रितसत्त्वसमीहितदायक !,**
**दुर्गतिदवलवनेमिनेमिजिननायक ! ॥५॥**

**जय जय दीक्षेति** - दीक्षया नियन्तानि-वशीकृतानि अक्षाणि-हृषीकाणि इन्द्रियविषयाणि यस्मिन् स न्यक्षः सर्वसंवरात्मको भावरूपस्तद्रूपा वृत्तिः न्यक्षवृत्तिः। सा एव निर्वृतिर्न्यक्षवृत्तिनिर्वृतिस्तस्या वृतिर्वरणं स्वीकारो यस्य सः। अतोऽनन्तचतुष्टयित्वं सिद्धत्वे प्रसिद्धमेव। यद्वा दीक्षान्यक्षवृत्त्या

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निर्वृतेर्मुक्तेर्वृत्तिः-स्वीकारो यस्य सः, तस्य सम्बोधने-हे **दीक्षान्यक्षवृत्ति-निर्वृतिवृते** ! त्वं जय।

कृता रैवतगिरिराजस्य रैवातचलस्य तीर्थतायास्तीर्थरूपस्य विश्रुतिः-ख्यातिर्येन सः, तस्य सम्बोधने-हे **कृतरैवतगिरिराजतीर्थताविश्रुते** !।

संश्रितास्त्वत्शरणं प्रतिप्राप्ता ये सत्त्वाः-प्राणिनस्तेषां समीहितस्य-मनोभिलषितफलस्य दायको यः सः, तस्य सम्बोधने-हे **संश्रितसत्त्वसमीहित-दायक** ! त्वं जय।

दुर्गतिरूपो यो दवो-वनं तस्य यो लव-उच्छेदनं तत्र नेमिरिव चक्रधारा इव नेमिजिननायको यः सः, तस्य सम्बोधने हे **दुर्गतिदवलवनेमिनेमिजिन-नायक** ! ॥५॥ पञ्चभिः कुलकमिदम् ॥

**सुदिनमहो मम चाऽद्य तथा सुदशा धव !,**
**दर्शनमिह यदभूत्किल मेऽप्यघिनस्तव ।**
**सिद्धं चिन्तितकार्यमार्य सफला जनि-**
**रजनिष्टचरीदमन्दभन्दकन्दावनी ॥६॥**

**सुदिनमिति** - हे धव ! - हे स्वामिन् ! अहो इति आश्चर्य(र्ये) । किल इति सम्भावनायाम् । मे-ममाऽपि अघिनः-पापात्मन इह जन्मनि यत् तव दर्शनमभूत् तत् तस्मात् कारणात् मम चाऽद्यतमं सुदिनं सुदशा च वर्तते इति । हे आर्य ! मम चिन्तितकार्यमपि सिद्धं जातम् । मम जनिर्जन्म उत्पत्तिरपि सफला-फलवती जाता । पुनः चरीदमन्दो देशविरतिरूपो यो भन्दः, कल्पद्रुमस्तस्य यो कन्दस्तस्य अवनिरिव क्षितिरिव क्षितिर्देश-विरतिरूपाङ्कुरोपि अजनिष्ट-प्रादुरभूत् मे-मम हृत्क्षितौ । एतत् पदमशुद्धतरं यथाकथञ्चित् समर्थितम् यद्वा मम बुद्धेर्मान्द्यरूपदोषेण सम्यगर्थो नाऽवभासित इत्यलम् ॥६॥

**विश्वजनीन ! सदीनमिति निजदृक्सृतिं,**
**कथमथ मामवमान्य भजेर्यशसोन्नतिम् ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**त्वत्किङ्करमवगत्य सत्यसुखसावधि,**
**प्रतिजनि मे निजमेव देव ! दिश सन्निधिम् ॥७॥**

**विश्वजनीनेति** - अथ इत्यनन्तरं हे विश्वजनीन ! - हे विश्वजनहित-कारक ! सदीनमितं सदीनतागुणयुतं निजदृक्-सृतिं त्वद्दृष्टिपथप्राप्तं मामवमान्याऽवगणयित्वा यशसा उन्नतिं लोके प्रसिद्धतां त्वं कथं भजेः कथं प्राप्नुहि ?

अथ हे देव ! मां त्वत्किङ्करं दासरूपमवगत्य - भवान् ज्ञात्वा, प्रतिजनि अत्राऽव्ययीभावत्वाद्विभक्तेर्लुक् बोध्यः, मुक्तिपदप्राप्ति-पर्यन्तरूपे भवे भवे मे-मम मह्यं वा निजमेव-स्वकीयमेव सन्निधिं समीपतारूपं सम्यक्त्वरूपरत्नं वा त्वं दिश-देहि इत्यन्वयः ॥७॥

**भूरिजनो यदरक्षि भवान् निजसद्दृशा,**
**सम्प्रति मेऽप्यनुप्रेक्ष्य विभो ! भव नवयशाः ।**
**किं बहुयाचनयाऽथ नाथ ! तव पार्श्वतः,**
**स्वीयचरणशरणैकगतं कुरु मामवतः ( मतः ) ॥८॥**

**भूरिजनो यदेति** - हे विभो ! - हे विश्वव्यापक ! निजसद्दृशा निजसमीचीनदृष्ट्या स्वकीयसद्दर्शनेन इति यावत्, भवात्-संसारात् भूरिजनो यद् भवता अरक्षि-रक्षां कृतवान् । संप्रति-इदानीं मे मह्यं मम वा, अनुप्रेक्ष्य इति ईक्षदर्शनाङ्कनयोरस्माद्धातोः क्त्वास्थाने क्त्वो ल्यबिति सूत्रेण ल्यपि कृते यथेष्टरूपसिद्धिः, स्वीयसद्दर्शनं दत्त्वा त्वं नवयशा भव नूतनयशोयुक्तस्त्वं स्या इति कर्तुर्हार्दम् ।

अथेत्यनन्तरं हे नाथ ! अतः परं तव पार्श्वतः बहुयाचनया किं - पर्याप्तं सृतमिति किमित्यसा[व]र्थः ? स्वीयचरणयोः शरणैकगतं-शरणैकतारूपं मां त्वं कुरु, भवे भवे मम तव चरणयोरेव शरणमस्तु इत्यन्वयः ॥८॥ **छन्दस्तु सममात्राख्यम् ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इति स्तुतः श्रीगिरिनारमण्डनः, संसेव्यमानोऽम्बिकया निरन्तरम् ।**
**नेमीश्वरः स्तात् सततं सदङ्गिनां, चतुर्गतिभ्रान्तिहरः शिवङ्करः ॥९॥**

**[ उपजातिः ]**

**इति स्तुत इति** - इति परिसमाप्तौ, इत्थं वा अमुना प्रकारेण, श्रीगिरिनार-मण्डनोऽम्बिकया देव्या निरन्तरं संसेव्यमानो यो नेमीश्वरो भगवान् मया स्तुतः स्तुतिं कृतवान्, स एव नेमीश्वरो द्वाविंशतितमजिननायकः सततं-निरन्तरं सदङ्गिनां भव्यप्रपाणिनां चतुर्गतिभ्रान्तिहर अत एव शिवङ्करः स्तात्-भवतु इत्यन्वयः ॥९॥ कृपालुविपश्चिद्भिः संशोध्यमेतत् ।

विद्वद्जनसङ्कीर्णे**ऽमृतचन्द्रसूरि**सन्निधौ रचितः ।
जाग्रत्प्रभावजनिते, नेमीश्वरे मे मतिर्भूयात् ॥१॥
३ २ ९ १
त्रि-नेत्रा-ऽङ्क-विधुमितेऽब्दे कार्तिकमासस्य पूर्णिमासुतिथौ ।
**बालूचरे** पुरवरे, **प्रकाशो रामचन्द्रर्षिणा** ॥२॥ युग्ममिदम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ૫૪) नेमिनाथचरित्रम्

પ્રસ્તુત ચરિત્ર જિનવલ્લભસૂરિજી કૃત પંચજિનચરિત્ર અંતર્ગત છે. પ્રાકૃતભાષામાં નિબદ્ધ ગાથાઓ દ્વારા આ ચરિત્રોમાં પરમાત્માના જીવનની સંક્ષિપ્ત માહિતી આપવામાં આવી છે.

જિનવલ્લભસૂરિજી સમર્થ રચનાકાર હતા. પ્રથમ તેઓ આસિકાદૂર્ગનિવાસી જિનચંદ્ર નામના ચૈત્યવાસી અધ્યક્ષના શિષ્ય બન્યા. વ્યાકરણ, કાવ્ય, ન્યાયાદિ અભ્યાસ કરાવી ગુરુએ તેમને વાચનાચાર્ય પદ અર્પણ કર્યું, પાટણમાં અભયદેવસૂરિજી પાસે આગમોના અભ્યાસાર્થે મોકલ્યા. આગમોના અભ્યાસથી સન્માર્ગનું જ્ઞાન થતાં ગુરુની આજ્ઞા પૂર્વક વડગચ્છની સંવેગીશાખાના જિનેશ્વરસૂરિજીના શિષ્ય થયા. ત્યારબાદ તેમણે ચૈત્યવાસીઓ સામે મોટી ઝુંબેશ ઉપાડી હતી. માળવાના રાજા નરવર્મને પણ તેમણે પ્રતિબોધિત કર્યો હતો. તેમની આચાર્યપદવી સં. ૧૧૬૭માં થઈ. આમ તો તેઓ સંઘમાં માન્ય વિદ્વાન હતા પરંતુ છ કલ્યાણકની પ્રરૂપણા કરવા દ્વારા તેઓએ માન ગુમાવ્યું. સાથે તેઓ સ્વતંત્ર ગચ્છના પ્રતિષ્ઠાપક બન્યા. તેમની શિષ્ય પરંપરામાંથી મધુકરગચ્છ, ખરતરગચ્છ અને રુદ્રપલ્લીયગચ્છો ઉદ્‌ભવ્યા. (તેમની વિશેષ માહિતી અને રચના માટે જુઓ—જૈન પરંપરાનો ઇતિહાસ ૨-૩૪૦ થી ૩૪૪)

પ્રસ્તુત પંચજિન ચરિત્ર પર ખરતરગચ્છીય જિનભદ્રસૂરિજી (૧૪૫૦-૧૫૧૪) > મહોપાધ્યાય સિદ્ધાન્તરુચિજીના શિષ્ય સાધુસોમગણિએ 'અર્થપ્રબોધિની' વૃત્તિ વિ.સં. ૧૫૧૯ના વર્ષે રચી છે. સાધુસોમગણિજીની અન્ય રચના ચંદ્રપ્રભચરિત્ર, પુષ્પમાલાપ્રકરણવૃત્તિ (ર.સં.—૧૫૧૨), મહાવીરચરિયવૃત્તિ (ર.સં. ૧૫૧૯), નંદીશ્વર સ્તવનવૃત્તિ વગેરે છે.

પ્રસ્તુત પંચજિનચરિત્ર-ટીકાને અંતે આપેલી પ્રશસ્તિ પરથી ટીકાકારના ગુરુ સિદ્ધાંતરુચિજીનો પરિચય પ્રાપ્ત થાય છે. તેઓ મહોપાધ્યાય હતા.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

તેમના પર જીરાવલ્લા પાર્શ્વનાથ પરમાત્માના અધિષ્ઠાયક પ્રસન્ન હતા. તથા ગ્યાસુદ્દીન મહારાજાની સભામાં તેઓશ્રીએ વાદમાં વિજય મેળવ્યો હતો.

પ્રસ્તુત ટીકામાં ઠેર-ઠેર આગમિક પદ્યો સાક્ષીપાઠ તરીકે ગ્રહણ કરેલા છે. જે રચનાકારશ્રીના આગમિક ઊંડા અભ્યાસના પ્રતીકસ્વરૂપ છે. ટીકામાં અવસરે-અવસરે વિષય વસ્તુ ખોલવાનો પ્રયત્ન કર્યો છે. જેમકે—પરમાત્માના ૩૪ અતિશયો, ૩૫ વાણીના ગુણો, સપ્તભંગી, સિદ્ધના ૩૧ ગુણો વગેરે, પ્રત્યેક ચરિત્રમાં પરમાત્માના શાસન દેવ-દેવીનું વર્ણન આવરી લીધું છે. પાંચેય ચરિત્ર અને તેની ટીકામાં ભાષા સરળ અને સમાન રહી છે. પરંતુ, મહાવીરસ્વામિચરિત્રનું પ્રથમ પદ્ય માલિનીમાં છે અને તેની ટીકા પણ ખંડાન્વય-દંડાન્વય પદ્ધતિને અનુસારે આપેલી છે.

મહાવીરસ્વામિના ૨૭ ભવવર્ણનમાં વિશ્વભૂતિ તરીકેના ભવની બાબતમાં અમુક ઉલ્લેખો પ્રચલિત વર્ણનથી વિશેષ કર્યા છે. રાજા કપટ કરીને યુદ્ધની ભેરી વગાડે છે ત્યારે તે પહેલા રાજ્યસભામાં તેનું કારણ દર્શાવતાં કહે છે કે—'પુરુષસિંહ રાજા આજ્ઞામાન્ય હોવા છતાં હવે આજ્ઞા માનતા નથી આથી તેમની સાથે યુદ્ધ કરવા જઉં છું.' વિશ્વભૂતિ મુનિના ગુરુનું નામ 'સ્વયંભૂતિ' આપ્યું છે. સામાન્યતઃ 'સંભૂતિ' નામની પ્રસિદ્ધિ છે. માસક્ષમણને પારણે વિશ્વભૂતિમુનિ ગાયની ઠોકર લાગતા પડી જાય છે. ત્યારે વિશાખાનંદીને બદલે તેના સેવકો મુનિની હાંસી કરે છે. મુનિ ક્રોધમાં આવીને તે સેવકોના સ્વામીને ભવાંતરમાં મારવાના બળનું નિયાણું કરે છે.

ટીકાકારે આ ૨૭ ભવના વર્ણનને અંતે ૨૭ ભવની ગણતરીના મતાંતરો પણ ટાંકેલા છે.

ટીકાને અંતે આપેલી પ્રશસ્તિ ટીકાકારની નિરભિમાનતા અને નમ્રતા દર્શાવે છે.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

નેમિનાથ પરમાત્મા સિવાયના ચાર પરમાત્માના ચરિત્ર અને તેની ટીકા પરિશિષ્ટમાં આપ્યા છે.

अथ श्रीनेमिनाथचरित्रं व्याख्यायते तस्य चेयं प्रथमगाथा-

**मयनाहिसरिसविलसिरदेहपहाकयदिसामुहविभूसं ।**

**नेमिजिणं पणमिय चरियलवमिमस्सेव कित्तेमि ॥१॥**

मृगनाभिः-कस्तूरिका तया सदृशी-तुल्या विलसन्ती-प्रसरन्ती देहप्रभा-कायकान्तिस्तया कृता दिग्मुखानां विभूषा-शोभा येन स तथा । तं एवंविधं नेमिजिनं-श्रीनेमिनाथं प्रणम्य-प्रकर्षेण नत्वा अस्यैव श्रीनेमेश्चरितलवं कीर्त्तयामीति क्रियासण्टङ्कः । अत्र च भगवति गर्भगते सति माता स्वप्नेऽरिष्टरत्नमयं नेमिं-चक्रमद्राक्षीदित्यरिष्टनेमिरित्येतद्भगवन्नाम, पदैकदेशे पदसमुदायोपचारान्नेमिरिति सूत्रे निर्देश इति गाथार्थः ॥१॥

**સ્તબકાર્થ :-**

કસ્તૂરી સરીખી પ્રસરતી દેહકાંતિ જેહની છઇ, કીધી દિસિરુપ મુખનઇ સોભા જિણિ તે નેમિ જિનેંદ્ર પ્રણમી કરી ચરિત્રનઉ લવલેસ એહનઉ કીરતિસું-કહિસું. ૧

तदेव दर्शयन्ति :-

**तित्तीससयरे अवरईयम्मि आसित्तु इत्थ अवयरिओ ।**

**सोरियपुरम्मि कत्तियबहुलदुवालसिनिसम्मि तुमं ॥२॥**

त्रयस्त्रिंशदतराणि अपराजिते विमाने आसित्वा-अवस्थाय अत्र जम्बूद्वीपसत्के भरतक्षेत्रे सौर्यपूरे कार्त्तिकबहुलद्वादशीनिशायां त्वमवतीर्णः । तदा च मातुश्चतुर्दशस्वप्नदर्शन-सुरेन्द्रादेशकृतधनधान्यसंहरणादिसर्वमिहापि ज्ञेयमिति गाथार्थः ।

તેત્રીસ સાગરોપમ અપરાજિત વિમાનિ રહી, ચિવી, ઇહાં અવતર્યઉ. સૌરીપુર રઇ વિષઇ કાર્તિક વદિ બારિસિની રાત્રી તૂં ઉપનઉ. ૨

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ जन्मकल्याणकं भणन्ति :-

**गोयमगोत्ते जाओ, सावणसियपंचमीइ संखंको ।**

**कन्नारासिम्मि सिवा-समुद्दविजयाण कुलकेउं ॥३॥**

गौतमगोत्रे जातः-प्रसूतः त्वमिति पूर्वगाथातस्संयोज्यं । कथम्भूतः ? शङ्खलाञ्छनः, शिवादेवी-समुद्रविजययोः कुलध्वजः-कुलमण्डनमिति भावः । कदा प्रसूत ? इत्याहुः - श्रावणशुक्लपञ्चम्यां तथा कन्याराशौ-कन्याराशिस्थे चन्द्र इति गाथार्थः ॥३॥

ગૌતમગોત્રઈં ઊપનઉ શ્રાવણ સુદિ પાંચમિ જાયઉ, સંખલાંછન, કન્યારાસિ સિવા-સમુદ્રવિજયના કુલરઈ વિષઈ ધ્વજા સમાન. ૩

अथ भगवतः कौमारकालं देहोच्छ्रयादि च प्रकाशयन्ति-

**दसधणतणू ठिओ तं, कुमारभावेण तिन्निवरिससए ।**

**रायसिरिं रायमइं व, गाढपणयं पि अगणिंतो ॥४॥**

दशधनुस्तनुस्त्वं स्थितः कुमारभावेन अकृतपरिणयत्वेन त्रीणिवर्षशतानि किं कुर्वन् ? राज्यश्रियं गाढप्रणयामपि-गाढानुरागामपि राजीमतीं च अगणयन्नवमन्यमान इति गाथार्थः ॥४॥

દસધનુષ, રહ્યઉ તૂં કુમારભાવઈ, તીનિસય વરસ રાજ્યલખમી રાજીમતી વલી ઘણઈ અનુરાગિ સહિત અવગિણી - છાંડી. ૪

अथ दिक्षाकल्याणकं वर्णयन्ति-

**अह वरिसदिन्नदाणो, लोगंतियबोहिओ य जायं ति ।**

**उत्तरकुरुसिवियाए, तं रायसहस्सपरियरिओ ॥५॥**

**रेवयगिरिम्मि सहसंबवणगयासोगतरुतले एवं ।**

**छट्ठेण विणिक्खंतो, सावणसियछट्ठिपुव्वाह्णे ॥६॥**

अथेत्यानन्तर्ये, लोकान्तिकैर्देवैः सारस्वतादिभिः जातकल्पस्थितिरिति बोधितो, वर्षं यावद्दत्तदानश्च, उत्तरकुरुनाम्न्यां शिबिकायां विमानाकार-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुखासनविशेषे आरुढ इति गम्यं, राज्ञां सहस्रेण परिवृतः, रैवतगिरौ सहस्राम्रवनवर्तमानाऽशोकतरोस्तले भगवान् षष्टेन तपसा विनिःक्रान्तो-गृहवासान्निर्गतः-प्रव्रजितः, श्रावणमासस्य शुक्लषष्ट्यां पूर्वाह्ने-प्रथमपौरुष्यामिति गाथायुगलार्थः ॥५-६॥

હિવ વરસી દીયઉ દાન, લોકાંતિક દેવે બોધ્યઉ, આચાર એ તીયાંનઉ ઉત્તરકુરુ નામિ સિબિકાંઇ બઇઠઉ તૂં રાજાન સહસે કરી પરિવરિયઉ થકઉ. ૫

ગિરનારિ પરવતિ સહાસાંબવનિ દીખ્યા લેતઉ હૂઉ, અસોકવૃખ્ય હેઠઇ ભગવંત છઠ તપિ ઘરવાસહોતી નીકલ્યઉ, સાવણ સુદિ છઠિ પહિલઇ પહરિ. ૬

अथ प्रथमपारणकस्वरूपं प्ररूपयन्ति

**तक्खणमणनाणजुयस्स तुह भमंतस्स बारवईनयरे ।**
**वरदिन्नदिन्नपरमान्नपारणं आसि बीयदिणे ॥७॥**

तत्क्षणं-दीक्षाक्षणे एव, मनःपर्यायज्ञानयुतस्य तव द्वारवतीनगरे भ्रमतः व्रतात् द्वितीयदिने वरदत्तदत्तपरमान्नेन पारणकमासीदिति गाथार्थः ॥७॥

तिणि समइ मनःपर्यायन्यान सहित तुઝनइ ભमતइ थकइ द्वारिकामाहे, बीજइ दिनि वरदित्ति दीयउ खीरि करी पारणउ हुउ बीજइ दिवसि. ७

अथ छद्मस्थपर्यायकालप्रख्यापनापूर्वं ज्ञानकल्याणकं प्रज्ञापयन्ति-

**अह चउपन्नदिणंते आसोयअमावसाइ पुव्वह्णे ।**
**वेडसतरु हिट्ठे अट्ठमेण तुह केवलं जायं ॥८॥**

अथेति दीक्षाग्रहणाऽनन्तरं चतुःपञ्चशद्दिनानामन्ते-प्रान्ते अश्वयुज-आश्विनमासस्यामावास्यां पूर्वाह्णे-प्रथमपौरूष्यां वेतसतरोरधस्तात् अष्टमेन तपसा तव केवलमिति-केवलज्ञानं जातमुत्पन्नं । एतेन चतुःपञ्चाशद्दिनानि च्छद्मस्थपर्यायः ततः केवलज्ञानमिति गाथार्थः ॥८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

હિવ ચઉપન્ન પછઇ આસૂવદિ અમાવસિનઇ દિનિ, પહિલઇ પહરિ, વેતસ વૃખ્ય હેઠઇ, અઠમતપિ, તૂંનઇ કેવલન્યાન હૂઉ. ૮

अथ भगवतश्चतु:प्रकारं परिवारं प्ररूपयन्ति–

**तो समणाणट्ठारस चालीसं संजईण य सहस्सा ।**
**एगूणसत्तरं लक्खमक्खयगुणड्ढसड्ढाणं ॥९॥**
**छत्तीससहस्सजुयं, लक्खतिगं गुरुगुणड्ढिसड्ढिणं ।**
**इय परमपयासंघो संघो तुह चउव्विहो जाओ ॥१०॥**

तत:–केवलज्ञानानन्तरं, गणधरा गणाश्चैकादश जाता:, एतच्चाऽत्र संक्षेपान्नोक्तं, श्रमणानां वरदत्तप्रमुखाणां अष्टादशसहस्रा: । तथा यक्षिणी–प्रमुखाणां संयतीनां–साध्वीनां चत्वारिंशत्सहस्रा: । तथा न विद्यते क्षयो–ह्रासो येषां ते अक्षया:, तैरक्षयैर्गुणैराढ्या–युक्तास्ते च ते श्राद्धाश्च, तेषां अक्षयगुणाढ्यश्राद्धानां नन्दनप्रमुखाणां एकोना सप्ततिर्यस्मिन् लक्षे तदेकोनसप्ततिलक्षं १६९००० इति ॥९॥

षट्त्रिंशत्सहस्रयुतं लक्षत्रिकं कासामित्याहु: गुर्वी गुणानां ऋद्धिर्यासां ताश्च ता: श्राध्यश्च तासां गुरुगुणर्द्धिश्राद्धीनां सुव्रताप्रमुखाणां । इत्युक्तरूप: परमपदे–मोक्षे आसंघ:–पराप्रीतिर्यस्य स तथा एवंविध: संघस्तव चतुर्विधो जात इति गाथा द्वयार्थ: ॥१०॥

પછઇ સાધુ ૧૮ સહસ, ચાલીસ સાધ્વીના સહસ હૂઆ. ઇગુણહત્તરીસહસ એકલાખ સંપૂર્ણ ગુણ સહિત શ્રાવક થયા. ૯

છત્રીસસહસ સહિત લાખ તીનિ મોટા ગુણ સહિત શ્રાવિકા હુઇ, ઇમ મોખ્ય ઉપરિ પ્રીતિ સહિત સંઘ તિમ ચિંહું પ્રકારે તાહરઇ હૂઉ. ૧૦

अथ संघ[दौ:स्थ्य]विघातिनीयक्षिणीं, वासुदेवप्रणतत्वं, श्रामाण्य–पर्यायमानं च प्राहु:–

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कोहंडिखंडियतित्थदुत्थ ! गयतण्ह ! कण्हपणयपओ ! ।**
**सामण्णमसामण्णं वाससएसत्त कासि तुमं ॥११॥**

हे कूष्माण्डीखण्डिततीर्थदौःस्थ्य ! तत्र कूष्माण्डी-अम्बिका तया, एतदुपलक्षणाद्गौमेधयक्षेण च खण्डितानि तीर्थस्य-शासनस्य चतुर्वर्ण-श्रीसंघस्य चास्य दौःस्थ्यानि यस्य स तथा तत् सम्बोधनं तदुक्तं । श्रीनेमितीर्थे गौमेधो यक्षश्चास्य नृवाहनः त्रीन् दक्षिणान् मातुलिङ्ग-पर्शु-चक्रधरान् करान् वामांस्तु नकुल-त्रिशूल-शक्तिर्युतान् दधत्, श्यामो । अम्बिकाऽऽम्रलुम्बी-पाशाऽऽलम्बिदक्षिणदोर्द्वया सपुत्राऽङ्कुशभृद्वाम-दोर्द्वया, सिंहवाहना, सुवर्णवर्णा, श्रीनेमितीर्थे शासनदेवता । इति पुरुषस्य प्रधानत्वेऽपि सूत्रे गोमेधयक्षमुपेक्ष्य श्रीअम्बिकायक्षिण्या ग्रहणं तस्याः प्रसिद्धि-प्रभावापेक्षं इति । हे गततृष्ण ! तत्र गता-व्यपगता तृष्णा-लोभपरिणामो यस्मादसौ गततृष्णस्तत्सम्बोधनम् । त्वं कृष्णप्रणतपदः सन् असामान्यं निरूपमं श्रामण्यं-श्रमणधर्मं सप्तवर्षशतान् अकार्षीरिति गाथार्थः ॥११॥

કૃષ્માંડક દેવતાયઇં ખંડ્યઉ તીર્થનઉ દુખ, ગઇ તૃષ્ણા યેહની, કૃષ્ણિ પ્રણમ્યા પદકમલ યેહના, ચારિત્ર નિરૂપમ વરસ સાતસઇ સીમ કરતઉ હુઉ તૂં સ્વામી. ૧૧

अथ भगवत्साधुसङ्घस्य लब्धिविशेषज्ञापनपूर्वं सङ्ख्यां वदन्ति-

**मणनाणि सहस्समणुत्तरोववाईण सोलसयाणि ।**
**चउदसपुव्वीण सया चउरो दुगुणा य वाईणं ॥१२॥**
**पण्णर सया वेउव्वि-ओहि-केवलिजिणाण पत्तेयं ।**
**परिवारो तुह तं पण्णवेसि धम्मं चउज्जामं ॥१३॥**

मनःपर्यायज्ञानिनां-सम्पूर्णे मनुष्यक्षेत्रे व्यवस्थितानां संज्ञिनां मनोवर्तिसर्वविशेषोपेतवस्तुग्राहिणां सहस्रम् । अनुत्तरोपपातिनां षोडशशतानि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्रानुत्तरविमानेषूपपत्तिरुत्पत्तिर्येषां ते तथा तेषां, ते चाऽऽगामिभवभाविसिद्धिगतयो ज्ञेयाः । चतुर्दशपूर्वाणि विद्यन्ते येषां ते चतुर्दशपूर्विणस्तेषां चतुर्दशपूर्विणांश्रुतकेवलिनां चत्वारि शतानि । द्विगुणानि चत्वारिशतानि अष्टौ शतानीत्यर्थः वादिनां वादलब्धिसम्पन्नानाम् ॥१२॥

प्रत्येकपञ्चदशशतानि केषां वैक्रियलब्धिवदवधिज्ञानिकेवलिजिनानां परिवारस्तव आसीदित्यध्याहारः । त्वं प्रज्ञापयस्युपदिशसि धर्मं चतुर्यामं- चत्वारो यामा-व्रतानि यत्र तत् तथा अब्रह्मणः परिग्रहान्तर्गतत्वेन भणनाच्चतुःसङ्ख्या त्वमिति गाथायुगलार्थः ॥१३॥

મનઃપર્યાયન્યાની ૧ સહસ, અનુત્તરોપપાતી સોલહસય સાધુ હૂઆ, ચઉદપૂરવી સાધુ સઇ ચ્યારિ, બિમણા = ८०० વાદી સાધુ હૂઆ. ૧૨
પનરહ સય વૈક્રિય લબધિમંત, અવધિન્યાની, કેવલન્યાની સાધુ પ્રત્યેક પરિવાર તાહરઉ હૂઉ, તૂં ઉપદિસતઉ હૂઉ ધર્મ ચ્યારિ મહાવ્રતરૂપ ૧૩

अथापश्चिमं सिद्धिगमनलक्षणं कल्याणकं भणन्ति-

**छत्तीसुत्तरपंचसयसाहुसहिओ, सहस्स वरिसाओ ।**
**कल्लाणगपणगच्चियचित्तानक्खत्त नेसज्जी ॥१४॥**
**मासियभत्तेण तुमं आसाढसियअट्ठमीए रयणीए ।**
**उज्जिंते जिण वल्लह सिद्धिसुहं पत्त कुणसु सिवं ॥१५॥**

षट्त्रिंशता उत्तराणि अधिकानि पञ्चशतानि (५३६) साधवस्तैः सहितोयुक्तः । तथा सहस्रं वर्षाणि सर्वायुर्यस्य सः सहस्रवर्षायुः । तथा कल्याणकानां पञ्चकेनार्चितं अर्च पूजायां-मानण् पूजायामिति धातुपाठात् [ ] पूजितं-मानितं चित्रानक्षत्रं येन स तथा तत्सम्बोधनम् । तथा निषण्णः पर्यंकासनस्थः पद्मासनोपविष्ट इति यावत् । त्वं मासिकभक्तेन आषाढशुक्लाष्टम्यां रजन्यां उज्जयन्ते-रैवतकगिरौ हे जिन ! हे वल्लभ !-मम सर्वाधिकप्रिय, हे सिद्धिसुखं प्राप्त !, यद्वा हे वल्लभसिद्धिसुखं प्राप्त ! इत्येकं विशेषणं, हे

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जिनवल्लभ ! छद्मस्थवीतरागप्रियेति वा । शिवं-कल्याणं निश्रेयसं वा, कुरु-सम्पादय । अत्रापि जिनवल्लभ इति कवेर्नामज्ञेयमिति गाथाद्वयार्थः ॥१४-१५॥

છત્રીસે અધિક પાંચસઇ સાધુ સહિત, ૧ સહસ વરસ આઊખઉ પાલી, કલ્યાણિક પાંચ નિશ્ચઇ ચિત્રા નખ્યત્રિ હૂઆ, પદ્માસનિ બઇઠઉ, માસી ભક્તઇ તૂં આસાઢ સુદિ આઠમિની રાતઇ ગિરિનારઇ અહો જિન ! અહો વલ્લભ ! અથવા સામાન્ય કેવલીનઇ પ્રિય, સર્વ કલ્યાણક હૂઆ, મોખ્ય હૂઉ, ઇ પખિ કવિ નામ જિનવલ્લભસૂરિ, અહો સિદ્ધિસુખ પ્રતિ પ્રાપ્ત ! ઘઉ મોખ્ય મૂનઇ. ૧૪, ૧૫.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# परिशिष्ट - 'क'

## १ ) जिनकीर्तिसूरिविरचिताः पञ्चतीर्थीस्तवाः ॥

### १. श्रीऋषभकुन्तलस्तवः ॥

ऐश्वर्यं सदने सदैव वदने वाचाम्पतिर्देवता,
शौर्यं दोर्युगलेऽवलेपरहिता बुद्धिर्विशुद्धा हृदि ।
कीर्तिः खेलति विष्टपे च भविनां यस्य प्रसत्तेर्वशात्,
श्री नाभेयजिनं प्रणष्टवृजिनं प्रव्यक्तभक्त्या स्तुवे ॥१॥ [शार्दूल०]

श्रीब्रह्मोपनिषन्निषण्णधिषणैर्विज्ञेयसम्यक्स्थितेः,
स्वामिन् ! कस्तव वास्तवस्तवमलं कर्तुं भवोन्मानवः ? ।
त्वामामन्त्र्य पुनः पुनस्तदपि हि स्तोत्रच्छलेनामुना,
जिह्वा स्वामधुना पुनामि मलिनामास्तुत्यसङ्कीर्तनात् ॥२॥

मग्नं धर्मरथं युगादिसमये मिथ्यात्वपङ्कोच्चयात्,
कृष्ट्वा सर्वसुखावहं यदवहः श्रेयःपुरीप्रापकम् ।
तेनाऽसौ किणसन्ततिः शितितरा स्कन्धे तवालोक्यते-
ऽद्याऽपि श्रीवृषभप्रभो ! नवघनश्यामालकव्याजतः ॥३॥

लावण्यातिशयादतीवसुभगां श्री-भारतीदेवते,
त्वन्मूर्तिं दृढमालिलिङ्गतुरमू अत्यन्तरागान्विते ।
तेनांसस्थलयोस्तव स्तबकिता लोलालिकालिच्छलात्,
कस्तूरीद्रवपत्रभङ्गरचनेवाऽसौ तदङ्गच्युता ॥४॥

श्रीनाभिक्षितिपालपुत्र ! भगवन्नैता तवांऽसस्थले,
दीव्यन्नीलरूचिछ्यः किल जटाः सर्वज्ञचूडामणे ! ।
किं त्वेताः परमर्द्धिसिद्धिनगरीमोहार्गलदुर्गम-
ब्रह्मद्वारकपाटसम्पुटतटप्रोद्घाटने कुञ्चिकाः ॥५॥

अत्यन्तं निभृतं भवद्गुणगुणैः सङ्ख्यातिगैः प्रागपि,
त्वत्कीर्त्या त्वधुनाऽभवं स्फुटदिवामास्या तदेनां क्वचित् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दूरे प्रेषय नाभिराजतनय ! व्योमेति विज्ञप्तिकां,
प्राप्तं कर्तुमिव त्वदन्तिकमिदं दम्भाज्जटानां प्रभो ! ॥६॥

भक्तिव्यक्तिविनम्र[शिर्ष]जनताऽभिष्टार्थकल्पद्रुम !,
स्वामिंस्तेंऽसयुगे सुगेयशितिरूक् नैतज्जटामण्डलम् ।
किं त्वेतच्चपलस्वभावकमलाबालप्लवङ्गप्रिया-
बन्धाय प्रबलं त्वया प्रगुणितं प्रोद्दामदामाऽऽयसं ॥७॥

यद् विज्ञाः प्रबलप्रतापविभवश्रीनाभिराजाङ्गज !,
त्वां गन्धद्विपमामनन्तिपुरूषश्रेणीषु तत् साम्प्रतम् ।
राग-द्वेषगजान् पराभवसि यद् बम्भङ्क्षि मोहद्रुमं,
धत्से यन्मदवारि वारितमदोप्युद्यज्जटाव्याजतः ॥८॥

सौभाग्येकनिधे निधेहि हृदये स्नेहं चिरस्नेहल-
स्वान्तां स्वां दयितामिमां त्वमधुना सम्भावयैहि प्रभो ! ।
इत्याख्याय शिवश्रिया निजगृहे त्वां नेतुमायोजिता,
नीलीरागभृतेव रज्जुरपि हि श्यामा जटायाः छलात् ॥९॥

पीयूषद्युतिमण्डले प्रतिकलं पीयूषयूषं पिबन्,
देवैस्त्रासित एष लेखभवनाद्राहुः पलाय्य स्थितः ।
पातुं वागमृतं त्वदीयवदनासन्ने प्रसन्ने जटा-
व्याजेन त्रिजगत्यपि त्वदपरो नास्ति शरण्यो यतः ॥१०॥

धर्मायादा भुवनविभुतां देहि तन्नोपि किञ्चिन्,
मित्रे शत्रावपि सममना योगिभिर्गीयसे यत् ।
याञ्चामेवं रचयितुमिदं दम्भतः कुन्तलाल्याः
स्थानभ्रष्टं दुरितमिह किं त्वत्समीपे जिनागात् ॥११॥ [मन्दाक्रान्ता]

सततं भगवंस्तवांशदेशेन जटानां पटलं विभाति किन्तु ।
विधृतं तदिदं त्वया तमोऽस्त्रं जगदास्कन्दपरस्मरच्छिदायै ॥१२॥ [मालभारिणी]

परममहिमदीव्यन्मातृकाव्यक्तवर्णं,
फणियुगलनिषेव्यं व्याजतः केशपाल्याः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मुखमिह कुरूकुल्लायन्त्रवन्मन्त्ररम्यं,
सृजतु भुवनरक्षां श्रीयुगादीश्वरस्य ॥१३॥ [मालिनी]
इयं न ते कुन्तलमालिकांऽसयोर्विनीलकान्तिः प्रविभाति किन्त्विदम्।
तुभ्यं क्षमाभृद्गुरवेऽञ्जनक्षमाधरैः स्वकान्तेः पटलं तु ढौकितम् ॥१४॥ [उप०]
त्वया सितध्यानबलप्रवासितं दुर्नीतिकारीति मनःपुरान्तरात्।
अंसस्थलीलोलविनीतकुन्तलच्छलेन दुर्ध्यानमिवाययौ बहिः ॥१५॥
इयं न ते नीलजटाकदम्बकं, विराजतेंऽसस्थलयोस्तव प्रभो ! ।
असौ पुनर्नम्रसुराङ्गनेरिता कटाक्षलक्षस्तबकावली किल ॥१६॥
श्रीमद्युगादीश ! तवांसयोः स्फुरत्पदः कदम्बं न जटाघटारूचाम्।
क्षारत्व-निम्नत्व-जडत्वदूषणक्षयेच्छया किन्तु समागतोऽम्बुधिः ॥१७॥
परापरब्रह्ममयी सरस्वती, लक्ष्मीश्च निर्वैरमुभे इह स्थिते।
इतीव वेधा विदधे तवाऽऽनने जिनेन्द्र ! रेखायुगलं जटाङ्कतः ॥१८॥
विर्निजितौ गीष्पति-भार्गवौ त्वया, ततः प्रपन्नौ तव तौ विनेयताम्।
इमे तयोरध्ययनाय पट्टिके, कृते विधात्रा भगवन् ! जटोपधेः ॥१९॥
श्रीनाभेय ! त्वदंसस्थलयुगलतटे नीलमालोक्यते यद्,
दक्षा आहुर्जटाऽसाविति भुवनपते ! किं तु मन्येऽहमेवम्।
एषा च्छायैव देव ! भ्रकृटियुगभवा नापरं किञ्चिदेतन्-
मूर्तौ पारङ्गतानां किमपि न घटते वैकृतं यज्जटाद्यम् ॥२०॥ [स्रग्धरा]
अप्रेक्ष्येक्षणतीव्रतापतपनोत्तंसाङ्गभव्याङ्गिना-
मश्रान्तं पिबतां स्वलोचनपटैर्लावण्यपुण्यामृतम्।
त्वद्वक्त्रादमृतह्रदान्निपतितैस्तद्बिन्दुभिः पार्श्वतः,
स्वामिन् ! पङ्क इवाऽभवत् किल जटाव्याजात् तवांसद्वये ॥२१ [शार्दूलवि०]
राग-द्वेषगजेन्द्रयोस्त्रिभुवने स्वैरं चिरं भ्राम्यतोः,
श्रीधर्मद्रुमकाननं दलयतोर्नित्यं मदोन्मत्तयोः ।
देवैरप्यविषह्ययोः किल वशीकराय सारायस-
प्रोद्दामाङ्कुशयामलं शितिजटाव्याजादधार्षीः प्रभो ! ॥२२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रीमद्धर्मनरेश्वरः सृजति किं यद्देहगेहाङ्गणे,
भावद्वेषिभटानतीवविकटान् जेतुं कृपाणीश्रमम् ।
लोलन्नीलजटाघटातिकपटाद् देवः स वः प्रार्थितं,
नित्यानन्दपदप्रदः प्रददतां श्रीमान् युगादीश्वरः ॥२३॥

एवं श्रीगुरुसोमसुन्दरयशः प्राग्भारगौरस्फुरत्,
कान्तिस्मेरितविष्टपत्रय ! नयश्रीकेलिलीलालय ।
भक्तिव्यक्तितरङ्गरङ्गिमनसा स्वामिन् ! मयाऽसि स्तुतः,
श्रीनाभेयविभो ! प्रसीद भगवन् ! बोधिप्रदानेन मे ॥२४॥

• • •

## २. श्रीशान्तिकान्तिस्तवः ॥

नवज्योतिः स्फातिः सकलकमलाकेलिसदनं,
कलालीलाशाली पृथुतमतमःस्तोमशमनः ।
मृगाङ्कः श्रीशान्तिः कुवलयसमुल्लासनपरः,
स्फुरत्कल्लोलं मे रचयतु स वाग्ब्रह्मजलधिः ॥१॥ [शिखरिणी]

कलङ्कं नो धत्ते न च भजति दोषोदयमयं,
न चाप्नोति भ्रान्तिं कलयति कलानां न विलयम् ।
अताड्यं नो जाड्यं प्रथयति न वाप्यस्तसमयं,
नवीनः श्रीशान्तिर्हरतु मृगलक्ष्मा भवभयम् ॥२॥

जगन्नाथः पाथःपतिवदतिगम्भीरहृदयो,
दयोल्लासात् पूर्वं स्वतनुपिशितैः सात्त्विकपतिः ।
ररक्ष श्येनाद् यो भयविधुरपारापतमसौ,
जिनः शान्तिः पायाद् भव-भवभयाद् भक्तभविनः ॥३॥

यदीयाङ्गाच्छङ्गाद् दिशि-दिशि पिशङ्गद्युतिरियं,
वियत् सर्वं व्यापाऽप्रतिहतगतिः खेलतितमाम् ।
दृढस्पर्द्धाबन्धादि भगवतो ज्ञानमहसः,
स शान्तिं श्रान्तिं वो भववनभवामुद्विदलतात् ॥४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स वः शान्तेः कान्तिव्रज उरुरजस्तक्षतुतमां,
तमांसि च्छिन्दानः कनककमलच्छेदकपिशः ।
सरोजानां राज्या निरुपमसुखश्रीविजितया,
पदे दण्डस्याऽयं कृत इव परागः स्वविभवः ॥५॥

त्वया छिन्ना दोषास्त्रिभुवनमनोदाहजनना,
ममाप्येतांश्छिन्द्या इति भजति यं दीपकततिः ।
निजं तेजःपुञ्जं पुरत उपदीकृत्य सहजं,
मिषाद् यत् कान्तीनां प्रथयतु स शान्तिः सुखमतीः ॥६॥

स शान्तिः सन्तापं हरतु भविनां शान्तिनिलयो,
विरेजुर्यद्देहप्रभवरुचयः स्वर्णशुचयः ।
वपुर्भित्त्वा ध्यानानलविमलकीला इव बहिः,
समुल्लासं प्राप्ता दिनकरमहो ! जेतुमनसः ॥७॥

अभीप्सुः सौरभ्यं निजवपुषि गाङ्गेयनिकरः,
स सेवाहेवाकी सजृति वसतिं यस्य सविधे ।
पिशङ्गाङ्गव्याजादिव सुदिवसं वः प्रथयताद्-
यतात्मा श्रीशान्तिः स भुवनजनाभीष्टफलदः ॥८॥

रुचिः शान्तेर्व्याख्यासदसि वपुषः स्वर्णरुचिरा,
समन्तात् दन्तांशुप्रकरखचिता नेयमपि तु ।
असौ श्वेताम्भोजा तदुरुरजसा पीतसलिला,
जिता पावित्र्येण त्रिदशतटिनी संश्रितवती ॥९॥

अयं मोक्षोपायं प्रथयतु सतां शान्तिवपुषः,
स्फुरज्ज्योतिःपुरो दृगधररदांशुस्तबकितः ।
दृढस्नेहावेशात् सरभसमिलज्ज्ञानललना,
वपुर्लग्नश्लीनांशुकपट इवाऽनेकरचनः ॥१०॥

विराजन्ते शान्तेर्दिशि-दिशि वपुःकान्तिनिकरा,
नखज्योतिर्जालस्तबकखचिताः सृत्वरतराः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्मरे ध्वस्ते रत्या निजतनुलतातः परिहृताः,
सुवर्णालङ्कारा इव नवमणिश्रेणिरुचिराः ॥११॥

स वः शान्तिः शान्तं सृजतु भवतां येन सहसा,
बहिश्चक्रे नित्यं स्वहृदयपथाद् राजसगुणः ।
ततो देहोद्गच्छद्द्युतिततिपरीवेषमिषतः,
स ईप्सुः स्वस्थानं किमनुनयनायाऽऽगत इह ॥१२॥

सहेलं खेलन्त्या धृतिललनया येन युतया,
विकीर्णोऽयं वासः सघुसृणलवश्चान्दन इव ।
समन्तात् सर्पन् यत् तनुरुचिभरो राजतितरां,
तरांसि द्विष्टानां क्षपयतु स शान्तिर्जिनपतिः ॥१३॥

श्रिये स श्रीशान्तिः प्रणमदमरीभिः प्रगुणितैः,
कटाक्षाणां लक्षैः स्तबकितमिदं यद्वपुरभूत् ।
जनुः स्नात्रारम्भे कनककमलभ्रान्तिविवशै-
र्दलन्नीलीनीलैर्भ्रमरपटलैराश्रितमिव ॥१४॥

यदीयाङ्गोद्गच्छत्किरणपटलैः स्वर्णविमलै-
र्द्विजश्रेणी-चक्षुः-करतल-नखाऽभीशुशबलैः ।
नभोभित्तौ चित्रं कृतमिव शिवश्रीरतिकृते ।
प्रभुः स श्रीशान्तिर्भवतु भवतां भ्रान्तिहतये ॥१५॥

जनानामानन्दं नयनयुगयोः स्वर्णविशदः,
करोतु श्रीशान्तेस्त्रिभुवनपतेः कान्तिनिकरः ।
सितध्यानेणाक्ष्याः सरभसपरीरम्भसमये,
विलग्नः काश्मीरद्रव इव तदङ्गाद् विलुलितः ॥१६॥

स्वगन्धं कस्तूरी वितरतितरां यद्यनुपमं,
मृदुत्वं चाऽम्भोजं विधुरपि तदाह्लादकगुणम् ।
तदा जात्यस्वर्णं भवति सदृशं यस्य वपुषः,
स देवो देवानां विरचयतु शान्तिः शिवसुखम् ॥१७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्वया त्यक्तं कृष्णात्रयम[1]तिकटु स्वादमधुरं,
परं मा मा त्याक्षीरिति गदितुमागादुपयदम् ।
असौ लेश्या पद्मा किमु तनुरूचिव्रातमिषतः,
स देवः श्रीशान्तिर्वितरतु शिवं विष्टपपतिः[२] ॥१८॥

औन्नत्य-स्थिरता-सुवर्णमयता-सन्नन्दनाद्यैर्गुणै-
रस्माकं विभुना जितोऽपि किमसौ स्तब्धो न धत्ते नतिम् ।
मृष्यामस्तदमुं न विद्विषमिति ज्योतिर्भरा यत् तनो-
र्जेतुं मेरूमिवोत्पतन्ति सततं शान्तिः स वस्त्रायताम् ॥१९॥ [शार्दूल०]

नम्राणां हृदये भुजासु करयोः कण्ठे च कर्णद्वये,
मौलौ मौक्तिकपङ्क्तियुक्तकनकालङ्कारभावं गताः ।
व्याख्यायां दशनांशुमिश्रितवपुर्भासां भरा निर्भराः,
श्रीशान्तेर्भविनां भवन्तु सततं सर्वार्थसम्पत्तये ॥२०॥

सेवे देवेशमीशं प्रतिदिनमममृतैर्निर्जरान् भोजयामि,
प्रीणामि श्रीप्रदानात् कुवलयमगमन्नोकलङ्कस्तथापि ।
नाथानन्यापनेयं तमपनयनमेतीव विज्ञप्सयैण-
श्चन्द्रेण प्रैषि लक्ष्मच्छलत उपयदं स श्रिये शान्तिनाथ ॥२१॥ [स्रग्धरा]

विश्वाप्यायकगो विलाससदनं सद्वृत्तताभाजनं,
तारस्फारकलालयः कुवलयश्रीहासवैहासिकः ।
तन्वन् वैबुधमण्डलेऽमृतरसास्वादप्रसादं सदा,
देवः श्रीमृगलाञ्छनः प्रथयतु श्रेयःश्रियः शाश्वतीः ॥२२॥ [शार्दूलवि०]

यन्नामधेयस्मरणात्प्रयान्ति, शान्तिं भवभ्रान्तिजतान्तिसङ्घाः ।
श्रीआचिरेयः प्रभुरेष देयात्, सताममेयाः शिवसौख्यलक्ष्मीः ॥२३॥ [उप०]

स दिशतु भगवान् कुरङ्गलक्ष्मा, सुखलक्ष्मीर्जगतां[३] गतान्तरायाः ।
यदतुलमहिमोपजीवनेन, द्युमणिमुखा भुवने प्रसिद्धिमापुः ॥२४॥ [पुष्पि०]

---

१. कृष्ण-नील-कापोतलेश्याः । २. प्रतौ 'विष्टपततिः' पदम् । ३. अत्र 'लक्ष्' मध्ये द्विलघुस्वरस्थाने एकः गुरुस्वरः कृतः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवं देवनरेन्द्रवन्दितपदो नीतः स्तुतेर्गोचरं,
बाह्याभिः किल कल्पनाभिरपि यः प्रव्यक्तभक्तेर्वशात् ।
नित्यं श्री**गुरुसोमसुन्दर**पदध्यानैकलीनात्मनां,
भूयाद् वाञ्छितसिद्धये स भवतां श्रीवैश्वसेनिर्जिनः ॥२५॥ [शार्दूल०]

• • •

## ३. श्रीपार्श्वनाथफणास्तवः ॥

किर्तिःस्फूर्तिमियर्त्ति सर्वनिधयः श्रीगेहमध्यासते,
क्रीडामाकलयन्ति ताः करतले चाऽष्टौ महासिद्धयः ।
यन्नामस्मरणैकतानमनसां पुंसां निरस्तैनसां,
स श्रीपार्श्वजिनो धिनोतु भविनो ज्ञानश्रियां दानतः ॥१॥ [शार्दूलविक्री०]

सप्तद्वीपसमुद्रमुद्रितमहीपीठप्रतिष्ठान्यमी,
जेतुं सप्तमतानि दुर्नयभवान्युत्तम्भिता रेजिरे ।
यात्रालञ्छनदण्डका इव फणाः सप्तापि यस्य प्रभोः,
श्रेयः सम्पदमातनोतु भगवान् श्रीपार्श्वदेवः [स वः] ॥२॥

दुःखौर्वानलतप्तसप्तनरकक्षारार्णवान्तः पतज्-
जीवानामवलम्बहेतव इमे किं सेतवः प्राञ्जलाः ।
नित्यानन्दमहोमहोदयपुरीसम्प्रापणप्रत्यलाः,
श्रीमत्पार्श्वफणा नृणामविपदः पुष्यन्तु सत्सम्पदः ॥३॥

गाम्भीर्यादिगुणैर्जितास्तत इमे सप्तापि रत्नाकरा,
यस्य स्नात्रविधित्सयेव युगपत् स्व-स्वप्रवाहैः पृथक् ।
पुष्पैः संवलितैः फणामणिमिषादीयुः स्फुरद्-भावनाः,
स श्रीपार्श्वजिनेश्वरः कलिमलप्रक्षालनायाऽस्तुवः ॥४॥

भृत्यैरस्माभिरेव प्रगुणितमतुलं स्वर्ग्यसौख्यं त्वयाप्तं,
तीर्थेश ! त्वं तथैतत् तदुपकृतवतो हन्सि किं नः कृतज्ञ ! ।
कर्माण्यष्टौ शिरोंह्रिस्थितिभुजगमिषाद् यस्य विज्ञप्तिमेवं,
कर्तुं साक्षादिवासन् स भवतु भगवान् पार्श्वदेवः श्रिये वः ॥५॥ [स्रग्धरा]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कुक्षिक्षिप्तत्रिलोकं हरिमपि धरते यः फणाग्रैककोणे,
पृथ्वी पृथ्वी समेरूक्षितिधरजलधिर्माल्यवद् यस्य मौलौ ।
सोऽयं नागाधिराजः क्रमकमलयुगे लक्ष्मदम्भान्निलीन-
श्छत्रीभूतश्च शीर्षे वदति सुविभुतां यस्य पार्श्वः स जीयात् ॥६॥

येनैकेन भटेन मोहकटकं विश्वत्रयीकण्टकं,
विस्फुर्जत्वपटं स्मरादिसुभटं प्रौढप्रतापोत्कटम् ।
जित्वा तद्विजयध्वजा इव फणाव्याजात् समुत्तम्भिताः,
श्रेयः श्रीभुजगध्वजः स जगतां दत्तां गताङ्हस्ततिः ॥७॥ [शार्दूल०]

अग्राऽऽलम्बितरत्नकान्तिलहरीवेल्लत्पटैः सप्तभिः,
कूपस्तम्भवरैः समाश्रिततनुः स्फुर्जत्फणादम्भतः ।
रङ्गच्चङ्गगुणप्रथाऽश्लथमहाकाष्ठान्वितः संसृति-
क्षाराब्धौ भविनां फणिध्वजजिनः पोतायमानः श्रिये ॥८॥

रत्नश्रेणियशःप्रशस्तिसहिता यस्य त्रिलोकेशितु-
र्जेतुः सप्तभियां विभान्ति विजयस्तम्भा इवामी फणाः ।
सप्ताप्युच्चतमास्तमालसरला सप्ताश्वतेजोजयि-
ज्योतिर्द्योतिदशां तनोतु सुदृशां श्रीपार्श्वनाथः प्रभुः ॥९॥

एकस्मै प्रददे त्वयेन्द्रपदवी सर्पाय तन्नोऽपि तां,
देव ! प्रापय यत् त्वदीयकरुणा सर्वेषु साधारणा ।
अष्टावष्टकुलैः प्रधानपुरुषा विज्ञीप्सयेतीव यत्-
पार्श्वेऽमी प्रहिताः शिरोंह्रिभुजगव्याजात् स पार्श्वः श्रिये ॥१०॥

व्यामोहप्रबलान्धकारपटलीछन्ने कुतर्कावली-
तद्तद्दुर्गमहेतुगर्त्तविषमीभूते च मोक्षाध्वनि ।
पुंसां सञ्चरतां फणामणिगणा दीप्राः प्रदीपा इव,
भ्राजन्ते किल यस्य शस्यकमलालम्भाय देवः स वः ॥११॥

उत्कृष्टायाः प्रणतभविनां मोहनीयस्थितेर्यः,
कोटाकोटीर्दश-दश पृथक् सागराणां क्षणेन ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चूर्णीकर्तुं फणिपतिफणाव्याजतः सप्तदण्डान्,
धत्ते चण्डान् स भवतु सतां भूतये पार्श्वनाथः ॥१२॥ [मन्दाक्रान्ता]

सद्ध्यानानिलवृद्धदुस्तपतपोदावानलज्वालया,
दुष्कर्मौघवनेऽमितान्तगहने दन्दह्यमाने सति ।
ब्रह्मद्वारविर्निगता मणिगणस्फुर्जत्स्फुलिङ्गान्विता,
श्रीवामेयफणा जयन्तु सततं धूमोग्रलेखा इव ॥१३॥ [शार्दूलविक्रीडितम्]

धत्ते सन्ततमुन्नतिं मलिनतापूरेण दूरे कृतो,
नित्यं जीवनदानदस्त्रिजगतां स्वामी न चाऽमी ततः ।
सेवां कर्तुमुपागता जलधराः सर्वे फणाव्याजतो,
यत्पार्श्वं स शिवश्रियेऽस्तु भगवान् श्रीअश्वसेनाङ्गजः ॥१४॥

गम्भीरध्वनिबन्धुरः फणिमणिश्रेणीतडिद्डुम्बर-
ज्योतिर्भासुरिताम्बरः शमरसप्राग्भारपूर्णान्तरः ।
प्राप्तानन्दविवेकिकेकिनिकरः श्यामाङ्गरोचिर्धरः,
पार्श्वोऽम्भोधरसोदरः स तनुतां शस्यश्रियः शङ्करः ॥१५॥

शुक्लध्यानकलाकलापमतुलं पीयूषयूषोज्ज्वलं,
पातुं यस्य समुद्यतस्य विधृतं चारित्रलक्ष्म्या किल ।
मेघाडम्बरमातपत्रमतुलं वेल्लत्फणामण्डल-
व्याजात् पार्श्वजिनः स वः शिवरमां देयादमेया रयात् ॥१६॥

क्षेत्रोपाधिजमुख्यदुस्सहमहादुःखोर्मिसंवर्मितान्,
मग्नान् सप्त सुसन्ततान्धतमसश्वभ्रान्धकूपेष्वमून् ।
उद्धर्तुं युगपत् समस्तभविनः सप्तापि रज्जूपमा,
रेजुर्यस्य फणाः पराणयतु मां वामाङ्गभूर्मङ्गलम् ॥१७॥

सद्ध्यानप्रथमानवायुपटलैरत्यर्थमुद्वेलितान्,
कारुण्याम्बुनिधेः सदा निरवधेः क्षीरोज्ज्वल ! त्वं दधेः ।
कल्लोला इव रेजिरे बहिरिता देहांशुभिः श्यामला,
एते यस्य फणाः पृणातु स नृणां श्रीपार्श्वदेवः शिवम् ॥१८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नम्राऽनेकसुरासुराधिपनृणां यस्सेव नाकारिणां,
चापल्य-प्लवगीसमानकमलास्वैरित्वविच्छित्तये ।
एता आयसश्रृङ्खला इव फणा यस्य प्रभो रेजिरे,
प्रेष्यत्वप्रतिपन्नपन्नगपतिः पार्श्वः स वस्त्रायताम् ॥१९॥

एताः सप्तनयश्रियां मणिसुमश्रेणीभिरुद्भासिताः,
क्रीडाकल्पलता इवोरगफणाः सप्ताऽपि यस्याबभुः ।
सप्तद्वीपधरानरावलिमनोऽभीष्टार्थसार्थप्रदाः,
श्रीवामातनयो नयोज्वलपथं स प्रापयत्वङ्गिनः ॥२०॥

विश्वेऽत्र सप्तव्यसनोदयश्रियां, व्याषेधनार्थं किल धूमकेतवः ।
अमी समीहां भविनां परीप्रतु, श्रीपार्श्वनाथस्य फणाः स्फुरद्गुणाः ॥२१॥ [उप०]

सरभसपरिरम्भोत्कण्ठया सिद्धिवध्वा,
निजगृहनयनार्थं रज्जवोऽमी विमुक्ताः ।
किमिति हृदि विकल्पा भाविनां सन्दधाना,
ददतु शिवसुखं वः पार्श्वभर्तुः फणास्ते ॥२२॥ [मालिनी]

उद्दामस्थामधामक्रमकमलनमत्सर्वगीर्वाणवृन्दः,
कामान् वामाङ्गजन्मा स सृजतु सफलान् भाविनां भूर्भुवःस्वः ।
यन्माहात्म्यं महेभ्यं वणिज इव सदैवोपजीव्योपजीव्य,
प्राप्ताः ख्याति द्युकुम्भ-द्युमणि-सुरतरु-स्वर्गवी-स्वर्गताढ्यः ॥२३॥ [स्रग्धरा]

प्रथयतु धरणोरगेन्द्रलक्ष्म्या जिनपतिरेष विशेषमुखीर्वः ।
यदमलनखमण्डली विरेजे तम इह हर्तुमिव प्रदाय पङ्क्तिम् ॥२४॥ [पुष्पिताग्रा]

उत्प्रेक्षोपमिति प्रवर्त्तितफणास्तोत्रप्रणीताध्वना,
श्रीपार्श्वः कथमप्यहो ! क्षणमसौ नीतः स्वचित्तं मया ।
मिथ्यानेकविकल्पजालजनितं निर्नाश्य घोरं तमः,
कुर्यान् मे गुरुसोमसुन्दरवरस्वात्मावबोधं महः ॥२५॥ [शार्दूलविक्रीडितम्]

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ४. श्रीमहावीरगुणस्तवः ॥

स श्रीवीरजिनो [धिनो]तु भविनोऽभीष्टार्थसार्थार्पणान्,
नव्यः कोऽपि सुरद्रुमः क्रमनमद्वृन्दारकग्रामणीः ।
त्रैलोक्यादरसङ्गिनः सममहा एकोप्यनेकाङ्गिनस्-
तूर्णं पूर्णमनोरथान् प्रथयति ध्यातः श्रुतो वापि यः ॥१॥ [शार्दूलविक्रीडितम्]

यद्रूपं परमार्थसन्न वचसां तद्गोचरः कर्हिचिद्-
यच्च स्यात् तदऽवस्तु सत्सुरततिः शक्या न यस्य प्रभोः ।
स्तोतुं वीरजिनं व्यवस्यति तमप्येषोऽनुरागेरितः,
शक्याशक्यविचारणे चतुरता प्रायो न यद्रागिणाम् ॥२॥

यं वक्तुं प्रखरीभवेद् भगवती नो वैखरी भारती,
नै वा सावपि मध्यमा कलयितुं प्रागल्भ्यमभ्यस्यति ।
पश्यन्त्याविषयः पुराणपुरुषः स ब्रह्मलक्ष्मीमयः,
श्रीवीरस्तनुतां जिनस्तनुमतां स्वात्मावबोधं महः ॥३॥

प्रत्यूह प्रलयस्त्रिलोकविजयः सौभाग्यभाग्योदयः,
श्री-ह्री-धी-धृति-कीर्त्तयः स्ववशगाश्चाऽष्टौ महासिद्धयः ।
यद्भक्तेर्भविनां भवन्ति भुवनस्वामी स चामीकर-
द्योतिर्द्योतिवपुः प्रपुष्यतु सतां श्रीवर्धमानः श्रियम् ॥४॥

स्वर्गिभ्यो नारकाणां स्थलजलख[च]रप्राणिनां वा नृणां वा,
सोख्याऽद्वैते प्रवृत्ते त्रिजगति विलसत्सान्द्रहर्षप्रकर्षे ।
भेदं नो वेद विद्वानपि निपुणमतिर्यस्य जन्मोत्सवेऽसौ,
लक्ष्मीः श्रीवर्धमानः प्रथयतु भगवान् भाविनां वर्धमानाः ॥५॥ [स्रग्धरा]

प्रह्वेन्द्राणीगणानि स्फुटपटहरवव्याप्तविश्वाङ्गणानि,
क्रीडद्देवाऽसुराणि श्रवणसुखसुरीगीतिभिर्भासुराणि ।
वीरस्याऽनर्गलानि त्रिजगदधिपतेर्मङ्गलानि क्रियासु-
र्ज्योतिः स्फीताम्बराणि त्रिदशगिरिवरे मज्जनाडम्बराणि ॥६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्षुभ्यत् क्षारार्णवार्णः प्रसृमरलहरीप्लाव्यमानक्षमाभृत्-
प्राग्भाराक्रान्तभूमीभरनमितफणः प्राप मूर्च्छां फणीन्द्रः ।
ब्रह्माण्डस्फोटशङ्काभयचकितहृदः कम्पमापुः सुरेन्द्रा-
यस्याऽङ्गुष्ठप्रयोगाच्चलति सुरगिरौ वर्धमानः श्रियेऽसौ ।।७।।

तन्वानो बालकेलीस्तरुवरशिखराद् व्यालमालाः कराला-
दूरं बाला मृणालीरिव बलजलधिर्लीलयोत्कीर्णवान् यः ।
कुब्जं मुष्टिप्रहारात् सुरममरनगोत्तुङ्गमप्यादधानः,
स्तादन्वर्थाभिधानः स भवभयभिदे श्रीमहावीरदेवः ।।८।।

अत्यासन्नमपि स्वचित्तसचिवं गुप्तोऽक्षिपत् स्वैरिणं,
मूलादुत्खनकुन्तलांश्च कुटिलान् शीघ्रं स्वकीयानपि ।
स्वायत्तं करणव्रजं विरचयत्येकातपत्रं सृजन्,
साम्राज्यं भवतां शिवाय भवताद् वीरः क्षमाभृद्वरः ।।९।। [शार्दूलविक्रीडितम्]

यस्याज्ञामुररीचरीकृति सहस्राक्षा भुजिष्या इव,
ब्रह्मेशाननरायणप्रभृतयो देवाश्च सेवाकरा ।
कामः सोऽपि विगोपितत्रिभुवनो येन क्षणान्निर्जितो,
देवानामपि देवता स भवतात् श्रीवर्धमानः श्रिये ।।१०।।

दीर्यन्ते हृदयानि यैः स्मृतमपि प्राप्तैरपि स्वर्गिणां,
तान् गोपासुरपामरादिरचितान् दुर्गोपसर्गव्रजान् ।
सम्यग् यः परिषह्य मोहनृपतिं जित्वाऽऽसदत् केवल-
ज्ञानं ध्यानपथं प्रयातु भगवान् श्रीवीरदेवः स वः ।।११।।

तूर्णं जीर्णसुचीर्णपूर्णनियमाद्यष्टाङ्गयोगौषधैः,
प्राग् स्वात्मानमबीभवच्छमरसैर्यः पारदैर्लोहवत् ।
सद्ज्ञानाऽनलदग्धकार्मणमलं कल्याणरूपं व्यधात्,
दीव्यत्केवलचिन्मयं स जयतु श्रीवीरयोगीश्वरः ।।१२।।

गौरीभूतकलापतिर्गणभृता तन्तन्यमाना नति-
र्हेला निर्जितसर्वदैवतमहः कन्दर्पदर्पापहः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उत्पत्ति-स्थिति-संहृति त्रयपदप्रस्तावकः स त्रयी-
मूर्तिः शम्भुरिव श्रियेऽस्तु भगवान् श्रीवर्धमानः प्रभुः ॥१३॥

यद्वेदज्ञैर्न भिन्नं न हि सुरगुरुणा नो सहस्राक्षलक्षै-
र्नापि श्रीभारती ये महसि च हसिताऽऽदित्यकान्तौ विलीनम् ।
तद्भिन्दानः सभायामसुर-सुर-नराधीश्वराणां समक्षं,
सन्देहध्वान्तजातं सकलगणभृतां सोऽस्तु वीरः शिवाय ॥१४॥ [स्रग्धरा]

नित्यं यो जागरूकप्रकृतिरविकृतिर्दग्धकन्दर्पहव्यो,
जात्यस्वर्णाङ्गवर्णो दुरितभरहरः स्वर्गसौख्यस्य दाता ।
वाक्-चेतः-कायकुण्डत्रय इह निहितो वेदविद्या विधिज्ञै-
र्भक्त्या संसेव्यमानो वितरतु स शिवं श्रीमहावीरदेवः ॥१५॥

श्रीमद् वीरस्य वाणी द्व्यधिकदशभिदां पर्षदां हर्षदात्री,
दात्री सन्देहपङ्क्तेः समसमयमहो ! भुर्भुवःस्वर्जनानाम् ।
संसारापारपाथःपतिपतितजनोत्तारणे यानपात्री-
भूता भूतावलीनां दिशतु शिवरमाः सारमाधुर्यपात्री ॥१६॥

गामेकां त्रिपदीं भजद्द्विजवरव्राताय गाढार्थिने,
यो दत्ते स्म परःसहस्रगणना गा बिभ्रदप्यन्वहम् ।
दातॄणां प्रथमस्तथापि कुतुकं जेगीय्यते योगिभिः,
स श्रीमान् भुवनातिशायिचरितः श्रीवर्द्धमानः श्रिये ॥१७॥ [शार्दूलविक्रीडितम्]

प्राग्भारैर्भगवान् गवां प्रसृमरैर्मोहान्धकारोच्चय-
प्रध्वंसं रचयश्च यः कुवलयप्रोल्लासमापादयन् ।
पापव्यापविपाकततततनुभृत्सन्तापनिर्वापणः,
श्रीवीरो जिनचन्द्रमाः सुमनसां देयाददेयारमाः ॥१८॥

यस्यैव द्वादशाङ्गात् त्रिदशतरुवनात् सूक्तिपुष्पैर्गृहितै-
र्ग्रन्थं ग्रन्थं स्वबुध्या बहुविधरचना ग्रन्थमाला विशालाः ।
मालाकारा इवापुः सकलमतगता ग्रन्थकाराः प्रसिद्धिं,
स श्रेयस्त्रैशलेयः प्रथयतु भुवनध्येयसन्नामधेयः ॥१९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गौर्यस्यैकाप्यचिन्त्यप्रसृमरमहिमा गोतमानामवाप्या-
ऽऽश्लेषं प्रासूत तास्ताः समसमयमहो ! विश्वकुक्षिम्भरीर्गाः ।
पायं पायं व्यपायं मधुमधुररसान् भव्यजीवा यदीयां-
स्तापं निर्वापयन्ते भवदवथुभवं स श्रिये वर्द्धमानः ॥२०॥

व्यापी लोकाग्रगोऽपि प्रतिसमयजनि-ध्वंसवान् शाश्वतोऽपि,
ज्योतीरूपोप्परूपो व्यपगतकलुष-ध्यानगम्योप्यगम्यः ।
सङ्ख्यावानप्यसङ्ख्यः सकलगुणमयोऽप्यग्रणीर्निर्गुणानां,
श्रेयः स्याद्वादरूपः प्रथयतु भगवांस्त्रैशलेयः प्रजानाम् ॥२१॥

लक्ष्मीं वीरः स दिशतु सतां यत्पदौ वन्दमानाः,
सङ्क्रामन्तः क्रमनखमणीदर्पणान्तर्भवेयुः ।
लोको एकादशतनुधरा ईश्वरा एव सर्वे,
नित्यं मृत्युञ्जयपदभृतः श्रीशिवाश्लेषभाजः ॥२२॥ [मन्दाक्रान्ता]

श्रीमान् योगधुरन्धरस्थितिधरः सन्नन्दनश्रीभरः,
सौवर्णद्युतिभासुरः प्रतिदिनं मध्यस्थतासुन्दरः ।
ज्योतिश्चक्रधरः सुपर्वनिकरस्थानं श्रियां सङ्करः,
कुर्यान्मन्दरसोदरः शिवसुखं श्रीवीरतीर्थङ्करः ॥२३॥ [शार्दूलविक्रीडितम्]

देवः सेवकवत्सलस्तनुमतां दत्तां प्रमत्तांऽऽतराऽऽ-
रातिस्फातिभरप्रपातिजनतात्राता स वीरः श्रियम् ।
चित्रं यस्य कपोलयोः प्रतिफलद् वीक्ष्य स्वचक्षुर्जना,
भृङ्गभ्रान्तिभृतश्चरीक्रति मुहुश्चेलाञ्चलैर्वीजनम् ॥२४॥

श्रीसिद्धार्थनरेशवंशकमलाशृङ्गारचुडामणि-
र्मूर्छन्मोहमहान्धकारहरणप्राभातिकाहर्मणिः ।
एवं किञ्चिदपि स्तुतस्तनुधिया श्रीवर्धमानो मया,
स्ताल्लब्धोदय**सोमसुन्दरगुरु**श्री-ह्री-धृति-स्फीतये ॥२५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## २) आनन्दवल्लभानां कृतयः ॥

### १. षीचुन्दजिनाधिपतिस्तवनम् ॥

शङ्के नृलोकं कलिभीमसिन्धोरुद्धर्त्तुकामः प्रकटीबभूव ।
यो विश्वमानं मुनिसेवितं तं, वन्दे चतुष्यष्टिजिनं मुदाऽहम् ॥१॥ [उपजातिः]

वराङ्गनागानसमूहयुक्तं, दशाङ्गधूपार्पणचारुभक्तिम् ।
सद्गन्धपुष्पार्चितपादपद्मं, वन्दे चतुष्यष्टिजिनं मुदाऽहम् ॥२॥

सुश्रीकटीपालिसुदीप्तिमन्तं, नवीनपक्वान्नकृतोपहारम् ।
विन्यस्तमुक्ताफलस्वस्तिकाग्रं, वन्दे चतुष्यष्टिजिनं मुदाऽहम् ॥३॥

तिर्थोदकव्यूहनिषिक्तगात्रं, सुगन्धिवासादिविलिप्तदेहम् ।
सुनालिकेरादिफलार्चनीयं, वन्दे चतुष्यष्टिजिनं मुदाऽहम् ॥४॥

यस्याग्रतो देवनरेन्द्रसङ्घाः, कुर्वन्ति भक्त्या परया सहर्षम् ।
आरात्रिकां तं भवनाशदक्षं, वन्दे चतुष्यष्टिजिनं मुदाऽहम् ॥५॥

इत्यष्टभेदां बुधवृन्दमान्यां, भव्याश्रितां मोक्षपथानुकूलाम् ।
सुद्रव्यपूजां लभमानमार्यं, वन्दे चतुष्यष्टिजिनं मुदाऽहम् ॥६॥

गजादिभीनाशकरं सदैव, सर्वार्थदानैकसुरद्रुकल्पम् ।
आधिप्रणाशे सुधियांसुरत्नं, वन्दे चतुष्यष्टिजिनं मुदाऽहम् ॥७॥

षीचून्दसुस्थानविराजमानं, गवाक्षजालान्वितमन्दिरस्थम् ।
सज्ज्ञानयोगीश्वरयातपारं, वन्दे चतुष्यष्टिजिनं मुदाऽहम् ॥८॥

चतुर्णिकायाधिपसेवनीयं, विद्याधरेन्द्रार्जितहृद्यसेवम् ।
अतीन्द्रियं शान्तिकरं जनानां, वन्दे चतुष्यष्टिजिनं मुदाऽहम् ॥९॥

(९) निधि-(५) काया(८) ष्ट-सि(१) ध्यब्दे, आषाढे माससश्रमे ।
तृतीयाकर्मवाट्यां च, चतुष्यष्टिजिनाधिपः ॥१०॥ [अनुष्टुभ्]

विदुषो **रामचन्द्रस्य**, विनेयेन हितैषिणा ।
**आनन्दवल्लभे**नाऽसावनावि स्तोत्रतो मुदा ॥११॥

●●●

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## २. श्रीशत्रुञ्जयतीर्थाष्टकम् ॥

जगामयं श्रीवीरनाभिनन्दनोऽप्यनैकशः पुष्कलसाधुसंयुतः ।
अनन्तसज्ज्ञानधरो युगेशः, शत्रुञ्जयं तं प्रणमामि भक्तितः ॥१॥ [उपजातिः]

गणाधिपश्शोभनपुण्डरीकको, वव्रे च यस्मिन् शिवसौख्यसम्पदम् ।
लसन्मुनीनामिषुकोटिभिस्समं, शत्रुञ्जयं तं प्रणमामि भक्तितः ॥२॥

मुनीश्वराः शैलक-पन्थकादयः, सुलेभिरे यत्र सुखावहं शिवम् ।
दुर्भेद्यकर्मारिविनाशनक्षमं, शत्रुञ्जयं तं प्रणमामि भक्तितः ॥३॥

अनेकयुद्धार्जितपापकर्मकाः, श्रीपाण्डुपुत्रा गतकल्मषा मुदा ।
ययुः पदं यत्र सुखैकभाजनं, शत्रुञ्जयं तं प्रणमामि भक्तितः ॥४॥

इक्ष्वाकुवंशे भरताख्यभूपतेः, पट्टे च वव्रुर्मुनयो हि यन्नगे ।
असङ्ख्यकाः सिद्धिवधूं मनोहरां, शत्रुञ्जयं तं प्रणमामि भक्तितः ॥५॥

स्वयं त्रयोविंशतितीर्थनायकाः, विना च नेमिं सुखधाम्नि वव्रजुः ।
यत्राऽचले देवनरेन्द्रसेवितं, शत्रुञ्जयं तं प्रणमामि भक्तितः ॥६॥

विद्याधरैश्वर्यधरा मुनीश्वरा, नम्यादयो यत्र सुखेन वव्रजुः ।
सुरा-ऽसुराधीशनिषेव्यमुत्तमं, शत्रुञ्जयं तं प्रणमामि भक्तितः ॥७॥

चक्रेश्वरी-गोमुखयक्षसेवितः, शिवैकमार्गो गिरिराजशेखरः ।
योभूत् सदा भव्यहिताय नामतः, शत्रुञ्जयं तं प्रणमामि भक्तितः ॥८॥

६ २ ८ १
रस-द्विकाऽष्ट-सिध्यब्दे, राधमासे सिते दले ।
द्वितीयाकर्मवाट्यां च, नुनाव प्रथमो जिनः ॥९॥ [अनुष्टुभ् ]

कवेः श्री**रामचन्द्र**स्य, शिष्येणाऽत्महितेच्छुना ।
**आनन्दवल्लभे**नाऽसौ, श्रीसङ्घेन समं मुदा ॥१०॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३. लोद्रवमण्डनश्रीपार्श्वनाथाष्टकम् ॥

अश्वसेननरेन्द्रस्य, वामादेव्याश्च सत्सुतः ।
श्रीपार्श्वो जाग्रदैश्वर्यो, भूयान्मे भवभित्तये ॥१॥ [अनुष्टुभ्]

भविदुःखदवानलमेघसमो, जनसौख्यकरः शिवशर्मगतः ।
शुभभावविकासनसूर्यनिभो, जय पार्श्वजिनेश्वरकामघटः ॥२॥ [तोटकम्]

अतिदुर्जयकामनिवारक हे, त्रिदशोत्तमसेवितपत्कज वै ।
गतमोहविनाशितकर्मदलो, जय पार्श्वजिनेश्वरकामघटः ॥३॥

वरकृष्णतनो शुभकल्पतरो, जगदीश्वर शोभननित्यसुधीः ।
वरकेवलबोधितभव्यजनो, जय पार्श्वजिनेश्वरकामघटः ॥४॥

गतकल्मष-साधितमोक्षसुखः, फणिचिह्नगतः शिवसार्थपतिः ।
भवसन्ततिसञ्चितकर्महरो, जय पार्श्वजिनेश्वरकामघटः ॥५॥

निरुपाधिकसर्वकलासुनिधि-र्निजकान्तिविर्निजितदेहिगणः ।
अघसन्ततिमात्रविभेदकरो, जय पार्श्वजिनेश्वरकामघटः ॥६॥

विजितान्तरवैरिगणो भगवान्, समतारसपूरगतः सततम् ।
नवरत्नितनुः सुविभुः सुखदो, जय पार्श्वजिनेश्वरकामघटः ॥७॥

अतिमन्त्रसुगर्भितरम्यतरं, तव नाम जपन्ति नरा इह ये ।
परियान्ति सुखानि च ते हि कलौ, जय पार्श्वजिनेश्वरकामघटः ॥८॥

४ ६ ८ १
वेदरस-सिद्धि-चन्द्रवर्षे ज्येष्टे सिते दले ।
राकायां च तिथावेष, संस्तुतः पार्श्वनायकः ॥९॥ [अनुष्टुभ्]

विदुषो **रामचन्द्रस्य**, विनेयेन हितैषिणा ।
**आनन्दवल्लभे**नेति, सः श्रीलोद्रवपत्तने ॥१०॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ४. कोटारामपूरमण्डनश्रीचन्द्रप्रभजिनाष्टकम् ॥

सुमेरुसन्मौलिकृताभिषेककं, देवाधिदेवं गतकल्मषं सदा ।
सुभूरिभक्त्या विहितार्यपूजनं[१], चन्द्रप्रभं नौमि जिनं सनातनम् ॥१॥ [उपजातिः]
अज्ञानसुप्तेषु जनेषु पूषणं, कन्दर्पदावानलशान्तिकारिणम् ।
अनिष्टकर्मारिविनाशकारकं, चन्द्रप्रभं नौमि जिनं सनातनम् ॥२॥
सच्चैत्रमासे सितपञ्चमीतिथौ, सुवैजयन्ताच्च्युतमायुषः क्षये ।
सुलक्ष्मणाऽपत्यमनन्ततेजसं, चन्द्रप्रभं नौमि जिनं सनातनम् ॥३॥
सुपोषमासे सितपक्षके मुदा, सद्द्वादशीकृष्णतिथिप्रसूतिकम् ।
चन्द्रावतीस्वामिमहेशनन्दनं, चन्द्रप्रभं नौमि जिनं सनातनम् ॥४॥
त्रयोदशीकृष्णदले मनोहरे पौषस्य सञ्जातयमाभिलाषकम्[२] ।
सन्त्यक्तराज्यादिपदार्थमण्डलं, चन्द्रप्रभं नौमि जिनं सनातनम् ॥५॥
शुक्लेतरायां शुभसप्तमीतिथावनुत्तरे फाल्गुनमासि सत्तमे ।
सञ्जातसर्वोत्तमकेवलं वरं, चन्द्रप्रभं नौमि जिनं सनातनम् ॥६॥
वरेण्यभाद्रस्य च सप्तमीतिथौ, सितेतरायां वृतमोक्षसत्पदम् ।
ज्ञानत्रयीरूपमनन्तकेवलं, चन्द्रप्रभं नौमि जिनं सनातनम् ॥७॥
अखण्डकान्ति गतमोहबन्धनं, निरामयं निर्जितकर्मपेटकम् ।
अनन्तरूपं गतभावबन्धनं, चन्द्रप्रभं नौमि जिनं सनातनम् ॥८॥
४ ७ ८ १
वेदाब्धि-वसु-सिध्यब्दे, वैशाखे मासि शोभने ।
शुक्लाष्टम्यां गुरौ वारे, पुष्यनक्षत्रसंयुते ॥९॥ [अनुष्टुभ्]
कोटारामपूरे वर्ये, चन्द्रप्रभजिनाधिपः ।
वाचनाचार्यवर्यस्य, **रामचन्द्र**गणीशितुः ॥१०॥
**आनन्दवल्लभे**नाऽयं, शिष्येणात्महितेच्छया ।
जिनालयप्रतिष्ठायां, संस्तुतो जिननायकः ॥११॥

---

१. 'विहितोपहारं' इत्यपि पाठः प्रतौ अस्ति ।

२. सञ्जाता यमस्य-संयमस्य-चारित्रस्य अभिलाषा यस्य सः सञ्जातयमाभिलाषकः तम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ५. श्रीशिखरगिर्यष्टकम् ॥

नगाधिराजं सुरराजसेवितं, शिवैकमार्गं सुखसन्ततिप्रदम् ।
अघेभमालाहरणे मृगाधिपं, सम्मेतशैलं प्रणमामि भक्तितः ॥१॥ [उपजातिः]

जगत्त्रयीपावनकारकं सदा, सन्तापदावानलवारिवाहकम् ।
अनेकवृक्षावलिभिर्विराजितं, सम्मेतशैलं प्रणमामि भक्तितः ॥२॥

भव्याङ्गिनां सातसमूहदायकं, सद्वर्णतो निर्जितमेघमालकम् ।
सत्पुष्पजालेन सुगन्धभूतकं, सम्मेतशैलं प्रणमामि भक्तितः ॥३॥

जिनेन्द्रसद्विंशतिसंयुतं वरं, समाश्रितं साधुजनैः सुखावहम् ।
उत्तुङ्गताव्योमगणावलम्बिनं, सम्मेतशैलं प्रणमामि भक्तितः ॥४॥

नरेन्द्रवृन्दैर्बहुधा सुपूजितं, तीर्थेषु वर्यं महिमालयं शुभम् ।
भावारिसङ्घातविनाशनक्षमं, सम्मेतशैलं प्रणामि भक्तितः ॥५॥

सर्वार्थसंसाधनकल्पपादपं, सुभूरिचिन्ताहरणे मणिप्रभम् ।
भवाब्धिसन्तारणयानपात्रकं, सम्मेतशैलं प्रणमामि भक्तितः ॥६॥

प्रचण्डसिंहादिभयान्तकारकं, नद्यादिसंशोभितपार्श्वमण्डलम् ।
पदे-पदे निर्जरपङ्क्तिशोभितं, सम्मेतशैलं प्रणमामि भक्तितः ॥७॥

सुशर्मदं सिद्धिकरं यशस्विनं, गुणाकरं भव्यविकाशकारकम् ।
अमोघशक्तिं सकलार्थभाजनं, सम्मेतशैलं प्रणमामि भक्तितः ॥८॥

नन्द[९]र्षि[७]व[८]सुचन्द्रा[१]ब्दे, माघे कृष्णदले शुभे ।
सप्तमीकर्मवाट्यां च, स्तुतः सम्मेतपर्वतः ॥९॥ [अनुष्टुभ्]

वाचनाचार्यवर्यस्य, **रामचन्द्र**जितः सदा ।
शिष्यज्ञो **मेदचन्द्रेण**, श्रीसङ्घेण समं मुदा ॥१०॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ६. श्रीशिखरगिरिवन्दनम् ॥

सद्विंशतिः श्रीजिननायकानां, सम्मेतशैले प्रवरे गिरीन्द्रे ।
निर्वाणमार्गं जगदुत्तमं वै, शुद्धात्मनामाश्रयमग्र्यभूतम् ॥१॥ [इन्द्रवज्रा]
सुनेमिनाभेयसुवर्धमानसुवासुपूज्यं च विनैव लेभे ।
सुपूज्यसौभाग्यगणाधिपैर्या, सुवन्दिता सा वरभक्तिभाग्भिः ॥२॥ [उपेन्द्रवज्रा]
प्रतिसनु (?) पदे दत्ते, जातो मे हर्षनिर्ज्झरः ।
तं च जनाति सर्वज्ञो, नान्यो वेदयितुं क्षमः ॥३॥ [अनुष्टुभ्]

• • •

## ७. श्रीशिखरगिरिस्तुतिः ॥

श्रीसम्मेतगिरौ शृङ्गे, पार्श्वनाथो जगत्प्रभूः ।
निर्वाणपदमासश्च, तं वन्दे सुतरां मुदा ॥१॥
सुराऽसुरनरेन्द्रैश्च, वन्दिता जिननायकाः ।
भवन्तु सुखदा नित्यं, सङ्घस्य गतकल्मषाः ॥२॥
द्वादशाङ्गात्मका वाणी, तीर्थनाथमुखोद्गता ।
भूयात् साहाय्यदा नित्यं, भविनां हितकारका ॥३॥
**जिनसौभाग्यसूरे**श्च, शासनोन्नतिकारिणि ।
शासनाऽधीश्वरी रम्या, करोतु सुखमव्ययम् ॥४॥

• • •

## ८. श्रीशिखरगिरितीर्थपतीनां स्तुतिः ॥

स्मृत्वाऽहं शिखरेऽजितं गुणमितं[१] तूर्यं सदा पञ्चमं,
षष्टं सत्तमसत्तमाऽष्टमजिनं श्रीपुष्पदन्ताभिधम् ।
वर्य्यं श्रीदशमं गणाधिपसमं[२] बर्हिःककुत्सम्मितं[३],
चाऽनन्तं दशपञ्चमं जिनवरं श्रीशान्तिनाथं मुदा ॥१॥ [शार्दूलविक्रीडितम्]

---

१. 'तृतीयं' इति भावः । २. गणधिपः-शिवः तेन समं, अर्थात् एकादशम् । ३. बर्हिः-अग्निः-त्रिसंख्यादर्शकः ककुद्-एकसंख्यादर्शकः बर्हिः ककुद्सम्मितं अर्थात् त्रयोदशम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रीकुन्थुं जगदुत्तमाऽरकपतिं श्रीमल्लिनाथं वरं,
वल्गुश्रीमुनिसुव्रतं नमिजिनं श्रीपार्श्ववामाङ्गजम् ।
ईडे देवनरेन्द्रवृन्दमहितं सत्साधुभिः सेवितं,
चेत्थं विंशतिमर्हतां प्रतिदिनं श्रेयस्करीं सर्वदा ॥२॥

• • •

## ९. श्रीबटुकाष्टकम् ॥

शीर्षे फणीन्द्रं गजचर्मराजितं, प्रचण्डदोर्दण्डजितारिमण्डलम् ।
सुरक्तनेत्रद्वयचारुविग्रहं, वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥१॥ [उपजातिः]

सद्ग्रामसद्रङ्गसुशैलकानने, प्रधानवाप्यां प्रवरे जलाशये ।
गृहीतपूजं नतलोकपत्कजं, वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥२॥

सुगन्धसद्वर्णसुपुष्पमालया, सुशोभितं ह्यष्टभयान्तकारकम् ।
अनेकविघ्नप्रकरैकवारणं, वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥३॥

सिन्दूरतैलान्वितमूर्तिमालितं, सर्वोपहारैर्महितं दिवानिशम् ।
अनेकलोकार्थविधानतत्परं, वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥४॥

कदापि सद्बाल्ययुतं मनोहरं, कदापि चोद्दीपितयौवनोदयम् ।
कटिप्रदत्तोद्धुतघुर्घराखं, वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥५॥

चञ्चद्त्रिशूलं क्रमपादुकायुगं, सुकेशपाशं गलमुण्डमालकम् ।
अरातिवर्गस्य विदारणे क्षमं, वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥६॥

सुप्ते स्थिते जाग्रति शैलमस्तके, सुदुर्द्धरे वैरिगणे समागते ।
सद्यानपात्रं बहुकामितार्थदं, वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥७॥

कार्यस्य सिद्धौ वरदं शुभार्थिनां, पुंसामभीष्टार्थकरं निरन्तरम् ।
श्ववाहनं सज्जनहर्षकारणं, वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥८॥

गञ्जेजीमे वरे श्रीमन्नेमीश्वरजिनालये ।
बटुकः क्षेत्रपालोऽयं, भूयात् साहाय्यकारकः ॥९॥ [अनुष्टुभ्]

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## १०. चम्पापूरीमण्डनश्रीवासुपूज्यजिनवन्दनम् ॥

चम्पापुर्यां वरेण्यं द्विदशमपतिं रक्तपद्माभकायं,
संसारे यानपात्रं सुजनसुखदं जातजन्मादिकार्यम् ।
योगीन्द्रं योगीगम्यं स्वभिनतपदं सेवितं देववृन्दै-
र्वन्देऽहं सारसारं महिषपतिना वन्दितं वञ्छितास्यै ॥१॥ [चित्रमाला]

वासुपूज्यो जिनेन्द्रो हि, यात्रिकानां मनोरथान् ।
सम्पूरयतु नित्यं च, कल्पवृक्षसमः प्रभुः ॥२॥ [अनुष्टुभ्]

• • •

## ११. श्रीसम्मेतशिखरजिनवन्दनम् ॥

ध्येयां योगिवरैः सुरेन्द्रमहितां मोक्षार्थदां प्राणिनां,
सम्मेते शिखरे गतां कविनुतां विद्याधरैस्सेविताम् ।
संसारे पततां विशां सुखकरीं द्रोणीमिवालम्बनं,
वन्दे श्रीजिनराजसन्ततिमहं रागादिनिर्णाशिकाम् ॥१॥ [शार्दूलविक्रीडितम्]

• • •

## १२. श्रीसीमन्धरजिनस्तुतिः ॥

कल्याणैकमयं सुवर्णसदृशं शालत्रयाऽध्यासिनं,
शुद्धं श्रीवृषलाञ्छनं जिनवरं श्रीपुष्कलाधीश्वरम् ।
सत्यक्यास्तनुजं सुबोधजनकं श्रेयांसराज्ञः सुतं,
भव्याऽम्भोरुहभास्करं प्रतिदिनं सद्देशनादायकं ।
सच्चित्ताब्जविकासनैकतरणिं ध्यायं मुनीन्द्रैस्सदा,
श्रीसीमन्धरसज्जिनं सुमनसा संस्तौमि सद्भक्तितः ॥१॥ [शार्दूल०-षट्पदी]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३ ) जिनप्रभसूरिविरचितौ जन्माभिषेकौ ॥

### १. श्रीमुनिसुव्रतस्वामिजन्माभिषेकः ॥

जय सिरिसमलंकिय गयकमलंकिय, पायपवित्तिय महिवलय ।
मुणिसुव्वय सामिय शिवपुरगामिय, वीसमजिण जय गुणनिलय ॥१॥

पहु पाणयकप्पविमाण मोत्तु, मइ सुयवर अवहि तिनाणजुत्तु ।
अवयरिउ सावणपुन्निमाए, रायगिहनयरि जगुत्तमाए ॥२॥

पाउमावइदेवीए उयरम्मि, सामिय सुमित्तनरवइघरम्मि ।
जेट्ठहकसिणट्ठमि तुज्झ जम्मु, किउ दिसाकुमारिहिं सूइकम्मु ॥३॥

तावह चलियासणु सक्कु एइ कयपंचरुवु मेरुम्मि नेइ ।
पंडगवणि मणिसीहासणम्मि, संमिलियचउव्विहसुरगणम्मि ॥४॥

मणि-कणग-रयण-रुप्पाइयाण, साहावियाण वेउव्वियाण ।
जुय जुय अट्ठोत्तर अट्ठसहस, सुपवित्त सुरहि जलभरिय कलस ॥५॥

चंदुज्जलचमरढलंतएहिं, नाणविहनट्टकरंतएहिं ।
भत्तिब्भरनिब्भरसायरेहिं, अहिसित्तउ सामिय सुरवरेहिं ॥६॥

धणुवीसमाणु नवमेहवन्नु, फग्गुण सिय बारसिवउ पवन्नु ।
पहु पुण कसिणाए बारसम्मि, उप्पन्नु नाणु ठियज्झणरम्मि ॥७॥

तुह केवलमहिमा करइं देव तिहुयणजिण निरुवम विहिउ सेव ।
पडिबोहिय जोयणगामिणीए, वाणीए भविय सुहवासिणीए ॥८॥

अट्ठारस गणहर तुज्झ हूय, पहु तीससहससमणेहिं जूय ।
पन्नाससहस वर अज्जियाउ, जिण दिक्खिय मोक्ख समज्जुयाउ ॥९॥

बाहत्तरि सहस सणाहु लक्खु, पडिबोहिय सावग पवर पक्खु ।
तिन्नेव लक्ख व सावियाउ, पन्नास सहस्सिहिं समहियाउ ॥१०॥

तुह सोहइ संघु सयाणजत्तु, चउभेउ धम्मु किर मुत्तिमंतु ।
अद्धट्ठम वाससहस्स देव, तं विहरिउ महियलि निरुवलेव ॥११॥

संमेयसेलसिहरम्मि पत्तु, वासाणि तीस सहसाणि भुत्तु ।
पइं जेट्ठकसिणनवमीए मोक्खु, संपाविउ सामिय परमसोक्खु ॥१२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इय सुव्वयमाहह नाणसणाहह, **जिणपहुसूरिहिं** संथविय ।
पंच वि कल्लाणाइं सुक्खनिहाणाइं, कल्लाणगु देयउ भविय ॥१३॥

• • •

## २. श्रीपार्श्वनाथजन्माभिषेकः ॥

जय जय जगनायग सिवसुहदायग पास पयासियपरमपय ।
तिहुयणसिरसेहर करुणाकुलहर पावियअंतरवइरिजय ॥१॥
जय पाणयकप्पविमाणचूय, जय उत्तम तिहिं नाणेहिं जूय ।
महु कसिण चउत्थि वाणारसीए, नयरीए अवयरिउ सुहास्सीए ॥२॥
सिरिआससेणरायाहिराय-वम्मादेविराणीउरि जाय ।
पोसकसिणदसमीए जाउ, तिहुयण तारेउं वीयराउ ॥३॥
छप्पन्निहिं दिसाकुमारियाहिं, कीउ सूइकम्मु हियारियाहिं ।
देविंदिहिं मन्दरगिरिसिरम्मि, किउ जम्मु महूसवु तुज्झ रंमि ॥४॥
नवहत्थमाण घणनीलवन्नु, वच्छरिउ दाणु देविणु सुवन्नु ।
पहु पोसकसिण इगारसिम्मि, ठाविउ मणु विहरइ संजमम्मि ॥५॥
अह चेत्तहकसिण चउत्थि नाणु, उप्पाडइ सामिउ अइपमाणु ।
तुह देविहिं विरइउ समवसरणु, तं पास सामि तियलोयसरणु ॥६॥
तं सामिय सिवपुरसत्थवाहु, दस गणधर सोलसहस साहु ।
अडतीस सहस समणीण नाह, तुह हूया सावग गुणसणाह ॥७॥
चउसट्ठिसहस अनु एगलक्खु, सत्तावीस सहस तिगलक्ख पक्खु ।
सड्ढीण एव कीउ चउसंघु, लंघिउ भवसायरु तुहु दुलंघु ॥८॥
सम्मेयगिरिम्मि जगपवित्तु, सावणसुद्धट्ठमि सिद्धि पत्तु ।
तुह नामि सामि उवसग्गु जंति, वीओग-सोग नहु रोग हुंति ॥९॥
जे पत्थेइं पूयइं भत्तिमंत, ते पावइ सिंवसुह सत्तवंत ।
तिहुयणचिंतामणि पासनाह, मह देसु मोक्ख आरोहवाह ॥१०॥
इय पत्तग्गुह हयउवसग्गुह, पासजिणिंदह थवणु किउ ।
**जिणपहु** पय लग्गुह भव उव्विग्गुह, भवि भवि तं पहु लहइ जिउ ॥११॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ४) अज्ञातकर्तृकाणि पञ्चजिनस्तोत्राणि ॥

### १. श्रीआदिजिनस्तोत्रम् ॥

भीमभवसंभमझंतजंतुसंताणा ताणदाणखमं ।
उसभं जिणवसभमहं, थुणामि भावेण भुवणगुरुं ॥१॥ [गाहा]

चविउं सव्वट्ठाउं, कसिणचउत्थीइ तुमसाढस्स ।
ओइन्नो उद्धरियं, जयमिव इक्खागभूमीए ॥२॥

चित्तबहुलट्ठमीए धणुम्मि रासिम्मि कणयगोरंगो ।
जाओ सि तुमं जयगुरु, जयमाणो तिहुयणपमोयं ॥३॥

चउहि सहस्सेहि समं, सामंताणं तणं व चईय सिरिं ।
चित्तबहुलट्ठमीए, छट्ठेण तुमं व णिक्खंतो ॥४॥

फग्गुणबहुलक्कारसीइ, तं देवपुरम्मि तालम्मि ।
वाससहस्ससंते, संपत्तो केवलालोयं ॥५॥

चुलसीइ पुव्वलक्खे, सव्वाउं धरिय माहकिन्हाए ।
तं तेरसीय निव्वुइ, जिण ! जय अट्ठावयगिरिम्मि ॥६॥

●●●

### २. श्रीशान्तिजिनस्तोत्रम् ॥

हरिकरिं रहुकडं चक्कलच्छिमुज्झिय पवन्न चरणसिरिं ।
भुवणत्तयकयसंति, संतिजिणिंदं थुणामिऽहं ॥१॥ [गाहा]

देव ! तुमं भद्दवए कसिणाए सत्तमी सव्वट्ठे ।
मुत्तुं गयरइ गयउ[र]नयरे, गब्भम्मि संकंतो ॥२॥

जिट्ठस्स तेरसीए, किन्हाए देव तं कणयवन्नो ।
भत्तिनमंतसुहम्मेसा मेसरासिम्मि जाओसि ॥३॥

पत्थिवदससयजुत्तो, बहुलाए चउद्दसीइ तं जिट्ठे ।
कयछट्ठो सामन्नं, नीसामन्नं पन्नवोसि ॥४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

छउमत्थो वरिसं विहरिऊण, पोसस्स सुद्धनवमीए ।
पाविय सहसंबवणं, जय पहु पत्तोसि नाणधणं ॥५॥

जिट्ठबहुलम्मि संमेयपव्वए, तेरसीइ वरिसाण ।
सव्वाउं लक्खं पालिऊण, जिण ! निव्वुइ नमो ते ॥६॥

• • •

## ३. श्रीपार्श्वजिनस्तोत्रम् ॥

सढकमठदप्पचमढणविढत्त सरयब्भविब्भमजसोहं ।
सयलभुवणपयासं, पासजिणिंदं पणिवयामि ॥१॥ [गाहा]

चित्ते कण्हचउत्थीए, पाणयाओ चइत्तु ओइन्नो ।
तुट्टभववासपासो, पुरम्मि वाणारसीए जो ॥२॥

बहुलदसमी य पोसो, तलम्मि रासिम्मि कुवलयपहस्स ।
तिहुयणवियन्नसंमो, जंमो जस्सासि मुणिपहुणो ॥३॥

पोसम्मि बहुलक्कारसीए, कय अ अट्ठमेण पव्वज्जा ।
तिहुसयसएहि समं, सम्मं गहिया[१] सयं जेण ॥४॥

चुलसीइ दिणंते णं, सव्वत्थवित्थारदीवयं नाणं ।
जस्सासि आसमपए, चित्तं चउत्थीइ किन्हाए ॥५॥

सो वाससयाऊ सावणस्स, सुद्धट्ठमी य संमेए ।
संपत्तनिव्वुइसुहो, सुहदाइ होउ पासजिणो ॥६॥

• • •

१. प्रतौ 'तवत्थु०' इति पाठः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ४. श्रीमहावीरजिनस्तोत्रम् ॥

चलणंगुलिचालियकणयसेलं, डुल्लियमहल्लमहिगोलं ।
जस्सासि बाललीलाइं पि थोसामिं तं वीरं ॥१॥ [गाहा]

कुंडगामम्मि पुरे, पाणयपुप्फुत्तराउ ओइन्नो ।
तं चरमतित्थनायग आसाढे सुद्धछट्ठए ॥२॥

चामीयरसमवन्नो, कन्नारासिम्मि पाविओ जंमं ।
सियतेरसी य चित्ते, तुमममरनरिंदनयचलण ॥३॥

मग्गसिरबहुलदसमीइ देववट्टेण तं विणिक्खंतो ।
एगुच्चिय छड्डिय रायलच्छि विच्छड्डुमुद्दामं ॥४॥

वइसाहसेयदसमीइ, देव ! तं उज्जुवालियातीरे ।
पक्खहियसड्ढबारस्सवरिसंती केवली जाओ ॥५॥

कत्तिय अमावसाए बाहत्तरिवरिस जीविय जिणिंद ।
नयरी अप्पावाए निव्वाणं पत्त तुमं नमो ॥६॥

इय चवणपभीई पनरस, पयत्थ पयडण थुइय संथुणिओ ।
वंच्छियपयं पयच्छउ वीरो सेसावि तित्थयरा ॥७॥

## ५ ) श्रीसुपार्श्वनाथस्तवनम् ॥

भुवनमोहनरूपमनोहरं, हसितकाशविकासियशोभरम् ।
स्मरपराभवभङ्गमहेश्वरं, भज सुपार्श्वजिनं जगदीश्वरम् ॥१॥ [द्रुतविल०]

नगर-खानपुराऽवनिमण्डनं, सबलमोहमहाबलखण्डनम् ।
पदतलानतनैकजनेश्वरं, भज सुपार्श्वजिनं जगदीश्वरम् ॥२॥

सकलभूतलभावविभासनं, निजकलादलिताऽखिलशासनम् ।
शिवनिवासविलासविकस्वरं, भज सुपार्श्वजिनं जगदीश्वरम् ॥३॥

गुणमणीगुणरोहणभूधरं, सुगतिगञ्जितवासवसिन्धुरम् ।
सरसशुद्धसुधामधुरस्वरं, भज सुपार्श्वजिनं जगदीश्वरम् ॥४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रकटपञ्चफणामणिभूषणं, सपदि दूरनिवारितदूषणम् ।
विषमतामसनाशदिनेश्वरं, भज सुपार्श्वजिनं जगदीश्वरम् ॥५॥

इति कविस्तुतिसद्गतिगोचरं, **विजय**तो भयतोयधितारकम् ।
प्रहित एष विशेषहितावहः, सृजतु सप्तमतीर्थपतिः सुखम् ॥६॥

## ६ ) अज्ञातकर्तृकाणि पञ्चजिनस्तोत्राणि ॥

### १. आदिनाथनमस्कारस्तोत्रम् ॥

जय जय जगदानन्दन ! जय जय वरनाभिनन्दन ! जिनेन्द्र ! ।
जय जय करुणासागर ! मनोरथा अद्य फलिता मे ॥१॥ [आर्या]

अद्य मे सफलं जन्म, अद्य मे सफला क्रिया ।
सफलोऽद्य प्रयासश्च, दर्शनादादिमप्रभोः ॥२॥ [अनुष्टुभ्]

प्रातरुत्थाय येनाऽयमादिदेवो नमस्कृतः ।
हेलया मोहभूपालस्तेन नूनं तिरस्कृतः ॥३॥

सुकृतं सञ्चितं तेन, दुष्कृतं तेन वञ्चितम् ।
येन प्रथमनाथस्य चरणाम्भोजमञ्चितम् ॥४॥

त्रिभुवनाऽभयदानविधायिने, त्रिभुवनाद्भुतवाञ्छितदायिने ।
त्रिभुवनप्रभुतापदशालिने, भगवते ऋषभाय नमो नमः ॥५॥ [द्रुत०]

• • •

### २. श्रीशान्तिनाथनमस्कारस्तोत्रम् ॥

किं कल्पद्रुमसेवया यदि मया शान्तिः श्रितः सर्वदः,
किं कर्पूरशलाकया नयनयोर्जातोऽतिथिश्चेदसौ ।
किं पीयूषपिपासया यदि पपौ तत्कीर्तिवार्तारसौ,
यद्वाऽन्यैरपि चेन्द्रियप्रियतमैः पर्याप्तमर्थागमैः ॥१॥ [शार्दूल०]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सर्वाङ्गसुभगाकारं कारणं सुखसम्पदाम् ।
तत् तव मुखं दृष्टमिष्टलाभो बभूव मे ॥२॥ [अनुष्टुभ्]

भुवनानन्दविधात्री, यत्र श्रीः काऽपि निर्भरं वसति ।
तज्जिनपतिपदकमलं, भवे भवे भवतु मे शरणम् ॥३॥ [आर्या]

दानिनां परमो दानी, मुनीनां परमो मुनिः ।
ज्ञानिनां परमो ज्ञानी, शान्तिरस्तु सुशान्तये ॥४॥ [अनुष्टुभ्]

स्वामिनामपि यः स्वामी, गुरुणामपि यो गुरुः ।
देवानामपि यो देव, सेव्यतां शान्तिरेष सः ॥५॥

• • •

## ३. श्रीपार्श्वनाथनमस्कारस्तोत्रम् ॥

अभिनवमङ्गलमालाकरणं हरणं समस्तदुरितस्य ।
श्रीपार्श्वनाथचरणं प्रतिपन्नो भावतः शरणम् ॥१॥ [आर्या]

आयासेन विना लक्ष्मीर्विनाऽपेक्षेण वैभवम् ।
विनैव तपसा सिद्धिर्जपतां पार्श्व ! नाम ते ॥२॥ [अनुष्टुभ्]

पार्श्वजिन ! शासनं ते निबिडमहामोहतिमिरविध्वंसे ।
मयि रत्नदीपकल्प ! तनोतु तेजो विवेकाख्यम् ॥३॥ [आर्या]

त्वरेथां चरणौ ! जिह्वे ! कुरु स्तोत्रं शिरो ! नम ।
हर्षाश्रु मुञ्चतं दृष्टी, अग्रेऽसौ परमेश्वरः ॥४॥ [अनुष्टुभ्]

भवे भवान्तरे वाऽपि, दुःखे वा यदि वा सुखे ।
पार्श्वध्यानेन मे यान्तु, वासराः पुण्यभासुराः ॥५॥

• • •

## ४. श्रीमहावीरनमस्कारस्तोत्रम् ॥

कनकाचलमिव धीरं, समुद्रमिव सर्वदाऽपि गम्भीरम् ।
लब्धभवोदधितीरं, महामि कामं महावीरम् ॥१॥ [आर्या]

दुरितदवानलनीरं, नीरागं भीतिभूमिकासीरम् ।
सिद्धिसहकारकीरं, करोमि निजमानसे वीरम् ॥२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रमोदेन मनो ! नृत्य, रोमाञ्चैर्वपुरुल्लस ।
चिरादुन्मीलतं नेत्रे !, ननु वीरवरोऽग्रतः ॥३॥ [अनुष्टुभ्]

अजन्मदायिने पित्रे, बान्धवायाऽविरोधिने ।
अद्रोहिणे च मित्राय, श्रीवीर ! भवते नमः ॥४॥

श्रीवीर ! सद्यो नमयाऽग्निमग्न, सङ्क्लिष्टभावार्जितकर्मकक्षम् ।
भस्मीभवत्वाशु विरागिणो मे, तथा यथा नित्यसुखी भवामि ॥५॥ [उपजातिः]

इति जिनपतिपादाः पञ्च पञ्चाधिनाथाः,
सुललितसुगमार्थैर्नव्यकाव्यैः कथञ्चित् ।
कृतसमुचितसेवाः सेवकानां जनानां,
जनितमधुरबोधा बोधिलाभाय सन्तु ॥६॥ [मालिनी]

## ७) शत्रुञ्जमण्डनश्रीआदिनाथस्तवनम् ॥

नमत मानववञ्छितदायकं, सकलमूर्तिमतां सुखकारकम् ।
दशनकान्तिपराजितमौक्तिकं, दुरितदुर्गतमोहनिवारकम् ॥१॥ [द्रुतविल०]

कनककोमलसञ्चरसुप्रभं, भुवनभक्तजनाम्बकसन्निभम् ।
कुमतवारणतीव्रमृगप्रभुं, मथितमासुतमानमहं विभुम् ॥२॥

प्रथितनाभिधराधवदेहजं, भवपयोधिविनासनकुम्भजम् ।
प्रबलकर्मविवर्जितनिर्मलं, दलितजन्म-जरा-भयशीतलम् ॥३॥

रुचिरमोदविधायकसोदरं, भविकवार्जविबोधनभास्करम् ।
मुदिरगर्जितगोगणमीकरं, विषमदुष्टविपद्धरमाकरम् ॥४॥

नर-नरेन्द्र-सुराधिपसेवितं, वृषभलञ्छनपादविराजितम् ।
प्रथमयोगिवरं जगतां मतं, प्रथमपारगतं प्रणमामि तम् ॥५॥

श्रीशत्रुञ्जयमण्डन, आदिनाथो गुणाकरः ।
**श्रीहंसचन्द्रशिष्येण, मण्डनेन** स्तुतो मुदा ॥६॥ [अनुष्टुभ्]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ८) धर्मशीलविरचितानि पञ्चजिनस्तोत्राणि ॥

### १. श्रीआदिनाथस्तोत्रम् ॥

जय वृषभ ! वृषभवृषविहितसेव !, सेवकवाञ्छितफल फलद देव ! ।
देवादेवार्च्चितपादपद्म !, पद्मानन ! पूरितभूरिपद्म ! ॥१॥ [पद्धडिका]
पद्माङ्गजमदगजगजविपक्ष ! पक्षीकृतजगदुपकारलक्ष ! ।
लक्षितसमलोकालोकभाव !, भावितसूनृत ! सुगुणस्वभाव ! ॥२॥
भावारितमोभरतरणिरूप ! रूपस्थित ! रूपातीतरूप ! ।
रूपितसदुपज्ञसु**धर्मशील** ! शीलितशाश्वतशिवसौख्यलील ! ॥३॥

●●●

### २. श्रीशान्तिनाथस्तोत्रम् ॥

स्तुवन्तु तं जिनं सदोपकारतालताघनं,
स्वदेहदानतो यको ररक्ष रक्तलोचनम् ।
प्रसूदरस्थितेन यत् शुभंयुता प्रयुञ्जिता,
त्वरा निजाः प्रजाव्रजा रूजाविवर्जिताः कृताः ॥१॥ [पञ्चचामर]
अवाप्य जन्म येन चक्रवर्तिता प्रवर्तिता,
जगत्प्रभुत्वमाप्य कीर्तिनर्तकीव निर्तता ।
अभीष्टदा दिवस्तरुर्घटो मणिस्त्रयोप्यमी,
अनुत्वकान्तकांस्तु सेवते सना सनाभुमी (?) ॥२॥
स्वकीयसेवकाय यः सुखं ददाति सत्वरं,
ततो मुदा तमाचिरेयमाचिरेयमीश्वरम् ।
नमो नमोस्तु ते त्वया समो न कोप्यहो ! प्रभुः,
सु**धर्मशील**ने भवे भवेस्त्वमेव मे विभुः ॥३॥

●●●

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३. श्रीपार्श्वनाथस्तोत्रम् ॥

तवैश नामतस्त्वरा दरा भवन्ति गत्वराः ।
प्रसृत्वरा रवेः करास्ततो यथा तमोभराः ॥१॥ [प्रमाणिका]

अथोत्कराश्च नश्वरा, धरेश्वराद्धि तस्कराः ।
स्थिराः स्युरिन्दिराभराः, स्वमन्दिरान्नहीत्वराः ॥२॥

विभोः स्तवेषु तत्पराः नरा जगत्सु जित्वराः ।
तकेषु तत्परादरादरातयोपि किङ्कराः ॥३॥

विधीयतां जिनेश्वराऽऽशु पार्श्वदृक्कृपापरा ।
प्राद्ध्यतांतरात्वरा, ममापि **धर्मशील**राः ॥४॥

• • •

## ४. श्रीमहावीरस्तोत्रम् ॥

योऽचीचलद्दुश्च्यवनोरसि स्थितः, क्रमाङ्गुलीतः किल कर्णिकाचलम् ।
स्वनामचुञ्चुश्च चरिक्रियादयं, स श्रीमहावीरजिनो महोदयम् ॥१॥ [उपजातिः]

अर्कः शुभोदर्कमतर्कितश्रियं, जैवातृकः प्रातिजयं यशःक्रियम् ।
भौमो भिनत्तीतिमनीतिजाम्भयं, बुधो ददातीह बुधोचितां धियम् ॥२॥

गुरुर्गुरुं ज्ञानगुणं विधत्ते काव्यः कलां काव्यकलां च दत्ते ।
शनिः शुभं राहुरयं शिखीशं, नुः सेवितुर्यच्छति वीरमीशम् ॥३॥

एवं सेवां दधतः पञ्चजिनानां कथां प्रपञ्चन्ते ।
ते सोख्यानि लभन्ते, भव्य श्री**धर्मशील**भृतः ॥४॥ [आर्या]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ९ ) अज्ञातकर्तृकपञ्चजिनस्तुत्यन्तर्गते स्तुती ॥

### १. श्रीआदिजिनस्तुतिः ॥

ऋषभजिनमनन्तं नाभिभूतं द्विधाऽलं,
कृतसकलविनीतं सद्वृषश्रीविशालम् ।
कनकरुचिशरीरं विश्वविश्वावतंसं,
प्रणमत मरुदेवीकुक्षिकासारहंसम् ॥१॥ [मालिनी]

प्रणतसुरनिकाय ध्वस्तनिःशेषमाय,
निहतनमदपाय प्रोज्वलच्छायकाय ।
निखिलजनहिताय श्रीयुगदीश्वराय,
ऋषभजिन ! नमस्ते सिद्ध ! विश्वे समस्ते ॥२॥

विमलविमलशैलेऽष्टापदे श्रीअयोध्यापुरि गुरुनगरे श्रीअर्बुदे गूर्जरे च ।
गजपदवरवीणाग्रामकासद्रहादौ, जिन ! वृजिनविमुक्त ! त्वां नमस्यं नमामि ॥३॥

●●●

### २. श्रीशान्तिजिनस्तुतिः ॥

शान्तं कान्तं शिवपदगतं शान्तिदुःखाग्निजातं,
कल्याणाभं गुणगुणनिधिं विश्वसेनाङ्गजातम् ।
विश्वश्रीणां कुलगृहमहाशान्तिदं शान्तिनाथ,
कल्याणाय प्रणमत जिनं शान्तिलक्ष्मीसनाथम् ॥१॥ [मन्दाक्रान्ता]

सौम्यःश्रीमान् कृतकुलवयाऽत्यन्तबोधो विमुक्तः,
दोषावन्द्य सत[त]मुदितो निष्कलङ्कः स्मरारिः ।
राजापूर्वः परिहृतभवो निस्तमाः पापताप-,
शान्ति शान्तिर्दिशतु लुठतां पादपीठे जनानाम् ॥२॥

आप्ते यस्मिन् सुचिरमचिराकुक्षिमासे क्षमाया-
माधिर्व्याधिः क्षयमुपगता किन्त्वनीत्याश्रितेऽपि ।
नीतिः पुष्टाजनिकृततमस्तान्तिशान्तिर्नितान्तं,
स श्रीशान्तिर्भुवि विजयते सत्यनामा जिनेन्द्रः ॥३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## १० ) चतुर्विंशतिजिनस्तवाः ॥

### १. श्रीआदिदेवस्तवः ॥

श्रीनाभेय ! सुनाभेयसदनं सदनन्तचित् ।
नत्वा न त्वा दयालो ! के लोके लोकेशतामगुः ॥१॥ [अनुष्टुभ्]

हतमोहतमोद्रोहः कामदः कामदर्प्पहा ।
जय सद्भालसद्भाल ! त्वमितापदतापदः ॥२॥

स्तवं निर्माय निर्माय !, न तवाऽऽनतवासव ! ।
सुकृती सुकृती जिह्वे, कोऽमलः कामलध्वने ! ॥३॥

नरमानरमानड्रूप्रभञ्जनप्रभञ्जन ।
जनताऽजनता लेभेऽदर्प ! का दर्पका त्वयि ॥४॥

यस्त्वा भी-मारि-भीमारि-प्रमद ! प्रमदप्रदः ।
नमतीन ! मतीरेष, सदयाः सदयाश्रयेत् ॥५॥

●●●

### २. श्रीअजितनाथस्तवः ॥

श्रीमन्तमजितं देवं, कषायैरजितं सदा ।
त्रैलोक्यवन्दितं देवं, घोरसंसारपारगम् ॥१॥

अद्य प्राप्ताः श्रियः सर्वा, मया तीर्णो भवार्णवः ।
जीवितं सफलं मेने, यत् त्वं दृष्टोऽतिदुर्लभः ॥२॥

पवित्रा रजनी सैव, प्रशस्यो दिवसोऽपि सः ।
स एव जगतीनाथः, यत्र स्यात् तव दर्शनम् ॥३॥

त्वं मरौ कल्पशाखीव, जङ्गले गाङ्गपूरवत् ।
सुपर्वमणिवन्निःस्वे, दुर्लभोऽसि प्रभो ! भवे ॥४॥

अनविद्या महाविद्याः, सम्पदो विपदोज्झिताः ।
सौभाग्यं सह भाग्येन, भाक्तिकः संश्रयेत् तव ॥५॥

●●●

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३. श्रीशम्भवनाथस्तवः ॥

श्रीशम्भवं जिनाधीशं, योगीन्द्रं नौमि सादरम् ।
जगत्पूज्यं मुदा हेलिमुल्लसन्महसादरम् ॥१॥

निस्तीर्णरौद्रसंसारदावपावकशम्भव ।
सेनामातः सदा तात, सहावरावशम्भव (?) ॥२॥

त्वं जीयाः सर्वदाऽनर्घ्यगुणकल्पद्रुनन्दन ! ।
जितारिगण ! लोकेश !, जितारिनृपनन्दन ! ॥३॥

यं नत्वा लेभिरे शैवसम्पदं मंक्षु देहिनः ।
स त्वं सत्वं क्षयं कर्तुं, मोहराजस्य देहि नः ॥४॥

तत्याज शासनं जातु, तावकं पावकं न यः ।
तं शास्वतसुखावासं, कैवल्यं भविकं नयः ॥५॥

●●●

## ४. श्रीअभिनन्दनजिनस्तवः ॥

सोऽभिनन्दननाथ ! त्वं विजयस्व ! दयाऽमदः ।
यस्य ते हृद्यमेयाऽस्थाद्, विजयस्व दयामदः ॥१॥

जनतापन्नदीतारतरणे ! भवतारण ! ।
मोहारे ! स विकान्त्यास्ततरणे ! भव तारण ॥२॥

श्रीस्ते नहि मुदे कस्य ?, प्रभो ! विश्वाभिनन्दन ! ।
रक्ष मां भवतो भास्वत्प्रभो, विश्वाभिनन्दनः ॥३॥

पाहि ताः शोषिताऽघौघ ! नीराग ! ततमादया ।
त्वं प्रजा नहि तत्याज, नीरा गततमादया ॥४॥

सा श्लाघ्या स्वदृशा प्रास्तकमला सदयालयम् ।
या त्वा गत्वा प्रजा स्तौति, कमलाऽऽसदयालयम् ॥५॥

●●●

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ५. श्रीसुमतिनाथस्तवः ॥

सुमतावावली पद्मां, सुमतावस्थिता नता ।
सुमतावपका नेया, सुमतामयसद्मनि ॥१॥

भवनाशगुणश्रेणिभवनाऽसुमतां श्रिये ।
भव नाथ ! मनोजन्मभव ! नागगते ! सदा ॥२॥

कामद ! त्वां प्रजा दृष्ट्वा, कामदर्पहरं मुदम् ।
कामद ! श्रेयसा लेभे, का मदक्षां युतां न हि ॥३॥

कमलादान्यदोषाणां, कमला तारमाश्रितम् ।
कमलाक्षररक्षास्ता, कमलारेर्भवान्न हि ॥४॥

तारया श्रद्धया चारु, तारयास्ते स्तुतिं व्यधुः ।
तारयाज्जनता देव !, तारयाऽऽपन्नदीपतेः ॥५॥

• • •

## ६. श्रीपद्मप्रभजिनस्तवः ॥

श्रीपद्मप्रभनाथाय, सनाथाय श्रिया नमः ।
योगीन्द्राय नतेन्द्राय, महते परमात्मने ॥१॥

तवाऽचिन्त्यप्रभावस्य, स्वरूपं वेत्ति कः प्रभो ! ।
पाप्ताऽनन्तचतुष्कस्य, महेशस्य महात्मनः ॥२॥

शाश्वतं योगिनां ध्येयं, विरूपं रूपवर्जितम् ।
शिवश्रीकण्ठशृङ्गारहारं सारं सदा नुमः ॥३॥

महादेवो महानन्ददायको जिननायकः ।
जयति क्षीणकर्मारिर्महिमास्पदमन्वहम् ॥४॥

महनीयचरित्रस्य, श्रेष्ठस्य परमेष्ठिषु ।
गुणग्रामगरिष्ठस्य, किङ्करोस्मि तव प्रभो ! ॥५॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ७. श्रीसुपार्श्वनाथस्तवः ॥

श्रीसुपार्श्वजिनेन्द्रस्य, चन्द्रस्य जगतः स्तुवे ।
स्याद्वादिनः क्रमाम्भोजमभवस्य स्वयम्भुवः ॥१॥

नहि कस्य मुदे देव ! भवतो मुखचन्द्रमाः ? ।
अकलङ्कः सदा सौम्यकान्तिश्रीसदलङ्कृतः ॥२॥

सुधाकुण्डाऽऽभयो रम्यनेत्रयोस्तव सौम्ययोः ।
कमलाकारयोस्तारतारयोर्भद्रमन्वहम् ॥३॥

पद्मरागारुणप्रेङ्खन्नखद्युतिविराजितम् ।
वीक्ष्यते को मुदं नाऽप ? सल्लक्षणकरद्वयम् ॥४॥

पुण्यलावण्यसम्भारं सौभाग्यपदमद्भुतम् ।
दृष्ट्वा ते निर्मलं रूपं, को न चित्रीयते सुधीः ? ॥५॥

●●●

## ८. श्रीचन्द्रप्रभजिनस्तवः ॥

चन्द्रप्रभ ! – देव ! त्वां, चन्द्रोज्ज्वलतनुत्विषम् ।
चन्द्राननमहं स्तौमि, चन्द्रलाञ्छनमादरात् ॥१॥

कर्ता विश्वोपकाराणां, ज्ञाता त्रैलोक्यवस्तुनः ।
त्यक्ता राज्यश्रियो जीयात् प्राप्ता मुक्तिपुरं परः ॥२॥

त्रातारं विश्वजन्तूनां, दातारं शिवसम्पदाम् ।
हन्तारं भावशत्रूणां, नेतारं नौमि भक्तितः ॥३॥

स्वामिनेऽखिलविश्वस्य, शमिने दमिने सदा ।
नयिने यमिने भूयात् पायिने ज्ञानिने नमः ॥४॥

हरते कुमतेत्यामान्, कुर्वते जगते हितम् ।
श्रीमते धीमते नेतर्महते भवते नमः ॥५॥

●●●

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ९. श्रीसुविधिनाथस्तवः ॥

सुविधे ! सुविधे धीर सुमते सुमते यते ।
तावके पावके त्यक्तवनितो विनतोस्म्यऽहम् ॥१॥

अनेकनयसङ्कीर्णं दुर्लभं भवदागमम् ।
कुतीर्थिकशताऽगम्यं, प्रमाणाऽबाध्यमाश्रयेत् ॥२॥

याऽऽराद्धा कल्पवल्लीव, जन्तूनां कल्पितप्रदा ।
त्वदाज्ञामनिशं शीर्षे, शेषामिव वहामि ताम् ॥३॥

प्रदत्ते सुगतेर्युग्म, युगं हन्ति च दुर्गतेः ।
भव्यानां पालितं यत् ते दर्शनं तदहं श्रये ॥४॥

चारित्रेण पवित्रेण, कृत्स्नं कर्मक्षयं व्यधाः ।
त्वं येन तरसा देहि, तन्ममाऽपि तमोपहम् ॥५॥

• • •

## १०. श्रीशीतलनाथस्तवः ॥

श्रीशीतलजिनाधीश ! सर्वज्ञ ! परमेश्वर ! ।
भगवन् ! सुचिरं नन्द, योगीश्वर ! महामुने ! ॥१॥

देवाधिदेव ! तीर्थेश !, पुरुषोत्तम ! शङ्कर ! ।
जय पारगत ! स्वामिन् !, केवलज्ञानसत्तम ! ॥२॥

वीतराग ! महादेव !, स्वयम्भू ! मुनिनायक ! ।
सवीर्यः सर्वज्ञः सार्वः, त्रायस्व त्वं त्रिकालवित् ॥३॥

जिनं क्षीणाष्टकर्माणमभयप्रदमुत्तमम् ।
स्याद्वादवादिनं सर्वदर्शिनं बोधिदं नुमः ॥४॥

तीर्थंकराय देवाय, शम्भवे विभवे भवे ।
अर्हतेऽनिशमासाय, नमः श्रीपरमेष्ठिने ॥५॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ११. श्रीश्रेयांसनाथस्तवः ॥

श्रेयांसः श्रेयसां धाम, श्रेयसेस्तु सदा सताम् ।
यन्नामध्यानतो मर्त्या, लभन्ते श्रेयसीं श्रीयम् ॥१॥

श्रेयांसि श्रेयसो नाम, निरस्ताऽश्रेयसो मुदा ।
ध्यायन्तो मन्त्रवत् प्राज्ञा, लेभिरे भक्तिशालिनः ॥२॥

अगण्यपुण्यपण्यानामापणो जगदुत्तमम् ।
एष एव प्रमोदेन, श्रेयांसं नौति यो मुदा ॥३॥

नूनं शिरोमणीयन्ते, ते नरा महतामपि ।
श्रेयांसे विद्यते भक्तिर्येषां मनसि शाश्वती ॥४॥ [युग्मम्]

तं मानवशिरोरत्नं, वन्दन्ते त्रिदशा अपि ।
यः श्रेयांसवचो वन्द्यं, लङ्घन्ते न कदाचन ॥५॥

• • •

## १२. श्रीवासुपूज्यजिनस्तवः ॥

वासुपूज्यप्रभो ! सर्वजन्तुजातकृपापरः ।
त्वत्तो नान्योऽस्ति देवो हि, मुक्तिदाता जगत्त्रये ॥१॥

आराधयेज्जिनेश ! त्वां, यो विमुच्य कुदेवतम् ।
करीरं सेवते मूढः, सोऽपास्य सुरशाखिनम् ॥२॥

कथं श्रीर्वर्धते तेषां, गेहे श्रेयो भवेत् किमु ।
येषां त्वदर्चने नाथ !, नादरः सर्वथा नृणाम् ॥३॥

देवयोर्नान्तरं येषां, स्वान्ते नीराग-रागिणोः ।
किं ते जडा न मन्यन्ते, तुल्यत्वं मणि-काचयोः ॥४॥

देवो विश्वे त्वमेवेति, जानन्तोऽपि जना जिन ! ।
ध्यायन्ति कुदेवं तन्मिथ्यात्वं बलवत्तरम् ॥५॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## १३. श्रीविमलनाथस्तवः ॥

विमलो जगतीनाथः, सततं विमलो जिनः ।
निर्मदो निर्ममो जीयान्निर्दोषो निर्गतामयः ॥१॥

स्वामिन् ! निर्द्रोह ! निर्मोह ! निर्लोभ ! गतमत्सर ! ।
जय निःसङ्ग ! निर्माय !, निरीह ! हततामस ! ॥२॥

हतदुःकर्मसङ्घात !, हतपातकसञ्चय ! ।
हतसंसारसन्ताप !, हतमन्मथ ! पाहि नः ॥३॥

त्यक्तराज्यरमाराम ! नीरागं जय नीरजः ! ।
त्रस्तभावद्विषज्जात !, प्रदातस्नेहबन्धन ! ॥४॥

मुक्तेर्निःशोक ! निःकोप !, निर्दम्भ ! मम निर्भय ! ।
त्वं यच्छ शर्म निर्हास !, मरणोज्झित ! निर्भव ! ॥५॥

• • •

## १४. श्रीअनन्तनाथस्तवः ॥

श्रीअनन्तजगन्नाथमनन्तयशसं जिनम् ।
अनन्तपृथुविज्ञानमनन्तसुखदं स्तुवे ॥१॥

नाभिभूतश्चतुर्वक्त्रो, हंसगामी प्रजापतिः ।
सदा ब्रह्माऽसि धातेव, प्रभो ! चित्रमराजसः ॥२॥

अरिष्टनरकच्छेदी, श्रीपतिः पुरुषोत्तमः ।
चित्रं विष्णुरिवाऽसि त्वमगदो न जनार्दनः ॥३॥

सर्वज्ञो मदनद्वेषी, शम्भुरीशो महाव्रती ।
शङ्करोऽसि तदाश्चर्यं, नेतर्यदभवो भवान् ॥४॥

ब्रह्मरूपस्त्वमेवाऽसि, शङ्करः पुरुषोत्तमः ।
इति देवत्रयीरूपस्त्वमेव भुवने मतः ॥५॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## १५. श्रीधर्मनाथस्तवः ॥

धर्मनाथ ! कृपां कुर्याः, पततीह भवे मयि ।
यस्मात् त्वच्छदृशो नाऽन्यः, करुणारससागरः ॥१॥

नास्तीह त्वत्समो दाता, नास्ति रोरोऽपि मत्समः ।
अतो मे याचितं देहि, देहि व्यूहहितः शिवम् ॥२॥

त्रैलोक्यदुःस्थितोद्धारे, त्वमेव कृतसङ्गरः ।
मत्तुल्यो दुःस्थितो नाऽतो, मामुद्धर कृपापर ! ॥३॥

भीतत्राणे महान्तो हि, तत्परास्तेषु सत्तरः ।
त्वमेकोऽसि ततो भीतं, पाहि मां मोहभूपतेः ॥४॥

आत्मतुल्यमुदारेशाः, कुर्वन्ति निजसेवकम् ।
त्वं सीमा तेषु भृत्योऽहं, तवेति जिन ! चिन्तय ॥५॥

• • •

## १६. श्रीशान्तिनाथस्तवः ॥

शान्तिनाथ जिन भक्त्या, सुरा-ऽसुर-नरार्चितम् ।
स्तुवे शान्तिकरं शान्तिमन्दिरं मन्दधीरहम् ॥१॥

शिवश्रीसङ्गदातारं, हन्तारं जगदापदाम् ।
भवन्तं को न वन्देत, वीतराग ! सचेतनः ॥२॥

सुधापानं मरौ देशे, यथा पुंसोऽतिदुर्लभम् ।
तथैवाऽकृतपुण्यस्य, दुर्लभो मृगलाञ्छनः ॥३॥

प्राप्याऽपि जिन ! निर्दोषं, दुःप्रापं तव शासनम् ।
प्रमादं कुर्वते येऽत्र, ही तेषामतिमूढता ॥४॥

श्रीशान्ते ! भवतः पार्श्वे, न याचे शक्रसम्पदम् ।
वाञ्छामि भवदाज्ञायाः, पालनं तु भवे भवे ॥५॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## १७. श्रीकुन्थुनाथस्तवः ॥

कुन्थुनाथ ! जगन्नाथ !, सर्वथाऽपाकृथा यथा ।
मोहमल्लं तथोपायं, कृपया मम दर्शय ॥१॥

त्रिलोकीगञ्जनं वीरं, यया शक्त्यावधीः स्मरम् ।
प्रसद्य सत्वरं यच्छ, तज्जये मम तां प्रभो ! ॥२॥

चूर्णीकृतानि कर्माणि, भवता येन लीलया ।
तद्ध्यानं कृपया नाथ !, ममापि वितराऽधुना ॥३॥

शिवश्रीकण्ठशृङ्गारहारतां भगवन्नगाः ।
यया समतया मे तां, कृपां कृत्वा सुलम्भय ॥४॥

यत्सुखं त्वं शिवावासे, स्वामिन्ननुभवन्नसि ।
तस्य मे निजभृत्यस्य, संविभागं कुरु प्रभो ! ॥५॥

• • •

## १८. श्रीअरनाथस्तवः ॥

अरनाथ ! सदा कुर्यात् तवाज्ञोल्लङ्घनं न यः ।
शीर्षे शेषेव तस्याज्ञां मरुताऽपि विधीयते ॥१॥

त्वदाज्ञा रहितो देही, न सुखं न च सम्पदः ।
न यशो न च नाकित्वं, नाऽपवर्गं समाश्रयेत् ॥२॥

तीर्थसेवा क्षमा ध्यानं, दमो दानं दया तपः ।
सर्वं तवाज्ञया हीनं, मुक्तये सर्वथा न हि ॥३॥

कारारूपनिगोदेषु, सततं भवदाज्ञया ।
वर्जितो दुःखितो दीनोऽनन्तकालं स्थितोस्म्यहम् ॥४॥

मयेह भ्रमताऽवापि, त्वदाज्ञा कर्मलाघवात् ।
तथा कुरु यथा नाथ ! स्यात् तस्याः खण्डनं न मे ॥५॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## १९. श्रीमल्लिनाथस्तवः ॥

मल्ले ! खजिन्नमल्लेख, तारतत्व व्रतारत ।
सद्भावप्रोल्लसद्भाव, मामनामरमामनाः ॥१॥

भीमारिजिदभीमारिः, सर्वदारिद्रसर्वदा ।
लोके शर्मद लोकेश, यमद त्वं जयाऽमद ॥२॥

नो कोपव्यसनोऽकोप मानवर्जित मानवः ।
मारग ! स्तौति मा राग वारण ! त्वाऽघवारण ! ॥३॥

तत्याज गुणतत्या जराजितश्रीर्दराजितः ।
तानामहरतानाम, सन्मते ये लसन्मते ! ॥४॥

यामाय निलयामाय, तारयाऽविप्रतारय ।
याता तत्वधीया तात !, सत्तमस्त्वमसत्तमः ॥५॥

• • •

## २०. श्रीमुनिसुव्रतस्तवः ॥

सुव्रत ! सुव्रतस्वामिन्, परमाऽपरमानहृत् ।
कमलाः कमलास्य ! त्वं, देहि नो देहिनोहितः ॥१॥

सुमनाः सुमना त्वत्तोऽसमवासमवाप्नुयात् ।
भासुराऽऽभासुराच्यहिपद्मतो पद्मतोऽमृते ॥२॥

सदयं भदयं नत्वा महतामहता रमा ।
नमता नमता लेभे, सकलासकला प्रभो ! ॥३॥

तरणे तरणे भासा, भवतो भवतोयधौ ।
नयते नयतेऽर्चां को, मदनामदनापदौ ॥४॥

वसुधा वसुधाभूत, समताऽसमतामसम् ।
रणवारणवागस्य, सत्वरं सत्वरं गमे ॥५॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## २१. श्रीनमिनाथस्तवः ॥

नमिदेवं गुणाकारं, सन्नताऽमरमण्डलम् ।
विनमामि रसाधारं, भवसागरतारणम् ॥१॥

विमलं कमलाकेलिमन्दिरं वसुसुन्दरम् ।
वन्देऽहं सादरं देव ! पदतामरसं तव ॥२॥

भूरिमायारसासीर ! हेमकाय ! तमोहर ! ।
महामोहमहानागकण्ठीरव ! चिरं जय ॥३॥

नीराग ! निरहङ्कार ! निरपाय ! निरामय ! ।
कामं समीहितं देहि, देव ! मे जनताहित ! ॥४॥

दम-दान-दयासारतारमागमसाङ्गरम् ।
सेवे गममणीवारदं कुलं विपुलं तव ॥५॥

• • •

## २२. श्रीपार्श्वनाथस्तवः ॥

पार्श्वेन ! नाऽवि कं, यक्षपार्श्वेन नत ! विघ्नतः ।
पार्श्वेन भीवने रम्यपार्श्वेन भास्त्वया जगत् ॥१॥

वामेय ! शिवपूर्मार्गे वामेयस्त्वयि सन्नतः ।
वामेयतं नरं सद्योऽवामेयगुणविघ्नतः ॥२॥

भावतस्त्ववयो ज्ञानभावतत्वरतक्रमौ ।
भावतः स्तौति तं रक्षा भावतस्तापतः क्षणात् ॥३॥

कान्तारङ्गोदहो मोहकान्तारं न प्रजामपाः ।
कान्तारङ्कस्य चारित्रकान्तारं नाकृथाः प्रियम् ॥४॥

महानन्दप्रदो भानुर्महानन्द तवाश्रिते ।
महानन्दरमाभूरि, महानन्दसुरागिताम् ॥५॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## २३. श्रीमहावीरस्तवः ॥

वर्धमान ! जिनेश ! श्रीवर्द्धमान न मुक्तये ।
कामरागसुधीर त्वा कामरागप्रजाऽस्तु ते ॥१॥

पापदावपयोनीधे !, पापदवरमास्पद ! ।
भवतारण ! कोऽनावि, भवता रणदुर्गतेः ॥२॥

तारतारभवाम्भोधितारतारमयाश्रिताः ।
जनतायामदध्वंसे, जनतायामद ! त्वयि ॥३॥

हतमोह ! निरस्तारे !, हतमोह कदाचन ।
माया मम हृदो विश्वे, मायामम जिनोत्तमः ॥४॥

क्षमादरमितानीते !, क्षमादरतमाऽऽश्रयेत् ।
मानवस्तवमानन्दा, मानवस्तव यो व्यधात् ॥५॥

# ११ ) जिनरत्नविरचितानि पञ्चजिनस्तवनानि ॥

## १. कमलबन्धमयश्रीआदिनाथस्तवनम् ॥

जिणंदे पढमे लोए, नामेणं उसहे हिए ।
लोआणं लोअविक्खाए, जुगाण ईड्डीकारए ॥१॥ [सिलोगो]

नंदणे मरुदेवीए, वल्लहे नाभिभूइए ।
तिलुक्कमंगलीभूए, तिलुक्कसुरपाइए ॥२॥

सुवण्णंबुरुहे पाए, धरंते गमणे णीए ।
नाणारयणनिम्माए सीहासणम्मि संट्ठीए ॥३॥

सेअचामरसोहाए, सोहिओभयपासए ।
सीसम्मि निअ भत्तीए, देविंद-धय वेअए ॥४॥

पिऊसं समभासाए, भासउत्तमधम्मए ।
दुंदुहीनायजुत्तीए, घोसए जगरज्जए ॥५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

असोअरुक्खवायाए, मिसिउ तणुकंतीए।
भामंडलीकए तेए, सोहा लोअज्ज कारए ॥६॥
नाणापुप्फाण वुट्ठीए, भूमिअलम्मि सोहिए।
देवदेवाउलीभूए, समोसरण रायए ॥७॥
अणंतदुक्खविण्णाएऽणंतदंसण-नाणए।
तुमं मि सेविअं पाए, ठविज्ज करुणामए ॥८॥

कलसं :-

**विजयदान**गुरुपयपंकए, भमरएण **रएण जिणं** थुओ।
कमलबंधमएण मए थुई, नयरदेवगिरम्मि गिरंवई ॥९॥ [द्रुतविलम्बितम्]

• • •

## २. कमलबन्धमयश्रीशांतिनाथस्तवनम् ॥

संतिनाहे महासीले, पत्तनिस्सेसमंगले।
पत्तेऽणंतमहालीले, मुक्खे संपन्नकेवले ॥१॥ [सिलोगो]
दीप्पंतदीहिई भाले, महाभंगे महाबले।
परुवंतो दयामूले, मग्गे धम्मस्स निम्मले ॥२॥
देवेहिं निक्कलाकेले, वंदिअक्कमजामले।
वज्जे मोहमहासेले, अबीए पुहवीअले ॥३॥
चित्तं कय चमक्काले, देविंदाणं पि सकले।
छक्खंडभूलमासाले, चक्कवट्टीनलेसले ॥४॥
चच्चेलिसधलाभाले, तिलोअपउमाउले।
जाए जगत्तयाधाले, संतिनामे जिणेसले ॥५॥
ठवंते कयसोमाले, पाए कए सुकोमले।
सुवण्णवण्ण संबोले, धीलत्तेणं सुलायले ॥६॥
निम्मए निरहंकाले, कालुण्णासमसायले।
नीलरासि व्व गंभीले, धम्मरुक्के पओहले ॥७॥
मुक्खसुक्कावलीसाले, तेअसा अभलक्खले।
सोमदिट्ठीइ मंधीले, लोइज्ज जगईसले ॥८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३. कमलबन्धमयश्रीपार्श्वनाथस्तवनम् ॥

जगनाहे जिणे पासे, महासुक्खे महायसे ।
वामाकुच्छिसरोहंसे, दिन्न-व्विण सेअसे ॥१॥ [सिलोगो]

असेस मंगलावासे, माणेभद्दमणंकुले ।
अस्ससेणे कुलागासे, दिवानाहे अनिम्मिसे ॥२॥

सोहिज्जमाण सप्पासे, पासाहिट्ठीअकायसे ।
पूरिआसेसलोआसे, इच्छादाणेण निविसे ॥३॥

गयराए गयद्दोसे, सुक्खरुक्खम्मि पाउसे ।
कण्णामिअफुरज्झसे, रंजिअप्पाणि माणसे ॥४॥

सेवकीभूयभूमिसे, अतुल्लाउलसाहसे ।
किंकरीभूयसग्गीसे, पावई पावए कुसे ॥५॥

सव्वन्नू सव्वदंसीसे, अस्स लोअम्मि माणुसे ।
विहरिंतो पहाएसे, विग्घसंघायतामसे ॥६॥

तीवसमेअतित्थेसे, रुवेणे व असारिसे ।
जणाणं दिन्नआसासे, सेवारत्तमहायसे ॥७॥

वणवेरुलिआभासे, निच्चमुज्झिअ कालुसे ।
नागरायंकिए पासे, संसारा पाहि मं सुसे ॥८॥

इअ उसहजिणिंदे संतिनाहे अ नेमि,
**जिण**वरसिरिपासे, वद्धमाणे ति पंचा ।
विमलकमलबंधेनेव सेवा**रएणं**,
इह अमरगिरिम्मि संथुआ दिंतु सिद्धिं ॥९॥ [मालिनी]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## १२ ) साधुसोमगणिकृतटीकासमन्वितानि जिनवल्लभसूरिप्रणीतानि पञ्चजिनचरित्राणि ॥

### १. श्रीआदिनाथचरित्रम् ॥

वर्धयतु वर्धमानः, श्री**सिद्धान्तरुचि**वाचको वाच्यम् ।
चित्तचमत्कृतिचतुरं, चतुरनराणां वचो यस्य ॥१॥ [आर्या]

**जिनवल्लभसूरीन्द्र**कृते चरितपञ्चके ।
संक्षिप्तरुचिरं किञ्चिद् व्याख्यानं वितनोम्यहम् ॥२॥ अर्थयुगलम् ॥

तथाहि-

**नमियजिणमुसभमुभयंसदेसविलसंतकसिणकेसचयं ।**
**मुहससिजुण्हातण्हारसभमिरचकोरजुयलं च ॥१॥**

व्याख्या-

नत्वा-प्रणम्य जिनं-वीतरागं, ऋषभं-श्रीयुगादिदेवं, किं विशिष्टं ? उभयांऽसदेशविलसत्कृष्णकेशचयं, भगवता हि दीक्षा ग्रहणक्षणे चतुर्मौष्टि-लोचविरचनान्तरं पृष्टिप्रदेशऽऽगतवरतरसमीरणप्रसरणवशेन सुवर्णसकाशोभयां-ऽसदेशोपरि विनीलाश्मप्रकाशः केशापाशप्रसरः शोभासम्भारमावहन् विहितपुरहूतप्रभूताऽऽग्रहेण परमेश्वरेण तथैवाऽवस्थापित इति उत्प्रेक्ष्यते-मुखमेव शशी तस्य ज्योत्स्नायां तृष्णारसोऽभिलाषाऽतिरेकस्तेन भ्रमणशीलं चकोर-युगलमिव ॥१॥

एवंविधं श्रीऋषभं प्रणम्य किमित्याह-

**असुरिंद-सुरिंद-नरिंद-विंदवंदिय-थुयस्स ।**
**तस्सेव थोयारहियकरं किर सुचरियकणकित्तणं काहं ॥२॥**

असुरेन्द्र-सुरेन्द्र-नरेन्द्रवृन्दवन्दित-स्तुतस्य वन्दितश्चाऽसौ स्तुतश्चेति समासः । तस्यैव श्रीऋषभजिनवरस्य स्तोतॄणां हितकरं, किलेत्यात्मनोऽशक्ति-सूचकं, सुचरितकणस्य कीर्तनं बोधिबीजावाप्तिहेतोर्भवादारभ्य सुचरित्र-लेशकीर्तनं करिष्यामि ॥२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथेत्थं गाथायुगलेन विशिष्टेष्टदेवतास्तुतिपूर्वमभिधेयप्रयोजनाद्यभिधाय-प्रतिज्ञार्थमेव समर्थयन्ते श्रीपूज्याः ।

**धणभवमुणिदाणफलेण भविय उत्तरकुरूसु मिहुणनरो ।**
**सोहम्मसुरो तो इह महाबलोऽवरविदेहे तं ॥३॥**
**संबुज्झिय ईसाणे, ललियंगसुरो सिरिप्पहविमाणे ।**
**संजाओऽसि तउ पुण पुव्वविदेहे वयरजंघो ॥४॥ युग्मम् ॥**

इहैव जम्बूद्वीपे पश्चिमे महाविदेहे क्षितिप्रतिष्ठितपुरे धनो नामा सार्थवाह आसीत् । तस्मिन् धनभवे सार्थप्रस्थितमुनीनां घृतदानं ददतो भगवज्जीवस्य प्रथमो बोधिलाभः । ततो मुनिदानफलेन, 'भविय त्ति'-भूत्वा उत्तरकुरुषु मिथुननरो युगलिकमनुष्यः, ततः प्राग्जन्मजनितमुनिदानप्रभावात् सौधर्मदेवलोके सुरो-देवो भूत्वा, तत इह जम्बूद्वीपे अपरविदेहेषु त्वं महाबलो राजा भूत्वेत्यनेन योगः । स्वयम्बुद्धमन्त्रिवचनात् सम्बुध्य-प्रतिबोधं प्राप्य, दीक्षां गृहीत्वा, प्रान्ते द्वाविंशतिदिनान्यनशनं कृत्वा, विपद्य, ईशाने देवलोके श्रीप्रभविमाने ललिताङ्गनामा सुरः सञ्जातोऽसि । ततः पुनः पूर्वविदेहेषु वैर(वज्र)जङ्घो राजा सञ्जातो-ऽसीति गाथार्थः ॥३-४॥

**उत्तरकुरु मिहुणनरो, सोहम्मसुरोह बारसमि विजए ।**
**विज्जसुओ चक्किसिरिं साहुतिगिच्छाए संचिणिय ॥५॥**
**जाओ तमच्चुयसुरो, अट्ठमविजए य भविय चक्कहरो ।**
**वीसंठाणे सेविय निबंधिउं तित्थयरनामं ॥६॥**
**सव्वट्ठसुरवरसिरिं तित्तीसयरेऽणुभूयावयरिओ ।**
**इक्कागु भूमीए तुममासाढे पढमचउत्थीए ॥७॥** तिसृभिः कुलकम् ॥

व्याख्या-

तत्र च, स च वज्रजङ्घो राजा राज्यार्थिपुत्रकृतविषधूपप्रयोगेण मृत्वा उत्तरकुरुषु मिथुननरः । ततः सौधर्मे देवलोके सुरः । अथाऽनन्तरं द्वादशे विजये वैद्यसुतो जीवानन्दनामा त्वं जातः । तत्र चक्रिलक्ष्मीं चक्रवर्त्तिसमृद्धिं साधुचिकित्सया करणभूतया सञ्चित्योपार्ज्य ॥५॥

जातस्त्वमच्युते-द्वादशे स्वर्गे सुरो-देवः शक्रसामानिको द्वाविंशति-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सागरोपमायुः । ततोऽष्टमविजये च भूत्वा चक्रधरः श्रीवज्रनाभनामा । तत्र च विंशतिस्थानानि सेवित्वा 'निबन्धिउ'ति-उपार्ज्य तीर्थंकरनामकर्म । यदुक्तं -

'अरहंत १ सिद्ध २ पवयण ३ गुरु ४ थेर ५ बहुस्सुए ६ तवस्सी ।
सुवच्छल्लया य एसिं ७ अभिक्खनाणोवओगोय ८ ॥१॥
दंसण ९ विणए १० आवस्सए य ११ सीलव्वए निरवइयारे १२ ।
खणलव १३ तव १४ च्चियाए १५ वेयावच्चे १६ समाही य १७ ॥२॥
अपुव्वनाणगहणे १८ सुयभत्ती १९ पवयणपभावणया २० ।
एएहिं कारणेहिं तित्थयरत्तं लहइ जीवो ॥३॥ इति [आवश्यकनिर्युक्ति १७९-१८१]

अत्र 'गुरु'त्ति गुरुश्चतुर्विधः सम्यक्त्वगुरुः १ दीक्षागुरुः २ उपस्थापनागुरुः ३ श्रुतुगुरुः ४ । 'वच्छल्लये'ति - अनुरागः यथावस्थितगुणोत्कीर्तनाद्यनुरूपया वत्सलतया । 'सीलव्वए'त्ति-शीलान्युत्तरगुणाः, व्रतानि मूलगुणास्तेषु निरतिचारः । 'खणलव'त्ति-क्षणलवादिषु संवेगभावनाध्यानाऽऽसेवना । 'च्चियाए'त्ति-त्यागश्च यतिजने भेषजपथ्यादिदानम् । 'समाहि'त्ति-समाधिर्गुर्वादीनां कार्यकरणद्वारेण स्वस्थताऽऽपादनम् । 'पवयणपभावणय'त्ति-यथाशक्त्या मार्गदेशनादिभिः शासनौन्नत्यसम्पादनं प्रभावना । एभिस्तीर्थङ्करत्वं बध्यते, शेषं स्पष्टम् । प्रव्रज्यां पुनश्चतुर्दशपूर्वलक्षाणि प्रतिपाल्य पादपोपगमनाऽनशनं प्रतिपद्य चेत्यपि ज्ञेयम् ॥६॥

ततः सर्वार्थसिद्धे विमाने सुरवरश्रियं त्रयस्त्रिंशत्तराणि सागरोपमाणि अनुभूय तृतीयाऽऽरकस्य चतुरशीति पूर्वलक्षसहस्त्रवर्षेषु नवाशीतिपक्षाधिकेषु शेषेषु सत्सु इक्ष्वाकुभुमौ आषाढे मासे प्रथमचतुर्थ्यामवतीर्णस्त्वमिति गाथा-त्रयार्थः ॥७॥

अथ भगवदवतारे यदभूत् तदाहुः-

**मरुदेवि-नाभिनंदण ! तिनाणलोयणमिहागयं सहसा ।**
**चउदसवरसुमिणुत्तं पि तं निवेईसु सयलिंदा ॥८॥**

मरुदेवी-नाभेः पत्नी, नाभिः सप्तमः कुलकरः, तयोर्नन्दनः, तत्सम्बोधनं हे मरुदेवीनाभिनन्दन ! त्रिज्ञानलोचनं-मतिश्रुतावधिरूपप्रतिपूर्णज्ञानत्रयेण लोचनं-दर्शनं यस्य स तथा तं ज्ञानत्रयोपेतमित्यर्थः । उक्तं च-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'तिहिं नाणेहिं समग्गा तित्थयरा जाव हुंति गिहवासे ।
पडिवन्नम्मि चरित्ते चउनाणी जाव छउमत्था ॥
नेरइय-देव-तित्थयरा य ओहिस्स बाहिरा हुंति ।
पासंति सव्वउ खलु सेसा देसेण पासंति' ॥ [विशेषावश्यकभाष्य-७६६]

इति, सर्वोत्कृष्टं अप्रतिपातिकमाकेवलोत्पत्तिरवधिज्ञानमवधिदर्शनं चासीत् तच्च परमावधेः किञ्चिन्न्यूनं ज्ञेयम् एवंविध 'इहागयं'ति इहागतमत्राऽवतीर्णं त्वां चतुर्दशसङ्ख्या वराः प्रधानाः स्वप्ना वृषभ-गज-सिंहादयस्तैरुक्तमपि ज्ञापितमपि सहसा तत्क्षणात् स्वप्नदर्शनादनन्तरमेव, सकलेन्द्राः-सर्वसुरेन्द्राः, स्वप्नार्थमभिशंसितुं समकालमागत्य निवेदयामासुः मातापित्रोरिति शेषः । एतेन गर्भगतेऽपि भगवति त्रिज्ञानोपेतत्वं, मातुः स्वप्नलाभः, तदाकालत्य-स्वप्नपाठकाऽभावादिन्द्रेः स्वप्नार्थकथनेन भगवदवतारप्रतिपादनं चेत्यर्थत्रयं दर्शितमिति गाथार्थः । अथ जन्मकल्याणकं व्यञ्जयन्तः प्राहुः-

**वसहंको कणयवन्नो कासवगोत्तो कयतिहुयणुज्जोओ ।**
**कसिणट्ठमीइ चित्ते धणुम्मि रासिम्मि तं जाओ ॥९॥**

हे देव ! त्वं वृषभाङ्को-वृषभलाञ्छनः, कनकवर्णः, काश्यपगोत्रः, कृतत्रिभुवनोद्योतः, चैत्रमासि कृष्णाष्टम्यां धनुषि राशौ जातो-गर्भान्निःक्रान्तो-जनित इति गाथार्थः ॥९॥ अथ जन्मसमयगतान्विशेषान्वर्णयन्ति-

**अह चलियासणछप्पन्नदिसकुमारिकयसूइकायव्वो ।**
**तुममगरगिरिम्मि सुहम्मसामिणा लहु सयं नीओ ॥१०॥**

अथेत्यानन्तर्ये ततो जन्मान्तरमेव चलिताऽऽसनषट्पञ्चाशद्दिक्कुमारीकृत-सूतिकर्तव्यः सन् त्वं अमरगिरौ मेरुपर्वते सौधर्मेन्द्रेण लघु-शीघ्रं स्वयं नीत इति गाथार्थः ॥१०॥

**ता भत्तिब्भरनिब्भरमब्भुयभूओ भवंतभावेहिं ।**
**सव्विड्ढिवड्ढियायरमहिसित्तोऽखिलसुरिंदेहिं ॥११॥**

ततो भक्तिभरनिर्भरं, सर्वर्ध्या-समस्तोचितेष्टवस्तुघटनालक्षणया सर्वसम्पदा वर्द्धित आदरो यत्राऽभिषेके तत् तथा, इति द्वे अपि क्रियाविशेषणे ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अद्भूतभूतः-आश्चर्यभूतोऽभिषिक्तस्त्वम् कैरित्याहुः भवद्भावैरुल्लसदभिप्रायैः सहर्षैरिति यावत्, अखिलैः चतुःषष्टिसङ्ख्यैरसङ्ख्यैर्वा सुरेन्द्रैरिति गाथार्थः ॥११॥

अथ स्वामिनो जन्मनः किञ्चिदूने संवत्सरे गते सौधर्मेन्द्रो वंशस्थापनार्थं समागत्य-रिक्तहस्तं न वीक्षेत राजानं देवतां गुरुं नैमितिकं विशेषेण फले फलमादिशेदिति स्थितेः सेक्षुयष्टिः श्रीनाभ्युत्सङ्गनिषण्णं प्रभुं प्रणम्य, वंशस्थापनार्थमग्रतस्तस्थौ । तदा च शक्रकरकलितेक्षुमभिलषिता भगवता करप्रसारः इतीक्षूणामाकर्षाऽभिलाष एषामित्येते इक्ष्वाकव इतीक्ष्वाकुनाम्ना भगवतो वंशस्थापना शक्रकृता समजनीत्येनमर्थं सूचयन्तः प्राहुः-

**सक्ककरकलियमिक्खु बालत्ते दट्ठुमभिलसंतेण ।**
**इक्खागुवंसबीयं जए पणीयं तए चेव ॥१२॥**

शक्रकरकलितं इक्षु बालत्वे द्रष्टुं-समवलोकयितुमभिलषता 'तए चेव'त्ति त्वयैव इक्ष्वाकुवंशस्य बीजं जगति प्रणीतं-प्रकाशितमिति गाथार्थः ॥१२॥

अथ भगवतो गृहवासस्थितिं दीक्षाकल्याणकं चाहुः-

**वीसं कुमारभावे रज्ज तेवट्ठिपुव्वलक्खे तं ।**
**सुरविहियाऽऽहारविही अत्थिय दरिसियकला-सिप्पो ॥१३॥**
**जीयं ति य लोयंतियविबोहिओ वरिसदिन्नवरदाणो ।**
**सिबियासुदंसणाए छट्ठेण देवदूसधरो ॥१४॥**
**सिद्धवणे तमसोगतरुअहे व चउहिं निवसहस्सेहिं सह ।**
**चित्ते बहुलट्ठमि अ अवरह्ने जिण विणिक्खंतो ॥१५॥** तिसृभिः० ॥

व्याख्या-

देशोनवर्षादूर्द्ध्वं सुनन्दा-सुमङ्गलासहितस्य वृद्धिं गच्छतो भगवतः
भोगसमत्थं नाउं वरकम्मं कासि तस्स देविंदो ।
दुण्हुं वरमहिलाणं बहु कम्मं कासि देवीओ ॥१॥
छप्पुव्वसयसहस्सा, पुव्विं जायस्स जिणवरिंदस्स ।
तो भरह-बंभ-सुंदरि-बाहुबली चेव जायाइं ॥२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

देवी सुमंगलाए भरहो बंभी य मिहुणयं जायं ।
देवीइ सुनंदाए बाहुबली सुंदरी चेव ॥३॥
अउणापन्नं जुयले, पुत्ताण सुमंगला पुणो पसवे ।
नीईय अइक्कमणे, निवेयणं उसभसामिस्स ॥४॥
राया करेइ दंडं, सिट्ठिति विंति अम्ह वि सहो ।
उमग्गहयकुलगरं सो य, वेइ उसभो य भे राया ॥५॥
आलोएउं सक्को, उवागउ कुणइ तस्स अभिसेयं ।
मउडाइ अलंकारं, नरिंद जोगं च से कुणइ ॥६॥

[आव०निर्युक्ति-१९५-१९९]

इत्यादि श्रीआवश्यकोक्तयुक्त्या विंशतिलक्षाः कुमारभावे, राज्ये त्रिषष्टिपुर्वलक्षास्त्वं 'अत्थिय'त्ति स्थित्वा-अवस्थाय, पूर्वप्रमाणं च यथा-

'पुव्वस्स य परिमाणं, सइरिं खलु हुंति वासकोडिलक्खाओ ।
छप्पन्नं च सहस्सा, बोधव्वा वासकोडीणं' ति ॥१॥

[बृहत्सङ्ग्रहणी-त्रैलोक्य०वृत्ति-४३४]

कथम्भूतस्त्वं स्थित ? इत्याहुः-सुरैर्विहितो-निष्पादितो देवकुरूत्तर-कुरुसत्कफलपुष्पादिरूप आहारविधिर्यस्य स तथा । उक्तं च आवश्यके- 'उसहस्स गुहावासे अ सक्कउ आसि आहारो' इति तथा दर्शिताः-प्रकटिताः कला लिखित-गणिताद्याः शिल्पानि घट-लोह-चित्र-तन्तुवाय-कास्यप-कृषि-वाणिज्यादीनि येन स दर्शितकला-शिल्पः

तथा जीतं कल्पस्थितिराचारो-अवश्यम्भावेनेति कर्तव्यता इति कारणात्, लोकान्ते भवाः लोकान्तिकाः ब्रह्मलोकवास्तव्याः सारस्वतादयः-

सारस्सय १ मायच्चा २ वह्नी ३ वरुणा य ४ गद्दतोया य ५ ।
तुसिया ६ अव्वावाहा ७ अग्गिच्चा ८ चेव रिट्ठा य ९ ॥१॥ [ज्ञाताधर्मकथा-१/८]

इत्येते एकान्तसम्यग्दृष्ट्यो देवविशेषाः तैर्विशेषेण बोधितो-विबोधितः । स्वयं जानन्नपि व्रतसमयं ज्ञापितः न पुनः भगवांस्तदुपदेशमपेक्षते स्वयं बुद्धत्वात् । तथा वर्षं यावद् दत्तं वरं-वाञ्छितं दानं येन स वर्षदत्तवरदानः । तत्र च प्रतिदिनं-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एगा हिरन्नकोडी अट्ठेव अणुणगा सयसहस्सा ।

सूरोदयमाईउं दिज्जइ जा पाउरा सा ओ ॥१॥

[आचाराङ्गः-११३/आवश्यकनिर्युक्ति-२१७]

तथा च-

तिन्नेव य कोडिसया अट्ठासीयं च हुंति कोडीओ ।

असीइं च सयसहस्सा एयं संवच्छरे दिन्नं ॥२॥ [आचाराङ्गः-११४]

एतावन्नियतं सुवर्णदानं, अनियतं तु गजाऽश्व-रत्न-मणि-वस्तु-दुकूल-सुवर्ण-माणिक्य-ग्रामादि यद् येन याचितं तदेव तस्मै दत्तमित्यपि ज्ञेयं । तथा शिबिकायां सुदर्शनाभिधायां यानविशेषे आरूढ इति गम्यं, षष्टेन तपसा साधकतमेन षष्टं तपः कृत्वेत्यर्थः । वामस्कन्धोपरीन्द्रार्पितदिव्यवस्त्रविशेषधरः ॥१४॥

तथा सिद्धार्थनाम्नि वने, अशोकतरोस्तले-अधस्तात्, चतुर्भिः नृपसहस्रैः चैत्रे मासि, बहुलाष्टम्यां अपराह्ने -पश्चिमपौरूष्यां, हे जिन ! त्वं विनिः-क्रान्तोगृहस्थधर्माद्विनिर्गतः-श्रमणीभूतः । तदा च भगवतश्चतुर्थं मनःपर्यव-ज्ञानमप्युत्पन्नमिति स्वयमभ्युदयं । यतः-

'तिहिं नाणेहिं समग्गा, तित्थयरा जाव हुंति गिहिवासे ।

पडिवन्नम्मि चरित्ते, चउनाणी जाव छउमत्था ॥१॥ [आवश्यक०११०]

इति गाथार्थः ॥१५॥

अथ भगवतः प्रथमपारण-विहारादि सङ्क्षेपेण प्रज्ञापयन्ति-

**सेयंसेण गयउरे इक्खुरसेण वरिसे तुमं पढमं ।**

**पाराविय खावियमिह महाफलं सुमुणिवरदाणं ॥१६॥**

श्रेयांसेन भगवत्प्रपौत्रेण-बाहुबलेः पुत्रः सोमप्रभस्तत्पुत्रः श्रीश्रेयांस इति । गजपुरे-श्रीहस्तिनागपुरे, इक्षुरसेन, वर्षे दीक्षाकालादतिक्रान्ते सति, त्वां प्रथमं पारयित्वा-तव प्रथमं पारणं कारयित्वेति भावः । इह जगति सुमुनीनां-निरतिचार-सर्वविरतिसंयमवतां वरस्य-निरवद्यस्य प्रासुकैषणीयस्य वस्तुनो दानं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुमुनिवरदानं, महाफलं, ख्यापितं-प्रकीर्तितं, प्रथममित्यत्राऽपि सम्बध्यते यतो हि भगवान् दीक्षां गृहीत्वा भिक्षायै वर्षं यावत् प्रतिदिनं प्रतिगेहं ग्राम-नगरादौ बभ्राम परं न तदानींतना जना मुनिदानं विदन्ति, ततो धन-कनक-रत्न-कन्यागजाश्वादिकं स्वामिबुध्या प्रयच्छन्ति । तच्च निरीहत्वादकल्पनीयत्वाच्च भगवान्नाऽऽदत्ते । एवं गजपुरे भगवन्तं भ्रमन्तं महाक्षीणाङ्गं गवाक्षस्थेन श्रेयांसकुमारेण दृष्ट्वा इहापोहं कुर्वता जातिस्मरेण पूर्वभवाचीर्णं चारित्रं श्रुतं च स्मृत्वा परमभक्तिभरेण भगवतः प्रासुकेन पुण्ड्रेक्षुरसेन पारणा कारिता । सर्वत्रोपदिष्टं च मुनिदानं तत्प्रथमतयेत्यादिव्याख्यार्थो महाचरित्रेभ्योऽवसेयं स्तुतिश्चाऽत्र–

'श्रीश्रेयांसकुमार एव जयतात् पुण्यात्मनामग्रणी-
र्येन त्वं यत एकवत्सरमनोहारोऽतिशुष्काङ्गकः ।
पुण्ड्रेक्षुद्रवकुम्भलोठनवशादाप्यायि विश्वत्रयी-,
कल्पद्रुर्विहितः स नूतनरूचिः श्रेयः फलेषून्मुखः ॥१॥ [शार्दूलविक्री०]
अलं प्रसङ्गेनेति गाथार्थः ॥१६॥

**पंचधणुसय पमाणो चउनाणो तुममसंग ! मोणेण ।**
**बहुदेसेसु विहरओ वाससहस्सं निरुवसग्गं ॥१७॥**

पञ्चधनुःशतप्रमाणः, चतुर्ज्ञानी त्वं हे असङ्ग ! हे निःसङ्ग ! मौनेन बहुदेशेष्वार्यानार्येषु विहृतो वर्षसहस्रं यावन्निरुपसर्गं यथा स्यात् तथेति गाथार्थः ॥१७॥ अथ केवलज्ञानोत्पत्तिमाहुः-

**तुह पुरिमतालपुरि सगडमुहवणे अट्ठमेण वडहिट्ठे ।**
**फग्गुणकसिणिक्कारसि पुव्वहूणे केवलं जायं ॥१८॥**

हे असङ्ग ! पूर्वगाथास्थमिह सम्बध्यते । तव पुरिमतालनाम्नि पुरे शकटमुखनाम्नि वने अष्टमेनोपवासत्रयरूपेण तपसा कारणभूतेन वटवृक्षस्याधः फाल्गुनकृष्णैकादश्यां पूर्वाह्ने-प्रथमपौरुष्यां केवलमसहायं सम्पूर्णं शुद्धं अनन्तं वा पदैकदेशे पदसमुदायोपचारात् केवलज्ञानं जातं-समुत्पन्नं मति-श्रुतावधि-मनःपर्यवज्ञानाभावोऽजनि । उक्तं च -

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'कडविवरागयकिरणा मेहंतरियस्स जह दिणेसस्स ।
उक्कडमेहावगमे ण हुंति जह तह इमाइं पि ॥१॥ [ ]

श्रीआवश्यकेऽप्युक्तं-'उप्पन्नम्मि अणंते नट्ठम्मि य छाउमत्थियनाणे ।'
[आवश्यकनिर्युक्ति-४३९]

अथ चतुःप्रकारभगवत्परिवारसङ्ख्यां प्ररूपयन्ति-

**अह चुलसीइसहस्से साहूणं साहुणीण लक्खतिगं ।**
**तं सीवमग्गमकासी चूलसीइ गणे गणहरे इ ॥१९॥**
**पंचसहसब्भहियं लक्खतिगं भावसावयाण तुमं ।**
**चउपन्नसहस्सजुया लक्खाए चेव सड्ढीणं ॥२०॥** [युग्मम्]

अथेति समवसरणरचना-धर्मदेशनाद्यनन्तरं चतुरशीतिसहस्राणि श्रीऋषभसेनप्रमुखाणां साधूनां तथा ब्राह्मी-सुन्दरीप्रभृतीनां साध्वीनां लक्षत्रिकं किं विशिष्टं ? शिवं मार्गयतीति शिवमार्गं मोक्षाकाङ्क्षि त्वमकार्षीरिति सर्वत्र योज्यः तथा चतुरशीति गणान्-गच्छान् तथा गणधरांश्च श्रीऋषभसेन-प्रमुखांश्चतुरशीति त्वमकार्षीः ॥१९॥

तथा पञ्चसहस्राऽभ्यधिकं भावप्रधानसहस्राणां श्रावकाणां श्रीश्रेयांस-प्रमुखाणां त्वमकार्षीः । तथा चतुःपञ्चाशत्सहस्रयुताः पञ्चैव लक्षाः श्राविकाणां सुभद्राप्रमुखाणामकार्षीः ॥२०॥

अथोक्तसङ्ख्येषु च साधुषु लब्धिविशेषद्वारेण सङ्ख्यां ख्यापयन्ति-

**चउदसपुव्वि सहस्सा पउणा पंच, नव उहिनाणीणं ।**
**केवलिजिणाण वीस, ते छसयजुया विउव्वीणं ॥२१॥**
**बारससहस्सा छसया, सयड्ढा वाई य विउलमइणो य ।**
**बावीससहस्सा णुत्तरोवाई नवसया य ॥२२॥**

यथा ये हि सङ्ख्यातीतानपि भवान् प्रज्ञापयन्तः छद्मस्थेन केवली श्रुतकेवली वाऽसाविति ज्ञातुं न शक्यते केवलि-श्रुतकेवलिनोः प्रज्ञापनायां तुल्यत्वादिति-तेषां चतुर्दशपूर्विणां पञ्चसहस्राः पादोनाः (४७५०) । तथा नवसहस्राण्यवधिज्ञानिनां । तथा केवलज्ञानिनां विंशतिः सहस्राणि । तथा 'ते

Jain Education International For Personal & Private Use Only www.jainelibrary.org

छयजुय'त्ति तानि विंशतिसहस्राणि षट्शतयुतानि (२०६००) 'विउव्वीणं'ति वैक्रियलब्धिवताम् ॥२१॥

तथा द्वादशसहस्राणि षट्शतानि सार्द्धानि (१२६५०) वादिनश्च सदेव-मनुजाऽसुरायां सभायामप्यपराजिताः । तथा विपुलमतयश्च द्वाविंशतिसहस्राणि षट्शतानि सार्द्धानि तत्र विपुला बहुविधविशेषणोपेतमन्यमानवस्तुविग्राहित्वेन विस्तीर्णा मतिर्मनःपर्यायज्ञानं येषां ते विपुलमतयः, ते हि सम्पूर्णे मनुष्यक्षेत्रे व्यवस्थितानां संज्ञिनां मनोवर्ति सर्वविशेषोपेतं वस्तु विपुलमतयो जानन्ति । ऋजुमतयस्तु सामान्यत एवाऽर्द्धतृतीयाङ्गुलन्यूने मनुजक्षेत्रे व्यवस्थितानां संज्ञिनां मनोमात्रग्राहकाः न च तैरिहाधिकार इति । तथा द्वाविंशतिसहस्राणि नवशतानि च (२२९००) अनुत्तरोपपातिनः अनुत्तरविमानेषूपपात-उत्पत्तिर्विद्यते येषां ते तथा, ते चागामिभवभाविसिद्धिगतयो ज्ञेयाः ॥२२॥ इति गाथा चतुष्टयार्थः

अथ मोक्षकल्याणकं भणन्ति-

**सामन्नं पालिय पुव्वलक्खमक्खाय महव्वए पंच ।**
**चक्कहरभरहवंदिय ! चउकल्लाणुत्तरासाढ ! ॥२३॥**
**पज्जंकठिओ अट्ठावए समं दसेहिं साहुसहस्सेहिं ।**
**तं माहकिण्हतेरसि पुव्वह्णेऽभीइरिक्खम्मि ॥२४॥**
**चउदसमेण सिवसुहं संपत्तोसि जिणवल्लह ! मुणीण ! ।**
**मह कुरु दयं, हर भयं, देहि मइ, नेहि परमपयं ॥२५॥** तिसृभिः कुलकम् ॥

श्रामण्यं-चारित्रधर्मं पालयित्वा पूर्वलक्षं यावत् भगवतश्च सर्वायुः चतुर-सीतिपूर्वलक्षाः तत्र विंशतिपूर्वलक्षाः कुमारत्वे त्रिषष्टिपूर्वलक्षा राज्ये एकं पूर्वलक्षं श्रामण्ये इति । तथा पञ्चमहाव्रतान्याख्याय-प्ररूप्य हे चक्रधरभरत-वन्दित !-भरतचक्रवर्तिप्रणत ! अत्र भरत इत्युपलक्षणमात्रं तेन-

'वराक्ष-श्रग्युतावामदोर्युगो गजवाहनः ।
समातुलिङ्ग्या....दोर्द्वयः कनकद्युतिः ॥१॥
समुत्पेदे जगद्भर्तुः सदा सन्निधिसेवकः ।
तीर्थत्राणकलादक्षो यक्षो गोमुखसंज्ञया ॥२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रभोरप्रतिचक्राख्या तीर्थे शासनदेवता ।
युता सा चक्रपाशेषुवरदैर्दक्षणैः करैः ॥३॥
चक्राङ्कुशधनुर्वज्रलक्षणैर्दक्षणेतरैः ।
सुपर्णवाहना स्वर्णवर्णा सन्निधिवर्तिनी ॥४॥'

तथा-'जघन्यतः कोटिसङ्ख्यास्त्वां सेवन्ते सुराऽसुराः इत्यादि वचनाज्जगद्वन्द्यो भगवानिति। एतच्च सूत्रे एव किं नोक्तमिति चेदुच्यते सूत्रस्थितेः वैचित्र्यदर्शनार्थम्। उक्तं च -

'कत्थइ देसग्गहणं कत्थ य घिप्पंति निरवसेसाइं ।
उक्कमकमजुत्ताइं कारणवसउ निरुत्ताइं ॥१॥' [विशेषावश्यक०-३८८]

इति स्थितं । तथा चतुर्षु कल्याणेषु गर्भ-जन्म-व्रत-ज्ञानलक्षणेषूत्तराषाढानक्षत्रं यस्य अथवा चत्वारि कल्याणान्युत्तराषाढायां यस्य स तथा, तत्सम्बोधनं हे चतुःकल्याणोत्तराषाढ ! ॥२३॥

'सव्वे सव्वद्धाए सव्वन्नू सव्वकम्मभूमीसु ।
सव्वगुरु सव्वहिया सव्वे मेरुसु अहिसित्ता ॥१॥
सव्वाहि वि लद्धीहिं सव्वे वि परीसहे पराजित्ता ।
सव्वे वि य तित्थयरा पाउवगयाउ सिद्धिगया' ॥२॥

[मरणसमाधिपयन्ना-४३८-४३९]

पादपोपगमनस्वरूपं चेदम्—

'निच्चल निप्पडिकम्मो, निक्खिवए जं जहिं जहाहि ।
अंगं एयं पाउवगमं, नीहारिं वा अनीहारिं ॥१॥
पाउवगमं भणियं, समविसमे पायवुव्व जह पडिओ ।
नवरं परप्पउगा, कंपिज्ज जहा फलतरु व्व ॥२॥'

[मरणसमाधिपयन्ना-४२६-४२७]

अत्र 'निप्पडिकम्मो'त्ति निःपरिकर्मा-स्थाननिषीदनत्वग्वर्तनादिपरिकर्मरहितः । 'नीहारि'ति न गिरिकन्दरादौ ग्रामाद्बहिर्गमनं यत्राऽस्ति तन्निर्हारिः तदन्यदनिर्हारि इति । क्व अष्टापदे पर्वते, समं-सार्द्धं दशभिः साधुसहस्रैः,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कस्मिन् काले ? त्वं माघकृष्णत्रयोदश्यां पूर्वाह्ने प्रथमपौरुष्यां अभिजिन्नक्षत्रे ॥२४॥

चतुर्दशमेन-षडुपवास्य शिवसुखं त्वं सम्प्राप्तोऽसि-एकत्रिंशद्गुणसमृद्धः सिद्धो बभूविथ । ते पुनरेकत्रिंशद्सिद्धगुणाः श्रीसिद्धान्ते इत्थं समुपवर्ण्यन्ते-

'से न दीहे, न वट्टे, न संते, न चउरंसे, न परिमंडले, न किन्हे, न नीले, न लोहिए, न हालिद्दे, न सुक्किले, न सुरभिगन्धे न असुरभिगन्धे, न तित्ते, न कडुए, न कसाए, न अंबिले, न महुरे, न कक्कडे, न मउए, न गुरुएं, न लहुए, न सीए, न उण्हे, न निद्धे, न लुक्खे, ना काए, न संगे, न सहे, न इत्थी, न पुरिसे, न नपुंसे ।' इति अत्र संस्थानवर्णरसाः प्रत्येकं पञ्चसङ्ख्या इति पञ्चदश, द्वौ गन्धौ, अष्ट स्पर्शाः, वेदत्रिकं, कायोऽभिष्वङ्गो जन्म चेतित्रिकं इति सर्वमीलने एकत्रिंशद्सिद्धगुणा इति । हे जिन ! हे वल्लभ ! सर्वहितत्वात् सर्वोत्कृष्टरूप-सौभाग्य-लावण्य-लक्ष्मी-लीलादिसर्वगुणविशिष्टत्वाच्च वल्लभत्वम् । हे मुनीन ! मुनीनां इनः-स्वामी तस्य सम्बोधनम् । अथवा हे जिनवल्लभ ! जिनाः सामान्यकेवलिनः छद्मस्थवीतरागाः तेषां वल्लभ इव वल्लभः तैरप्युपाश्य-मानत्वात् तत्सम्बोधनं, तथा हे मुनीन ! इति विशेषणद्वयम् । यद् वा हे जिन ! हे मुनीनां वल्लभ ! इति विशेषणोभयौ वाच्यौ । तत्र मुनीनां श्रुतकेवल्यादियोगिनां प्रतिपन्नचरमतनूनां वल्लभः-स्पृहणीयः यदुक्तं-

'पडिवन्नचरमतणुणो अइसयलेसं पजस्स दट्ठुणं ।
भवहुत्तमणा झायंति जोगिणो तं जिणं नमह ॥१॥' [ ] इति ।

एतेनाचार्यैर्जिनवल्लभसूरिभिः स्वनाम सूचितम् । महाकवयो हि स्वनामाङ्कं काव्यं कुर्वतीति स्थितेः । ततो मम विषये दयां कृपा कुरु तथा 'इह-परलोगाऽऽदाणमकम्हा-आजीव-मरणमसलोए' इति सप्तप्रकारं भयं हर-अपनय । तथा मम मतिं सद्बुद्धिं देहि । 'देहि मयं' इति पाठे मतं अभीष्टं वाञ्छितं देहि । नय-प्रायय मामपि परमपदं मोक्षं, अपेर्गम्यमानत्वात्, भगवन् ! त्वं मोक्षं प्राप्तोऽसि ततः कृपां कृत्वा मामपि मोक्षं नयेत्यभिप्रायः । समर्थे हि प्रभौ प्रार्थना फलवती भवतीति निश्चित्य परमपदप्राप्तयः सूरयः परमानन्द-सम्पदास्पदं बभूवुरिति गाथात्रयाऽर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

साधुसोमगणीशेनाऽक्लेशेनार्थप्रबोधिनी ।
नाभेयचरिते चक्रे, वृत्तिश्चित्तप्रमोदिनी ॥१॥

• • •

## २. श्रीशान्तिनाथचरित्रम् ॥

अथ श्रीजिनवल्लभसूरिविरचिते चरित्रपञ्चके द्वितीयं श्रोतृजनजनितचित्रं पवित्रं श्रीशान्तिनाथचरित्रं विव्रियते । तस्य चेदं प्रथमगाथाद्वयं-

**अप्पडिहयधम्मचक्केण, फारफुडफुरियनाणरयणेण ।**
**जेण सयलं पि भरहं पसाहियं साहियं च इमं ॥१॥**
**तं पणमिय सोलसमं तित्थयरं पंचमं चक्कहरं ।**
**तस्सेव किंचि सुचरियकणगुणणं किल करिस्सामि ॥२॥** युग्मम् ॥

व्याख्या - तं प्रथमगाथोक्तं विशेषणोपेतं षोडशं तीर्थंकरं पञ्चमं चक्रधरं च-चक्रवर्तिनं च प्रणम्य-प्रकर्षेण नत्वा तस्यैव षोडशस्य तीर्थकृतः पञ्चमस्य चक्रवर्तिनः श्रीशान्तिनाथस्य, किञ्चित्-मनाक्, सुचरितकणस्य-सच्चरित्र लेशस्य, गुणनं-कीर्तनं, किल करिष्यामि । यद्यपि जडोऽहं तथापि करिस्ये इत्यर्थः । तं किं इति तच्छब्देनापेक्षितमर्थं यच्छब्देनाह-येन षोडशतीर्थङ्करेण पञ्चमचक्रधरेण च इदं प्रत्यक्षलक्षं भरतं-भरतक्षेत्रं प्रसाधितं-अलङ्कृतं, तथा साधितं-वशीकृतं च । पक्षद्वयेप्येक एवार्थः किं विशेष्टेन येनेत्याह- अप्रतिहतधर्मचक्रेण अप्रतिहतमसंवलितं धर्मचक्रं यस्य तीर्थङ्करस्य पक्षो । अनिवारित धनुश्चक्रे यस्य चक्रवर्तिनः स तथा तेन, धर्मशब्दो धनुर्वाची । तथा चाहुः जिनदत्तसूरिपादाः श्रीगणधरसार्द्धशतके-

'अविणासियजीवं ते धरंति धम्मं सुनिप्फन्नं ।
मुक्खस्स कारणं भयनिवारणं पत्तनिव्वाणं ॥१॥' [गणधरसार्ध०-९१]

पुनः कथम्भूतेन ? स्फारस्फुटस्फुरितज्ञानरत्नेन स्फारं-दीप्रं, स्फुटं-प्रकटं, स्फुरितं-कृतप्रकाशं, ज्ञानरत्नं-केवलज्ञानं यस्य स तथा तेन । पक्षे स्फाराणि दीप्राणि-स्पष्टानि, स्फुटानि-प्रकटानि, स्फुरितानि-स्व-स्वकार्येऽप्रति- हतशक्तीनि, नाना-विविधानि, रत्नानि चक्रादीनि चतुर्दशसङ्ख्यानि यस्य स तथा तेन । उक्तं च-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'वामपमाणं चक्कं १ च्छत्तं २ दंडं ३ दुहत्थयं चम्मं ४ ।
छत्तीसंगुल खग्गो ५ सुवन्नकांगिणि चउ अंगुलिया ६ ॥१॥
चउरंगुलो दुअंगुलं पि हु लोयमणी ७ पुरोहि ८ गय ९ तुरया १० ।
सेणावइ ११ गाहावइ १२ वड्ढइ १३ त्थी १४ चक्कि रयणाइं ॥२॥

[बृहत्सङ्ग्रहणी-२६४-२६५]

अथ येनाऽप्रतिहतधर्मचक्रेण स्फार-स्फुट-स्फुरितज्ञानरत्नेन पक्षे स्फार-स्फुट-स्फुरितनानारत्नेन इदं सकलमपि भरतक्षेत्रं अलङ्कृतं साधितं च ।

तं षोडशतीर्थकरं पञ्चमं च चक्रवर्तिनं प्रणम्य तस्यैव किञ्चित् सुचरित-लेशस्य कीर्तनं करिष्यामीति सम्पिण्डितः प्रथमगाथाद्वयार्थः ॥१-२॥

अथ भगवच्चरितमेव पूर्वभवैः प्रपञ्चन्तः प्राहुः-

**इह भरहे रयणपुरे राया तुममासि देव ! सिरिसेणो ।**
**तो इह कुरुसु मिहुणो, सुयवसणविरागओ जाओ ॥३॥**

व्याख्या - हे देव ! त्वं इह भरते-अस्मिन् जंम्बूद्वीपसत्के भरतक्षेत्रे रत्नपुरे नगरे-राजा आसीः श्रीषेणनामा श्रीविमलबोधाचार्यदेशनातः प्राप्तसम्यक्त्व-श्राद्धधर्मः ततः सुतव्यसनविरागः सुतयोरिन्दुषेण-बिन्दुषेणयोर्व्यसनं अनन्त-मर्त्यकावेश्यारिरंसया युद्धं क्व विचरिते ? तु कौशाम्बीसबलभूपालसुतायाः श्रीकान्तायाः स्वयंवरत्वेन समागतायाः पाणिग्रहणार्थं द्वयोर्युद्धं तेन विरागो-निर्वेदः तस्मात् तालपुटविषप्रयोगेण विपद्येति शेषः । इह जम्बूद्वीपे कुरुष्विति-उत्तरकुरुषु मिथुनको-युगलिको मनुष्यो जात इति गाथान्तेन सम्बन्ध इति गाथार्थः ॥३॥ ततश्च-

**होउं सोहम्मसुरो वेयड्ढे तं अहेसि खयरिंदो ।**
**अमियगुणअमियतेओ रहनेउरचक्कवालपुरे ॥४॥**

व्याख्या - भूत्वा सौधर्मे स्वर्गे सुरो-देवस्त्रिपल्योपमायुः । तत एतद्भरतक्षेत्रसत्के वैताढ्ये रथनूपुरचक्रवालपुरे त्वमभवः । किं तदित्याह खचरेन्द्रो-विद्याधरेन्द्रः, कियद्गुणं किं नाम वा ? इत्याह-अमिता असङ्ख्याता गुणा यस्य स चासौ अमिततेजाश्च अमितगुणाऽमिततेजाः अमिततेजो नामेति गाथार्थः ॥४॥ तत्र च -

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**छव्वीसदिणे आउं, जाणिय पव्वइय पाणिय सुरद्धिं ।**
**वीससयरे भुंजिय जंबुदीवरमणिज्जविजयम्मि ॥५॥**

**पुरीए सभाएअपराजिय त्ति तं हलहरो जिण ! अहेसि ।**
**पडिवज्जिय पवज्जं तो पत्तो अच्चुइंदत्तं ॥६॥** युग्गम् ॥

षड्विशंतिदिनान्यायुः शेषं 'जाणिय'त्ति नन्दनवने विपुलमति-महामति-चारणमुन्योः वचनात् ज्ञात्वा, प्रव्रज्य-दीक्षां गृहीत्वा च, ततः प्राणतनाम्नि दशमदेवलोके नन्दिकावर्त्ते विमाने देवसम्बन्धिनीऋद्धिं विंशतिं अन्तरान् सागरोपमान् भुक्त्वा, जम्बूद्वीपे रमणीयाख्ये पञ्चदशे विजए पुर्यां शुभायां शुभानाम्न्यां, हे जिन ! त्वं हलधरो-बलभद्रः अपराजित इति नामा आसीः । तत्र प्रतिपद्य-गृहीत्वा प्रव्रज्यां ततः प्राप्तो अच्युतेन्द्रत्वम् ॥५-६॥

**चविउमिह मंगलावइ विजए तं रयणसंचयपुरम्मि ।**
**खेमंकरनिवइसुओ, अहेसि वज्जाअहो राया ॥७॥**

व्याख्या - ततः च्युत्वा, इह जम्बूद्वीपे मङ्गलावतीविजये षोडशे रत्नसञ्चयनाम्नि पुरे क्षेमङ्करनृपतिसुतस्त्वमासीः वज्रायुधनामा राजा ॥७॥

**इंदथुय ! चरिय चरणं चिरमुप्पन्नोसि नवमगेविज्जे ।**
**अह जंबूदीवअट्ठमविजए पुंडरिगिणिपुरीए ॥८॥**

हे इन्द्रस्तुत ! वज्रायुधभवे हि जीवदयागुणेनेन्द्रप्रशंसानन्तरं देवकृतपरीक्षा-पारापताद्यर्थसूचकमिदं विशेषणं चरित्वा-प्रतिपाल्य, चरणं-चारित्रं, चिरं-चिरकालं, उत्पन्नोऽसि त्वं नवमग्रैवेयके अथाऽनन्तरं जम्बूद्वीपाष्टमविजये पुण्डरीकिणीपुर्याम् ॥८॥

**घणरहतित्थयरसुओ मेहरहनिवो भवित्तु पिउपासे ।**
**पाविओ य चरमं संचिणिय तित्थयर-चक्कहरलच्छि ॥९॥**

**उपन्नो परमाऊ सव्वट्ठे, तदणु हत्थिणागपुर सिरि ।**
**वीससेणपणइणि अइरादेवीइ कुच्छिंसि ॥१०॥**

**चउदस सुमिण पिसुणिओ मेसे भरणि कयपंचकल्लाण ! ।**
**भद्दवयकसिणसत्तमिनिसाइ तं नाह ! अवइन्नो ॥११॥** तिसृभिः कुलकम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

घनरथनाम्नस्तीर्थङ्करस्य सुतो मेघरथनृपो भूत्वा पितुर्घनरथतीर्थङ्करस्य पार्श्वे प्राप्य चरणं-चारित्रं सञ्चित्योपार्ज्य तीर्थङ्कर-चक्रधरयोर्लक्ष्मीं ॥९॥

उत्पन्नः सर्वार्थसिद्धे विमाने, परमायुरुत्कृष्टायुः, तदनु हस्तिनागपुरे श्रीविश्वसेनराज्ञः प्रणयिन्याः, अचिरादेव्याः कुक्षौ-गर्भे ॥१०॥

चतुर्दशस्वप्नैः पिशुनितः-सूचितः, मेषराशौ भरण्यां कृतानि पञ्च-कल्याणानि येन स तथा भाद्रपदकृष्णसप्तमीनिशायां हे नाथ ! त्वमवतीर्ण इति गाथात्रयार्थः ॥११॥

अथ भगवदवतारे यदभूत् तदाहुः-

**अवयरिए तइं पियरो समिच्च इंदेण सलहिया महिया ।**
**मायाऽऽसि गूढगब्भा गिहं च फुडबहुविहनिहाणं ॥१२॥**

अवतीर्णे त्वयि माता-पितरौ समेत्याऽऽगत्य इन्द्रैः श्लाघितौ महितौ-पूजितौ। माता तदा गूढगर्भाऽलक्षितगर्भा आसीत् । च-पुनर्गृहं स्फुटानि-प्रकटानि, बहुविधानि-नानाप्रकराणि, निधानानि यत्र तत् तथा आसीदित्यनेन योग इति गाथार्थः ॥१२॥ अथ जन्मकल्याणकं भणन्ति-

**तो जेट्ठकसिणतेरसिरत्तीए कणयवन्नो हरिणंको ।**
**कासवगुत्ते जाओ चालीसधणूसियसरीरो ॥१३॥**

ततः ज्येष्ठमासस्य कृष्णत्रयोदशीरात्रौ कनकवर्णः हरिणाङ्कः काश्यपगोत्रे जातः त्वमित्यध्याहार्य चत्वारिंशद्धनुरुच्छ्रितशरीरः । इदं चोत्तरकालापेक्षया विशेषणमिति गाथार्थः ॥१३॥

अथ जन्मकाले यज्जातं तदाहुः-

**अह झत्ति जगुज्जोए जाए चलियासणा करे महिमं ।**
**छप्पन्नदिसि कुमारीओ तदणु चउसंठि सुरवइणो ॥१४॥**

अथ जन्मानन्तरं झटिति जगदुद्योते जाते चलिताऽऽसनाः षट्पञ्चाशत् दिक्कुमार्यः कुर्वन्ति जन्ममहिमानम् । तदनु चतुःषष्टिः सुरपतयो जन्ममहिमानं कुर्वन्ति । एतच्चाऽतिसंक्षिप्तमुक्तं अतः किञ्चिद्विव्रियते - गजदन्तपर्वताधो

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वर्तमाना अधोलोकवासिन्यः दिक्कुमार्य आगत्य संवर्तकवायुविकुर्वणेनाऽऽयोजनं भूमिशुद्धिं कृत्वा श्रीजिनपुरो गायन्ति तिष्ठन्ति तथा त्वं मा कार्षीः भयं मातरित्युक्त्वेशानदिक्श्रितं प्राङ्मुखं सूतिवेश्मैतास्तन्वन्ति स्तम्भसहस्रमत् । तथा नन्दनवनस्था उर्ध्वलोकवासिन्यः दिक्कुमार्यो मेघं विकुर्व्याऽऽयोजनं यावत् गन्धोदकवृष्ट्या रेणुमुपशाम्य पञ्चवर्णपुष्पवृष्टिं जानुप्रमाणां विरच्य समातरं जिनं नत्वा गायन्ति तिष्ठन्ति । तथा रुचकनाम्नि त्रयोदशे द्वीपे रुचकपर्वतोऽस्ति तत्रैव रुचकपर्वते पूर्वादिषु चतसृषु दिक्षु वासिन्यः प्रतिदिग्भ्योऽष्टावष्टौ दिक्कुमार्य आगत्य समातरं जिनं नत्वा यथासङ्ख्यं आदर्श-भृङ्गार-तालवृन्त-चामरहस्ताः जिनगुणान् गायन्त्यः तिष्ठन्ति । तथा विदिक्षु रुचकगिरिवासिन्यश्चतस्रो दिक्कुमार्यो नत्वा समातुर्जिनस्य चतसृष्वपि दिक्षु दीपिकाहस्तगता भक्त्या जिनगुणान् गायन्त्यस्तिष्ठन्ति । रुचकद्वीपमध्ये वासिन्यश्चतस्रः दिक्षु दिक्कुमार्यः तथैवाऽऽगत्य भगवतश्चत्वारि अङ्गुलानि वर्जयित्वा नाभिनालं छित्वा विवरं चख्नुस्तत्र तं चिक्षिपुः । तच्च वैडूर्यैरापूर्य रत्नपीठबन्धं दूर्वारोपणं च कृत्वा जन्मगेहाद्रम्भागृहत्रयं पूर्वदक्षिणोत्तराशासु व्यधुः । तेषु दक्षिणे रम्भागृहे समातुर्भगवतः शतपाकादिभिस्तैलैरभ्यगाद्वर्तनेन, ततः पूर्वे कदलीगृहे स्नपनपूर्वं गोशीर्षचन्दनेन विलेपनं देवदूष्यपरिधापनं सर्वालङ्कारैर्विभूषां च कुवन्ति, ततः उत्तरे रम्भागारे रक्षापोट्टलिकाबन्धं कुवन्ति ततो भगवतः कर्णमूले दृषद्युगमस्य वादनं 'पर्वतायुर्भव' इत्याशीर्वचो भक्तिक्रमेण दत्वा समातुर्जिनस्य पुरतो गुणगान-परास्तिष्ठन्ति । तथा चागमः-

'अहलोग-उद्धलोगा पुव्वाई रुयगवासिणीओ य ।
अट्ठट्ठ विदिसि चउरो मज्झिम रुयगाउ चत्तारि ॥१॥

संवट्ट-मेह-आयंसगा-भिंगार-तालयंटा य ।
चामर-जूई-रक्खं करंति एयं कुमारीओ ॥२॥ [आवश्यकनिर्युक्ति-१८७-१८८]

इति दसकप्पिंदा वीसं भवणवई सामिणा रवि-ससी दो ।
बत्तीस वितरिंदा चउसट्ठि करंति जिणन्हवणं ॥३॥'

ते मेरुगिरौ जन्ममहिमानं सर्वर्ध्या कुर्वन्तीति गाथार्थः ॥१४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ नामकरणं सामर्थकमाहुः-

**गब्भगए चेव तए असिवोवसमो जओ जए जाओ ।**

**सुमरणमित्तेण विकुणसि संतिमिय नाम ते संती ॥१५॥**

गर्भगते एव त्वयि, अशिवोपशमः-सर्वोपद्रवनिर्वृतिः, यतो-यस्मात् कारणाज्जगति लोके जातः । तथा स्मरणमात्रेणापि करोषि शान्तिं, किं पुनः पूजनादिना ? इति हेतोस्ते-तव शान्तिरिति नामेति गाथार्थः ।

अथ विभागेनायुःप्रमाणमाहुः-

**पणवीस वाससहसा कुमरत्ते मंडलित्ति चक्कित्ते ।**

**समणत्ते य तुह गया पत्ते पुण चक्कवट्टिपए ॥१६॥**

पञ्चविंशतिवर्षसहस्राः प्रत्येकं कुमारत्वे मण्डलिकत्वे चक्रित्वे श्रमणत्वे च तव गताः-समतिक्रान्ताः । एतेन वर्षलक्षमतिक्रान्तमिति सर्वायुर्भणनम् । अथ तत्रैव विशेषमाहुः-प्राप्ते समुदीर्णाभोग्यतयोपस्थिते पुनश्चक्रवर्तिपदे इति अग्रेतनगाथया योज्यमिति गाथार्थः ॥१६॥

**जाया ते नवनिहिणो चक्कट्ठपइट्ठ जोयणट्ठुच्चा ।**

**बारस-नवजोयणदीह-वित्थडा निहिसनामसुरा ॥१७॥**

जातास्ते-तव नवनिधयः-

'नैसर्प्पिः १ पाण्डुक २ श्चाऽथ, पिङ्गलः ३ सर्वरत्नकः ४ ।

महापद्म ५ काल ६-महाकालौ ७ माणव ८-शङ्खकौ ९ ॥१॥' इति

किं विशिष्टा ? इत्याहुः-अष्टसु चक्रेषु प्रतिष्ठाऽवस्थानं येषां ते अष्टचक्राप्रतिष्ठाः । सूत्रे प्राकृतत्वात् 'चक्र' शब्दस्य पूर्वनिपातः । तथा अष्टयोजनोच्चाः, तथा यथाक्रमं द्वादशनवयोजनदीर्घविस्तीर्णाः, अयमर्थः-द्वादशयोजनानि दीर्घाः नवयोजनानि विस्तीर्णाः । तथा निधिभिः समाननामानः-सदृशाभिधानाः सुरा अधिष्ठायकाः येषां ते निधिसनामसुराः तथा चोक्तं-

'पुर १ कण २ भूसण ३ रयणाण ४ वत्थ ५ सिप्पा ६ गराण ७ सत्थाणं ८ ॥

नायड ९ उप्पत्ति कमा सनामसुरऽधिट्ठियनिहीसु ॥१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चक्कट्ठपइट्ठाणा अट्ठुसेहा नव य विक्खंभे ।
बारस दीहा मंजूससंठिया जन्हवीयमुहे ॥२॥' [स्थानाङ्गसूत्र-१२१]
इति गाथार्थः ॥१७॥

**जक्ख सहस्सा सोलस तद्दुगुणा मुउडमद्ध नरवइणो ।**
**तद्दगुणा रमणीओ, आणाणुगया तुह अहेसि ॥१८॥**

यक्षाणां सहस्राः षोडश ते च द्वयोः स्कन्धयोश्चतुर्दशरत्नानां प्रत्येकं सहस्रमधिष्ठातारो ज्ञेयाः । तेभ्यो द्विगुणाः द्वात्रिंशत्सहस्राः मुकुटबद्धनरपतयः । तेभ्यो द्विगुणाश्चतुःषष्टि सहस्रा रमण्यः आज्ञामनुगता-आज्ञाकारिणस्तवासन्निति गाथार्थः ॥१८॥

**छन्नउइकोडीओ पायक्काण तह पवरगामाण ।**
**हय-गय-रहाण लक्खा पत्तेयं तुज्झ चुलसीई ॥१९॥**

षण्णवतिकोट्यः पदातीनां । तथा षण्णवति कोट्यः प्रवरग्रामाणां अत्र करादिगम्यो ग्रामः वृत्या वृत्तो वा । तथा हय-गय-रथानां प्रत्येकं तव चतुरशीतिर्लक्ष आसन्नित्यध्याहार इति गाथार्थः ॥१९॥

**बत्तीसबद्धनायड बत्तीससहस्सअभिणइज्जातो ।**
**तावइयजणवइपहू, अकासि नासियभयं भरहं ॥२०॥**

द्वात्रिंशता पात्रैर्वरतरुणिभिर्बद्धानि-निष्पादितानि द्वात्रिंशद्भक्तिनिबद्धा-नीति वा यानि नाटकानि, तेषां द्वात्रिंशता सहस्रैरभिनीयमानो-अभिनयैः सेव्यमान, अभिनयविशिष्टैः नाटकैः सेव्यमान इत्यर्थः । तथा तावतां-द्वात्रिंशत्सहस्राणां जनपदानां-देशानां प्रभुः त्वमिति शेषः । नाशितमपनीतं भयं यस्मात् तानि नासितभयं भरतं-भरतक्षेत्रमकार्षीरिति गाथार्थः ॥२०॥

**कमसो चउदस-सोलस-वीसा-बावत्तरीय-नवनउई ।**
**संवाह-खडगा-गर-पुरवर-दोणमुह सहस्सा ते ॥२१॥**
**आसी तुह पत्तेयं मडंब-कव्वड सहस्स चउवीसा ।**
**दुगुणाणि पट्टणाणि य चउदसरयणेसर जिणेस ॥२२॥** युग्मम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्रमशोऽनुक्रमेण चतुर्दश-षोडश-विंशतिः-द्वासप्तति-नवनवतिः संवाह-खेटकाऽऽकर-पुरवर-द्रोणमुखानां सहस्राः, ते तव आसन्नित्युत्तरेण सम्बन्धः। अयमर्थः-यत्र पर्वतादि दुर्गे लोका धान्यानि संवहन्ति स संवाहः तेषां चतुर्दशसहस्राः। धूलीयप्रकारं अद्रि-नदीभ्यां वेष्टितं वा खेटं तेषां षोडश-सहस्राः। लवणाद्युत्पत्तिभूमिराकरः तेषां विंशतिः सहस्राः। पुरवराणां प्रधाननगराणां द्वासप्ततिः सहस्रा :। यत्र जलस्थलमार्गाभ्यां भाण्डान्यागच्छन्ति तत् द्रोणमुखं सिन्धुवेलावलयपरिगतं वा तेषां नवनवतिः सहस्रा इति ॥२१॥

आसंस्तव प्रत्येकं मडम्बकर्वटयोः सहस्राणि चतुर्विंशतिः, तत्र पञ्चशतैर्ग्रामैर्युक्तं मडम्बं यद् वा यत्र योजनाभ्यन्तरे सवीता-ग्रामादि नाऽस्ति तन्मडम्बं, कुनगरं कर्वटं पर्वतेन वेष्टितं वा कर्वटम्। तथा 'दुगुणानी'ति अष्टचत्वारिंशत्सहस्राणि पत्तनानि, अत्र पत्तनं द्वेधा जलपत्तनं स्थलपत्तनं च, तत्र जलेन यत्र भाण्डान्यागच्छन्ति तज्जलपत्तनं, यत्र तु स्थलेन तत् स्थलपत्तनं रत्नयोनिर्वा पत्तनम्। हे चतुर्दशरत्नेश्वर ! चतुर्दशसङ्ख्यानि रत्नानि प्रत्येकं यक्षसहस्राधिष्टितानि सेनापत्यादिनि तेषामीश्वरः प्रभुस्तत् सम्बोधनं तथा, हे जिनेशेति गाथार्थः ॥२२॥ अथ दीक्षाकल्याणकं प्रकटयन्ति-

**छप्पन्नमंतरोदग कुरज्जमेगुणपन्न मन्नं च ।**
**बहु विच्छडं छड्डिय चक्किसिरिं निवसहस्सजुओ ॥२३॥**
**चरमवए जिट्ठाऽसियचउदसि अवरह्ने तंसि निक्खंतो ।**
**सहसंबवणे छट्ठेण लट्ठे सव्वट्ठसिबियाए ॥२४॥** युग्गम् ॥

षट्पञ्चाशतमन्तरोदकान् कुराज्यानि एकोनपञ्चाशत् अन्यं च बहुर्विच्छदो-विस्तारो यस्या सा तया, तां चक्रिश्रियां-चक्रवर्तिलक्ष्मीं 'छड्डिय'त्ति त्यक्त्वा नृपसहस्रयुतः ॥२३॥

चरमेऽन्तिमे वयसि ज्येष्टमासस्यासिता-कृष्णा चतुर्दशी, तस्यां अपराह्ने चरमपौरुष्यां त्वमसि निःक्रान्तो-गृहस्थधर्मान्निर्गतः-प्रव्रजितः, सहस्राम्रवने, षष्टेन तपसा, लष्टा-प्रधाना, सर्वार्थाभिधाना शिबिका तस्यां आरूढ इति शेष, इति गाथाद्वयार्थः ॥२४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ मनःपर्यवज्ञानोत्पत्तिकालसूचनापूर्वं ज्ञानोत्पत्तिकाल-प्रथम-पारणास्वरूपं निरूपयन्ति-

**सज्जो संजायचउत्थनाण ! तुह मंदिरे पुरे भमओ ।**
**बीयदिणे परमन्नं पारणमासी सुमित्तघरे ॥२५॥**

सद्यस्तत्कालं-दीक्षाक्षण एव, हे सञ्जातचतुर्थज्ञान ! यदुक्तमावश्यके-

'तिहिं नाणेहिं समग्गा तित्थयरा जाव हुंति गिहवासे ।
पडिवन्नम्मि चरित्ते, चउनाणी जाव छउमत्था ॥१॥ इति ।

[आवश्यकनिर्युक्तिः-११०]

तव मन्दिरनाम्नि पुरे भ्रमतो-भिक्षार्थं पर्यटतः, दीक्षादिनात् द्वितीयदिने सुमित्रस्य गृहे परमान्नेन पारणमासीत् । प्राकृतत्वाद् विभक्तिव्यत्ययः । इति गाथार्थः ॥२५॥ अथ ज्ञानकल्याणकं प्रकटयन्ति -

**वरिसे गयम्मि छट्ठेण तुज्झ पोससियनवमिपुव्वह्ने ।**
**सहसंबवणे केवलमुप्पन्नं नंदिरुक्खतले ॥२६॥**

दीक्षाकालाद् वर्षे गते सति षष्टेन तपसा तव पौषशुक्लनवम्यां पूर्वाह्ने सहस्राम्रवने केवलज्ञानमुत्पन्नं नन्दिवृक्षतले इति गाथार्थः ॥२६॥

अथ समवसरणे चतुर्विधसङ्घस्थापनां प्रज्ञापयन्ति-

**तक्खण खुभियाखिलसुरनिकायकयपढमसमवसरणठिओ ।**
**छत्तीसगुणधरे गणहरे य गणे कासि छत्तीसं ॥२७॥**

तत्क्षणक्षुभिताऽखिलसुरनिकायकृतप्रथमसमवसरणस्थितः षट्त्रिंशत्-गुणधरान् गणधरानाचार्यान्-गच्छाधिपतीन् श्रीचक्रायुधादीन् च पुनः षट्त्रिंशद्-गुणान् गच्छान्-एकवाचनिकान् साधुसङ्घातान् अकार्षीस्त्वमिति शेष इति गाथार्थः ॥२७॥

**साहु सहस्सा बिसट्ठी चउसयहीणा य साहुणीणं ।**
**ते समणोवासगलक्खा दुन्नि य नवईसहस्सजुया ॥२८॥**
**तिनवइसहस्स सहिया लक्खा तिन्नेव देव ! सड्ढीणं ।**
**चउदसपुव्वीण सयाणि अट्ठ वाईण तिगुणाणि ॥२९॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**मणनाणि सहसचउरो ते तिसयजुया य केवलि जिणाणं ।**
**ओहिनाणि सहस्सा तिन्ने विउव्वीण ते दुगुणा ॥३०॥** तिसृभिः कुलकम् ॥

साधुनां चक्रायुधादीनां सहस्रा द्वाषष्टिः । पुनस्ते द्वाषष्टिसहस्राश्चतुःशतहीनाः (६१६००) एकषष्टिसहस्राः षट्शतानि भवन्ति साध्वीनां श्रीश्रुतिप्रमुखाणाम् । तथा श्रमणोपासकलक्षे द्वे एव नवतिसहस्रयुते (२९००००) इत्यर्थः ॥२८॥

त्रिनवतिसहस्रसहिता लक्षा तिस्र एव (३९३०००) हे देव ! श्राविकाणाम् । एतच्चतुर्विधं सङ्घं निरूप्य तत्रैव लब्धिविशेषवतां यतीनां सङ्ख्यां ख्यापयन्ति-चतुर्दशपूर्विणामजिनानामपि जिनसङ्काशानामष्टौ शतानि । तथा सदैव मनुजाऽसुरायां पर्षद्यपराजितानां वादिनां त्रिगुणान्यष्टौ शतानि चतुर्विंशति शतानि (२४००) इत्यर्थः ॥२९॥

मनःपर्यायज्ञानिनां सहस्राश्चत्वारः ते पुनः ऊर्ध्वं यावज्ज्योतिश्चक्रश्चोपरितलं, तिर्यग् मनुष्यक्षेत्रस्यान्तं यावत्, अधस्त्वधोग्रामान्तं यावत्, संज्ञिपर्याप्तपञ्चेन्द्रियाणां मनोगतान् भावान् जानन्ति पश्यन्ति चेति ज्ञेयम् । ते चत्वारः सहस्रास्त्रिशतयुताश्च (४३००) केवलिजिनानाम् । तथा अवधिज्ञानिनां सहस्रास्त्रयः । वैक्रियलब्धिवतां ते त्रयः सहस्राद्विगुणाः-षट्सहस्राः (६०००) इत्यर्थ, इति तव परिवारोऽभूदित्य-ध्याहार्यमिति गाथा त्रयार्थः ॥३०॥ तथा च-

**तुह तित्थे विग्घहरा गरुडो जक्खो सुरा य निव्वाणी ।**
**चउजामधम्मदेसग अमरिंद-नरिंदविंदनय ! ॥३१॥**

हे चतुर्यामधर्मदेशक ! चत्वारो यामा-व्रतानि प्राणातिपात-मृषावादा-ऽदत्तादान-परिग्रहविरमणलक्षणानि यत्र स चाऽसौ धर्मश्च तं दिशतीति समासः अबह्मणः परिग्रहान्तर्गतत्वेन अभणनात् । तथा हे अमरेन्द्रनरेन्द्रवृन्दनत ! तव तीर्थे शासने विघ्नहरौ गरुडो यक्षः, सुरा च-यक्षिणी च निर्वाणी अभूतामिति क्रियाध्याहारः । उक्तं च-

'यक्षोऽभूद्गरुडाऽभिख्यः क्रोडाशः करिवाहनः ।
बिभ्राणो दक्षिणौ पाणी, बीजपुराऽम्बुजाङ्कितौ ॥१॥
नकुलेनाऽक्षसूत्रेण प्रवणौ दक्षिणेतरौ ।
नीर्वाणी नाम्नी गौराङ्गी श्वेतपङ्केरुहासना ॥२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दधाना दक्षिणौ हस्तौ पुस्तकोत्पलमालिनौ ।
वामौ कमण्डलसरोरुहाऽलङ्करणौ पुनः ॥३॥
श्रीशान्तितीर्थनाथस्य, तीर्थे शासनदेवता ।
आभ्याममुक्तसानिध्यो विजहार धरां विभुः ॥४॥' इति । [ ]

अत्र हि 'गरुडो जक्खो सुरा हि कंदप्पा' इति पाठः स्तुतिप्रसिद्धोऽपि श्रीप्रवचनसारोद्धारैकविंशस्थाननाममालासंस्कृतप्राकृतचरित्रजीर्णचित्रपटयन्त्र-श्रीसूरिमन्त्रकल्पादिभिर्विसंवादित्वात् प्रावाहिकः सम्भाव्यते, निर्वाणीदेव्या एव वा कन्दर्पेति संज्ञान्तरं क्वचित् पूज्यैर्दृष्टमभूदिति तत्वं बहुश्रुता विदन्ति किञ्च-

'कन्दर्पा नाम्नी तु देवी, गौराङ्गी मीनवाहना ।
उत्पलाङ्कुशसंयुक्तौ दक्षिणौ दधती भुजौ ॥१॥

वामौ सपद्माऽभयदौ०' इत्येवंरूपा प्रज्ञप्त्यपरपर्याया श्रीधर्मनाथतीर्थे शासनदेवी श्रूयते । तदत्र 'सुरा य निर्वाणी'ति पाठः सम्यगिति गाथार्थः ॥३१॥

अथ मोक्षकल्याणकं गृह्णन्ति-

**सव्वाउ वासलक्खं पालिय खालिय समत्थकम्ममलं ।**
**मासियभत्तेण सएहं नवहिं साहूण परियरिओ ॥३२॥**
**बहुलाए तेरसीए जिट्ठे सम्मेय पव्वए सामि ।**
**सासयसोक्खं मोक्खं गय जिण ! वल्लहपयं देसु ॥३३॥** युग्गम् ॥

सर्वायुर्वर्षलक्षं पालयित्वा, क्षालयित्वा-क्षपयित्वा समस्तकर्ममलं घात्य-घातिकर्मकस्मलं, मासिकभक्तेन-मासक्षपणेन, शतैर्नवभिः साधूनां परिकरितो नवशतसाधुपरिवार इत्यर्थः ॥३२॥

बहुलायां-कृष्णायां त्रयोदश्यां ज्येष्ठे मासि सम्मेतपर्वते हे स्वामिन्! हे गत-प्रासक! शाश्वतं सौख्यं यत्र एवंविधं मोक्षं-सिद्धस्थानं हे जिन! वल्लभपदं प्रस्तावान्मोक्षं देहि ममेति शेषः । अत्र जिनवल्लभ इति कविनामन्यास इति गाथा द्वयार्थः ॥३३॥

***साधुसोम**गणीशेनाऽक्लेशेनार्थप्रबोधिनी ।*
श्रीशान्तिचरिते चक्रे वृत्तिश्चित्तप्रमोदिनी ॥१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३. श्रीपार्श्वनाथचरित्रम् ॥

अथ कुपथकदलीकदम्बकमथहस्तिनाथस्य श्रीपार्श्वनाथस्य चरित्रं विधीयते तस्य चेत्थं प्रथमगाथामाहुः-

**गुणमणिनिहिणो जस्सुवरि फणिफणा रक्खगा इव फुरंति ।**
**तं पासजिणं पणमिय तस्सेव थुणामि चरियलवं ॥१॥**

व्याख्या - गुणा एव मणयस्तेषां निधेर्निधानस्य यस्य भगवत उपरि-मस्तकस्योपरि फणिनो धरणेन्द्रस्य फणाः स्फुरन्ति शोभन्ते । तथा चाहुः-

स्वप्ने सप्तफणं ददर्श जननी यत्रोरगं गर्भगे,
मूर्ध्न्याध्याज्जलवर्षणा फणिपतिः छत्रं सहस्रस्फुटं ।
तापोऽच्छादविधो तदेव नवभिस्तत्यंवभिः क्रीडने (?),
यस्याऽसौ त्वरितं ददात्वभिमतं श्रीपार्श्वनाथः प्रभुः ॥१॥ [शार्दूल०]

इति उत्प्रेक्षते रक्षका इव-रक्षपाला इव । किल निधेरुपरि रक्षपालाः सर्पाः स्फुरन्ति । तं पार्श्वजिनं प्रणम्य प्रकर्षेण नत्वा, तत्राऽस्मिन् भगवति गर्भगते सति शयनस्थिता जननी तमसि सर्पन्तं कृष्णसर्पं पश्यति स्मेति पार्श्वः । तं पार्श्वनाथं प्रणम्य तस्यैव श्रीपार्श्वनाथस्य स्तौमि चरितलवं-चरित्रलेशमिति गाथार्थः ॥१॥

अथ प्रतिज्ञातमेव प्रतन्वन्तः प्राहुः-

**पणयकप्पे अत्थिय वीसं अयरोवमे इहाऽऽइण्णो ।**
**वाणारसीए तं जिण ! कसिणचउत्थीए चेत्तम्मि ॥२॥**

हे जिन ! त्वं प्राणतकल्पे-प्राणतदेवलोके, विंशतिसागरोपमाणि 'अत्थिय'त्ति अवस्थाय-स्थित्वा, इह भारते अवतीर्णः वाणारस्यां नगर्यां, कदा ? चैत्रे मासे कृष्णचतुर्थ्यां, चतुर्दशस्वप्नलाभादिषु सत्सु । एतेन गर्भावतारकल्याणकमुक्तमिति गाथार्थः ॥२॥ अथ जन्मकल्याणकमाहुः-

**पोसेऽसियदसमीए कासवगोत्तो तुलम्मि रासिम्मि ।**
**वम्माऽससेणमणपिय पियंगुवन्नो तमुपन्नो ॥३॥**

पोषस्य मासस्य असितायां कृष्णायां दशम्यां, काश्यपगोत्रः, तुलायां राशौ, हे वामाऽश्वशेनयोर्मनःप्रिय ! तत्र वामा राज्ञी, अश्वसेनो राजा तयोर्माता-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पित्रोर्मनसः प्रियोऽभीष्टस्तत् सम्बोधनं, त्वं प्रियङ्गुवर्ण उत्पन्नो-जात इति गाथार्थः ॥३॥ अथ गृहवासस्थितिकालमानं भणन्ति-

**वितिमिरतिनाणनयणो नवहत्थपसत्थलक्खणसरीरो ।**

**वसिओऽसि तीसवरिसे कुमरत्ते रज्जसुहविमुहो ॥४॥**

वितिमिराणि-निर्मलानि त्रीणि ज्ञानानि-मति-श्रुता-ऽवधिलक्षणानि नयनानि-लोचनानि इव यस्य स वितिमिरत्रिज्ञाननयनः । तथा नवहस्तं-नवहस्तप्रमाणं प्रशस्तलक्षणं-सामुद्रिकानुसारिसाष्टसहस्रलक्षणोपेतं शरीरं यस्य स । तथा एवं विभो ! त्वं उषतोऽसि त्रिशतवर्षान् कुमारत्वे राजस्य सुखे विमुखः-पराङ्मुख इति गाथार्थः ॥४॥

अथ भगवतः परमकारुणिकतां कथयन्ति-

**मुणिय वि नियमावयं कुपहमोहमहणाय सयलजणपुरओ ।**

**कमठं धरिसि तु फुडं होसि तुमं परमकारुणिओ ॥५॥**

'मुणिय'त्ति ज्ञात्वा 'ज्ञो जाण-मुणाविति मुणादेशः' अपेर्गदम्यमानत्वात् ज्ञात्वाऽपि विदित्वाऽपि, निजां आपदं कमठकृतमहाजलोपसर्गसंसर्गरूपां, कुपथे-कुमार्गे कमठमुनिविधीयमानपञ्चाग्निसाधनालक्षणे यो मोहो जनानां विपरीतज्ञानं सुमार्गताऽपरिज्ञानरूपं तस्य मथनाय-निराकरणार्थं न तु द्वेषात् कमठं तापसं धर्षित्वा अज्ञानिनं प्रकाश्य ज्वलन्तपन्नगप्रकाशनपूर्वं कमठतपसो दुष्टत्वं स्पष्टयित्वेत्यर्थः । स्फुटं-प्रकटं, 'होसि'त्ति अभवस्त्वं परमकारुणिकः ।

एतदर्थप्रकाशिका भगवतः स्तुतिश्च-

वह्निज्वालाऽवलीढं कुमथमथनधीर्मातुरस्तोकलोक-
स्याऽग्रे सन्दर्श्य नागं कमठमुनितपः स्पष्टयन् दुष्टमुच्चैः ।
यः कारुण्याऽमृताऽब्धिर्विधुरमपि किल त्वस्य सद्यः प्रपद्य,
प्राज्ञैः कार्यं कुमार्गस्खलनमिति जगादेव देवं स्तुमस्तम् ॥१॥ [स्रग्धरा]

इति गाथार्थः ॥५॥

अथ दिक्षाकल्याणकं छद्मस्थपर्यायप्रमाणं चाहुः-

**सिवियाए विसालाए, आसमपयवणे असोगतले ।**

**पोसबहुलक्कारसि पुव्वण्हे अट्ठमतवेण ॥६॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**निवतिसयजुओ पढमे वयम्मि पव्वइय एगदूसेण ।**
**चुलसीइ क्षिणे चउनाण संजुओ विहरिओ तं सि ॥७॥** युग्मम् ॥

शिबिकायां विशालानाम्न्यां, आरूढ इति शेषः, आश्रमपदनाम्नि वने-उद्याने, अशोकतरोस्तले, **पौषे** मासे, बहुलैकादश्यां-कृष्णैकादशीदिने पूर्वाह्ने प्रथमपौरुष्यां, अष्टमेनोपवासत्रयरूपेण तपसा नृपाणां त्रिभिः शतैर्युतः-सहितः, नृपविशेषयुतः, प्रथमे वयसि-कौमारे प्रव्रज्य-दीक्षां प्रतिपद्य, एकेन देवदूष्येणालङ्कृतः, व्रताऽनन्तरः चतुरशीतिं दिनान् यावच्चतुर्ज्ञानसंयुतस्त्वं विहृतोऽसि इति गाथा द्वयार्थः ॥६-७॥ अथ प्रथमपारणकस्वरूपमाहुः-

**पव्वज्जाबीयदिणे कोयगगडपुरम्मि पायसेण तुमं ।**
**पाराविं तस्स फुडं जायं धन्नस्स धन्नत्तं ॥८॥**

प्रव्रज्यातो द्वितीयदिने कौतुककृतपुरे पायसेन परमान्नेन त्वां पारयतो धन्यस्य-धन्यनाम्नो **धन्यत्वं**-सुकृतित्वं स्फुटं-प्रकटं जातं लोके इति शेष, इति गाथार्थः ॥८॥ अथ **केवलज्ञा**नोत्पत्तिस्वरूपं प्ररूपयन्ति-

**अह अट्ठमभत्तंते पुव्वह्ने किण्हचित्तचोत्थीए ।**
**उप्पन्नं धायइतरुतलम्मि तुह केवलं नाणं ॥९॥**

अथेति दीक्षातश्चतुरशीतिदिनान्तरं अष्टमभक्ताऽन्ते मतान्तरे षष्टभक्ताऽन्ते इत्यपि पूर्वाह्ने-प्रथमपौरूष्यां, कृष्णायां चैत्रचतुर्थ्यां, उत्पन्नं-सञ्जातं, धातकीतरुतले तव केवलज्ञानं अप्रतिपात्यनन्तवस्तुविषयं ज्ञानमिति गाथार्थः ॥९॥ अथ चतुर्विधसङ्घस्य स्वरूपं प्राहुः-

**तो साहुण सहस्से सोलस ते साहुणीणं अडतीसं ।**
**चउसट्ठिमेगलक्खं सम्मवयड्ढाण सड्ढाण ॥१०॥**

**जिणमयभाविय साविय लक्खतिगं सत्तवीससहसजुयं ।**
**तुममिय चउविहतित्थं अकासि भवजलहि बोहित्थं ॥११॥** युग्मम् ॥

श्रीपार्श्वनाथस्य श्रीआवश्यकादौ-दशगणधरा गच्छाश्च श्रीस्थानाङ्गे-त्वष्टौ । तत्र द्वावल्पायुष्कत्वान्नोक्ताविति वृद्धाः । इदं वाऽत्र स्वयमभ्यूह्यन्त नः केवलोत्पत्तेस्तु साधूनां आर्यदिन्नप्रमुखाणां सहस्राः षोडश । ते सहस्राः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

साध्वीनां पुष्पचूलाप्रमुखाणां अष्टत्रिंशत् सङ्ख्याः । चतुःषष्टिसहस्रा इत्यनुवर्तते एकं च लक्ष चतुःषष्टिसहस्राधिकं लक्षमेकमित्यर्थः (१६४०००) सम्यक्त्व-प्रधानैर्व्रतैराढ्यानां श्राद्धानां सुव्रतादीनां, 'सम्मवियट्टाण' इति पाठे सम्यग्विद-ग्धानाम् ॥१०॥

जिनमतेन भावितानां-वासितानां श्राविकानां सुनन्दाप्रमुखाणां लक्षत्रिकं सप्तविंशतिसहस्रयुतं (३२७०००) इति चतुर्विधं तीर्थं-सङ्घं त्वमकार्षीः । कथम्भूतं तीर्थं ? भवजलाब्धौ बोहित्थं-प्रवहणमिति गाथा द्वयार्थः ॥११॥

अथ तत्रैव विशेषमाहुः-

**अद्धुठसया चउदसपुव्वीणं चउगुणोहिनाणीणं ।**
**वाईणच्छस्सया णुत्तरोववाईण ते दुगुणा ॥१२॥**
**केवलिजिणाणं दस विउलमइजिणाणं तु सत्त सद्धाणि ।**
**वेउव्वीणिक्कारस सयाणि तुह सुमुणिपरिवारो ॥१३॥** युग्मम् ॥

अद्धुठसया इति सार्द्धानि त्रीणिशतानि चतुर्दशपूर्विणाम् । चतुरगुणानि-चतुर्दशशतानि (१४००) इत्यर्थः अवधिज्ञानिनाम् । तथा वादिनां षट्शतानि, ते च वादे देवैरप्यजेया ज्ञेयाः । तथाऽनुत्तरोपपातिनां तानि षट्शतानि द्विगुणानि-द्वादशशतानीत्यर्थः ॥१२॥

केवलिजिनानां दशशतानि । शतानीति सर्वत्र योगः । विपुलमतिजिनानां-मनःपर्यवज्ञानिनां तु सप्तशतानि सार्द्धानि (७५०) । तथा वैक्रियलब्धिवतां एकादशशतानि । तव सुमुनीनां प्रधानसाधूनां परिवारोऽभूदिति शेष इति गाथार्थः ॥१३॥ अथाऽपश्चिमं मोक्षकल्याणकं भणन्ति-

**रायपसेणइ पणमिय विसाहरिक्खभव पंचकल्लाण ! ।**
**वरिससयाउ य तित्तीसमुणिजुओ दिवसपुव्वद्धे ॥१४॥**
**वाघारियपाणी मासिएण सावणसियट्ठमीए तुम ।**
**सम्मेयपव्वए जिणवल्लह सिवसोक्ख पत्त जय ॥१५॥** युगलकम् ॥

हे राजप्रसेनजित्प्रणमित ! एतदुपलक्षितौ तीर्थविघ्नहरौ यक्ष-यक्षिण्यौ ज्ञेयौ । तयोः स्वरूपं यथा-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मातुलिङ्ग-गदायुक्तौ बिभ्राणौ दक्षिणौ करौ ।
वामौ नकुलसर्पाङ्कौ कुर्माङ्कः कुञ्जराननः ॥१॥
मूर्ध्नि फणिफणछत्रो यक्षः पार्श्वोऽसितद्युतिः ।
तथा पार्श्वप्रभोः पद्मावती शासनदेवता ॥२॥
स्वर्णाभा पद्म-शङ्खाङ्कौ दक्षिणौ बिभ्रति भुजौ ।
वामौ फलाङ्कुशधरौ कुर्कुटोरगवाहना ॥३॥' इति ।

सूत्रे चाऽनयोरनुपादानं संक्षेपचरितत्वात् सूत्रकार-स्थितेर्विचित्रत्वात् वेति मन्तव्यम् । तथा विशाखारुक्षे भव उत्पत्तिर्येषां एवंविधानि पञ्च कल्याणानि यस्य स तथा तत्सम्बोधनम् । तथा वर्षशतायुः त्रयस्त्रिंशत्मुनिभिर्युतः दिवसस्य पूर्वार्द्धे, व्याधारितपाणिः-प्रलम्बितभुजः कायोत्सर्गस्थ इत्यर्थः, मासिकेन तपसा-मासक्षपणेन, श्रावणशुक्लाष्टम्यां त्वं सम्मेतपर्वते हे जिन ! हे वल्लभ ! सिवसौख्य प्राप्तः । जय-सर्वोत्कर्षेण वर्तस्व । 'जिनवल्लभ' इति कवेर्नाम इति गाथाद्वयार्थः ॥१४-१५॥

**साधुसोम**गणीशेनाऽक्लेशेनार्थप्रबोधिनी ।
श्रीपार्श्वचरिते चक्रे वृत्तिश्चित्तप्रमोदिनी ॥१॥

● ● ●

## ४. श्रीमहावीरस्वामिचरित्रम् ॥

वर्द्धयतु वर्द्धमानः श्री**सिद्धान्तरुचि**वाचको वाचम् ।
चित्तचमत्कृतिचतुरं चतुरनराणां वचो यस्य ॥१॥

अथ क्रमप्राप्तं पञ्चमं श्रीतीर्थाधिपतेः श्रीमहावीरदेवस्य चरित्रं व्याख्यायते तस्येदमादिकाव्यं-

**दुरियरयसमीरं मोहपंकोहनीरं,**
**पणमिय जिणवीरं निज्जियाणंगवीरं ।**
**भवभडपडिकूलं तस्स मुक्खाणुकूलं,**
**चरियमिह समूलं किंचि कित्तेमि थूलं ॥१॥** [मालिनी]

व्याख्या :-कीर्तयामि-कथयामि कः कर्ता ? अहं, किं कर्मतापन्नं ? चरितं,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किं कृत्वा ? प्रणम्य-प्रकर्षेण नत्वा, कं ?-जिनं वीरं-महावीरं, कथं भूतं-श्रीवीरं ?-दुरितमेव रजस्तत्र समीरः, तथा मोहपङ्कस्य ओघः-समूहः तत्र नीरं, पुनः कथम्भूतं ? निर्जितानङ्गवीरं जितमदनसुभटं, कस्य तच्चरितं ? तस्यैव श्रीमहावीरस्य, कथम्भूतं चरितं ? भवभटप्रतिकूलं, यतः-पुण्यपवित्रश्रीजिनचरित्रश्रवण-स्मरण-धारण-निगरणादिभि-र्भवभटभङ्गः स्यादिति । तथा चाहुः-

'चिरसंचियपावपणासणाए, भवसयसहस्समहणीए ।
चउवीसजिणिंदविणिग्गयकहाए वोलंतु मे दीअहा ॥' [श्राद्धप्रतिक्रमणसूत्र-४६]

अत एव मोक्षानुकूलं, इह जगति कथं कीर्तयामीत्याह समूलं-सहमूलेन वर्तते समूलं, श्रुतानुसारेणेत्यर्थः, सम्यक्त्वप्राप्ति हेतोर्भवादारभ्येति वाऽर्थः । किं तत् समस्तं कीर्तयिष्यते ?,-नेत्याऽऽह- स्थूलं-अतिप्रसिद्धभवानुगतमित्यर्थः । तदपि किं सर्वं वक्ष्यते ?-नेत्याह किञ्चित्-स्वल्पमेवेत्यक्षरयोजना, वाक्यार्थस्तु यथा- दुरितरजःसमीरं मोहपङ्कौघनीरं निर्जितानङ्गवीरं श्रीमहावीरं प्रणम्य तस्यैव श्रीमहावीरस्य भवभटप्रतिकूलं तथा मोक्षानुकूलं चरितं इह जगति समूलं यथा स्थात् तथा किञ्चित् स्थूलं अहं कीर्तयामीति । इदं मालिनी छन्दः, इति प्रथमकाव्यार्थः ॥१॥ अथ तदेव श्रीवीरचरितप्रपञ्चं प्राहुः-

**किर गामचिंतगभवे सम्मत्तं लहिय रहिय सोहम्मे ।**
**चविउं भविउं मरीई लइउं चइउं च चरणभरं ॥२॥**

**उस्सुत्तलेसदेसणकयसागरकोडिकोडिभवभमणो ।**
**तह पढमवासुदेवो भविय तिवट्ठू जिणुद्दिट्ठो ॥३॥**

**संसरिय भवे जाओ अवरविदेहम्मि मूयनयरीए ।**
**धारिणि-धणंजयसुओ पियमित्तो नाम चक्कहरो ॥४॥**

**तुडियंगाऊ पालिय पव्वज्जं वासकोडिमुववन्नो ।**
**महसुक्के परमाऊ सव्वट्ठवरविमाणम्मि ॥५॥**

**तो जंबुदीवभरहे भद्दो जियसत्तुरायअंगरुहो ।**
**छत्तग्गाइ पुरीए अहेसि तं नंदणो राया ॥६॥** पञ्चभिः कलापकम् ॥

किलेत्याप्तोक्तौ, हे देव ! नयसारनाम ग्रामचिन्तकभवे सम्यक्त्वं लब्ध्वा,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सम्यक्त्वलाभश्चैवं अत्र जम्बूद्वीपे अपरविदेहेषु नयसारो ग्रामचिन्तकोऽन्यदा राजाज्ञया श्रेष्टकाष्टोपलब्धये महाऽरण्ये जगाम तत्र सार्थभ्रष्टान् तृष्णा-क्षुधाऽऽतुरान् मुनीन् सम्प्राप्तान् पासुकाऽन्नपानैः प्रत्यलाभयत् । मुनिभिश्च योग्यतां मत्वाऽस्याऽग्रे धर्मदेशना कृता । तया चाऽस्य प्रथमो बोधिलाभोऽजनि तेन साधवश्च मार्गेऽवतारिताः, स्वगच्छं प्राप्ताः, सोऽपि स्वस्थानं गतः । साधु-सन्दिष्टधर्मकर्मरतः स्वायुः प्रपाल्य, ततो 'रहिय सोहम्मे'त्ति, सौधर्मे कल्पे पल्योपमस्थितिर्देवो भूत्वा इत्यर्थः ।

ततः 'चविउं'ति च्युत्वा, 'भविउं मरिई'त्ति तृतीये भवे श्रीऋषभप्रभोः पुत्रस्य भरतचक्रिणः पुत्रो मरिचिर्भूत्वा, समये श्रीयुगादिदेवपादान्ते, 'लइउं' लात्वा, 'चरणभरं' चारित्रं प्रतिपाल्य, ततश्चारित्राऽऽवरणोदयात् परीषहान् सोढुमसहिष्णुः 'चइउं च चरणभरं' त्यक्त्वा च चारित्रं, सर्वथा व्रतत्यागे त्रपा स्यात् ततो दर्शनान्तरं करोमीति ध्यात्वा त्रिदण्डित्वं श्रितः श्रीयुगादिदेव-परीवारपार्श्ववर्ती तिष्ठति । अन्यदा श्रीभरतो भगवन्तं 'अस्यामवसर्प्पिण्यां भावी तीर्थकृतो जीवः कोप्यत्र पर्षदि विद्यते ?' इति प्रपच्छ । प्रभुः प्राह-'मरीचिस्त-वाङ्गजोऽत्र भरते पोतनपुरे श्रीश्रेयांसतीर्थकृत्तीर्थे त्रिपृष्टः प्रथमो वासुदेवो भूत्वा, महाविदेहे मूकानगर्यां चक्रवर्ती च भूत्वा, अत्रैव भरते क्षत्रियकुण्डग्रामे चतुर्विंशस्तीर्थङ्करः श्रीवर्धमानो भविष्यतीति' । ततः प्रभुमनुज्ञाप्य च मरीचेरन्तिकं चक्री प्रभूक्तं प्रकटीकृत्य प्राह-'हंहो मरीचे ! त्वमत्र भरते चरमस्तीर्थकृत् भावी, ततस्त्वां वन्दे न पुनस्ते पारिव्राज्यमि'त्युक्त्वा तं त्रिः प्रदक्षिणीकृत्य ववन्दे, भरतो भूयः प्रभुं नत्वा पुरीं ययौ । अथ मदवीचिवान् मरीचिर्भुजावास्फोट्य प्रोवाच-अत्राऽर्द्धचक्री प्रथमोऽहं भविष्यामि, विदेहेप्यहं चक्री, अत्राऽर्हत्चाऽपश्चिमोऽहं भविष्यामि । तथा पितामहो मे प्रथमोऽर्हन्, पिता मे प्रथमश्चक्रीति 'ममाहो ! कुलमुत्तमं ममाहो ! कुलमुत्तममिति' मदं कुर्वन् नीचैर्गोत्रं कर्मोपार्जयत् । अन्यदाऽसौ विधिवशाद् व्याधिबाधितश्चिन्तयति स्म-'अमुना व्याधिना मुक्तोऽहं कञ्चन प्रतिचारकं शिष्यं करिष्यामीति' । ततो नीरोगेण तेन कपिलो राजपुत्रकोऽन्यदा साधुधर्मं श्रावितः परं नाङ्गीचकार, प्रत्युत वदतीदं 'यद्ययं धर्मः श्रेयांस्तर्हि त्वं किं न करोषि ?' मरीचिराऽऽह-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'पापोऽहं'। 'तर्हि किं भवद्दर्शने नाऽऽस्त्येव धर्मः ?,' तदा च 'वरं मे सहायोऽयमेव भूयादिति' बुध्या-'तत्राऽपि धर्मोऽस्ति, मम मतेऽपि किञ्चित् धर्मोऽस्ती'त्यनेनोत्सूत्रलेशदर्शनेन कृतमुपार्जितं सागरोपमकोटाकोटिर्भवे संसारे भ्रमणं-पर्यटनं येन स तथा। 'तह' इति 'तथा' शब्दोऽत्रानुक्ताऽन्तरभव-समुच्चयार्थः ते चैवं-मरीचिश्चतुरशीति पूर्वलक्षायुः समये मृत्वा, चतुर्थे भवे ब्रह्मलोके दशसागरोपमायुर्देवोऽभवत्। ततश्च्युत्वा, कोल्लाकसन्निवेशे कौशिकाभिधः विप्रोऽशीतिपूर्वलक्षायुः प्रान्ते त्रिदण्डित्वं श्रित्वा, मृत्वा, भ्रान्त्वा च भूरिभवं तिर्यग्-नर-नारका-ऽमरभूरिभवान्, ततः स्थूणसन्निवेशे पुष्पमित्रा-ऽऽख्यो द्वयसप्ततिपूर्वलक्षायुर्द्विजोऽजनि। स प्रान्ते त्रिदण्डित्वेन मृत्वा मध्यमायुः सौधर्मसुरोऽभूत्। ततश्च्यूतश्चैत्याख्ये सन्निवेशेऽग्न्युद्योतो द्विजश्चतुःषष्टि-पूर्वलक्षायुः प्रान्ते त्रिदण्डत्वेन मृत्वा ईशाने कल्पे मध्यमायुर्देवोऽभूत्। ततश्च्युतो मन्दिराख्यो सन्निवेशे षट्पञ्चाशत् पूर्वलक्षायुरग्निभूतिनामा द्विजः। प्रान्ते पारिव्रज्यं श्रितो, मृतः सनत्कुमारो कल्पे मध्यमायुः सुरोऽजनि। ततश्च्युत्वा श्वेतव्यां चतुश्चत्वारिंशत्पूर्वलक्षायुः द्विजः। प्रान्ते परिव्राट् भूत्वा, माहेन्द्रे कल्पे मध्यमायुरमरोऽभूत्। ततश्च्युत्वा भवं भ्रान्त्वा, राजगृहे चतुस्त्रिंशत् पूर्वलक्षायुः स्थावराख्यो द्विजो। प्रान्ते वयसि त्रिदण्डीभूय, मृत्वा बह्मलोके मध्यमायुर्देवः। ततश्च्युत्वा बहून् भवान् बभ्राम।

इतश्च राजगृहेश्वरो विश्वानन्दी राजाऽऽसीत्। तत्पुत्रो विशाखानन्दीनामा। अस्य राज्ञोऽनुजो विशाखाभूतिर्युवराजः। तस्य प्रिया धारिणी तयोस्तनयो विश्वभूतिर्जातो मरीचिजीवः। क्रमात् प्राप्तयौवनः पुष्पकरण्डके वने स्वान्तः-पुरपुरन्ध्रीभिः सार्द्धं साक्षात् स्मर इव क्रीडते। अन्यदा विशाखानन्द्यपि क्रीडनेच्छया तद्वनं ययौ। वनान्तर्वर्तमानं विश्वभूतिं मत्वा, वनाद् बहिः कृतावासो राजकुमारो राज्ञै न्यवेद्य, ततो राजा तदीप्सितकृते मायया सभामध्ये इत्यवादीत्-'पुरुषसिंहोऽस्मदाज्ञामन्योऽपि सम्प्रति न मन्यते तं जेतुं यामः।' इति यात्राभेरीमवादयत्। ततो विश्वभूतिरेतन्निशम्य क्रीडावनादागत्य नृपं निवार्यार्यस्तज्जायाशया स्वयं प्रयाणं चक्रे। यावत् प्राप्तः पुरुषसिंहं तं चाऽऽज्ञानुवर्तिनं ज्ञात्वा ववले। आगत्य भूपतये तद्दत्तं प्राभृतं चाऽर्पयत्। तत

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रामाभिः समं रिरंसुः पुष्पकरण्डकमगात् । विशाखानन्दी मध्येऽस्तीति द्वास्थवचनात् मत्वा 'मायिभिर्माययैवाऽहं क्रीडवनात् निष्कासित' इति ध्यात्वा क्रुधा कपित्थं मुष्ट्या प्राहरत् । पतितां तत्फलश्रेणीं द्वास्थस्य दर्शयित्वोक्तं-'एवं मायिनां मौलीन्यपि पातयामि, परं ज्येष्ठतातचरणे भक्तिरत्र प्रत्यूहकारिणी ।' 'अथ भोगैर्ममाऽलं यैरीदृग् बन्धुवञ्चना क्रियते ।' इत्युक्त्वा, स्वयम्भूति-मुनिपार्श्वे गत्वा प्राव्रजीत् । ततो विश्वभूतिर्गीतार्थो गुर्वनुज्ञया तपः कृशवपु-र्मथुरापुरीं प्राप्तः । तदा विशाखानन्द्यपि तन्नृपात्मजामुद्वोढुं तत्राऽगात् । मासक्षपणपारणे विश्वभूतिः पुरीं प्राविशत् । विशाखानन्दिसैनिकैः स्वस्वामिनः प्रदर्शितः । तदैवैकया गवा सङ्घटितो विश्वभूतिस्तपःकृशो भूमौ पपात । तदा विशाखानन्दिसैनिकैः 'कृतं क्व ते कपित्थपातस्थाम ?' तं प्रत्यगादिति । बाढं हास्यकोलाहलं श्रुत्वा क्रोधोत्तालाऽऽकृतिर्यतिर्गां श्रृङ्गाभ्यां गृहीत्वोर्ध्वं भ्रामयित्वेदमवादीत्-'अरे ! प्रभुतोन्मदा भवन्तस्तपःस्थं मामेवमुपहसन्ति ! ततोऽमुना तपसा युष्मत्प्रभोर्विशाखानन्दिनो मृत्युत्वे भवान्तरे भूरिबलो भूयासमिति' कृतनिदानः अन्यत्र विहरन् कोटिर्वर्षायुर्मृत्वा, मुनिर्महाशुक्रे कल्पे उत्कृष्टायुः सुरोऽभवदिति भवाः सप्तदशः । इति तथाशब्देन सङ्ग्रहीतमुक्तम् ।

'पढमवासुदेवो भविय तिविट्ठु जिणुदिदट्ठो' त्ति-ततश्च्युतः पोतनपुरे प्रजापति-मृगावत्योः पुत्रः प्रथमो वासुदेवो, जिनेन श्रीयुगादिदेवेनोद्दिष्टो-भरताय निवेदितः, वपुषि त्रयः पृष्टकरण्डा आसन्निति त्रिपृष्टनामा भूत्वा, शङ्खपुराऽऽसन्ने तुङ्गाऽऽह्वे पर्वते गुहागतं विशाखानन्दिजीवं आसन्नशालिक्षेत्रकर्षकात् समाकर्षी, खण्डद्वयं विधाय हेलयैव हतवान् सिंहस्तथा कृतोऽपि क्रोधान् यावत् प्राणान्न त्यजति तावत्त्रिपृष्टस्य सारथिना गणभृद्गौतमजीवेनाऽऽश्वासितो मृत्वा चतुर्थं नरकं गतः । त्रिपृष्टोऽपि सुखेन त्रिखण्डान् भुञ्जन् श्रीश्रेयांसतीर्थकृत्पार्श्वे सम्यक्त्वं पुनः प्राप्तवान् । अन्यदा 'मयि शयिते एते गायका गायन्तो वार्याः' इति शय्यापालकमादिश्य सुप्तो हरिः । तेषु गायत्स्वेव प्रबुद्धश्च शय्यापालं जगौ-'किं नामाऽविसृष्टाः ?' सोऽवदत्-'वर्णसुखदा इति' । ततः क्रुधा तस्यकर्णयोः केशवस्तप्तत्रपुःक्षेपमकारयत् ।, तल्पपालो ममार । इत्याद्युग्रं कर्म बध्वा, त्रिपृष्टश्चतुरशीतिवर्षलक्षायुर्मृतो ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नारकः सप्तमाऽवन्यां जातः । तत उद्धृत्य सिंहोऽजनि । ततश्चतुर्थं नरकं गतः । तत उद्धृत्य बहून् तिर्यग्-मनुष्यभवान् भ्रान्त इति ।

अमुमेवाऽर्थमाह 'संसरिय भवि'त्ति संसृत्य-भ्रान्त्वा, भवे-संसारे नरकादि गतिषु, ततस्त्वं जातः-समुत्पन्नः अपरविदेहे मूकानगर्यां धारिणी पट्टमहादेवी धनञ्जयो राजा तयोः सुतः प्रियमित्रनामा चक्रधरः । किदृगित्याह-त्रुटिताङ्गं सर्वायुर्यस्याऽसौ तथाविधः सन् चतुरशीतिपूर्वलक्षायुरित्यर्थः त्रुटिताङ्गे वर्षमानं यथा-

अउणसट्ठिसयसहस्सा सत्तावीसं भवे सहस्साइं ।
चत्तारिकोडाकोडी तुडीयंगे वरिसमाणमिणं ॥१॥

[गाथासहस्त्री-२५१/देवेन्द्रनरकेन्द्रप्रकरणम्-१६८]

५९२७०४ शून्य-१५ इत्यङ्काः । पालयित्वा प्रव्रज्यां वर्षकोटिं यावत् । त्वमुत्पन्नो महाशुक्रे कल्पे सर्वार्थनाम्नि प्रधानविमाने परमायुः-सप्तदश-सागरोपमायुरित्यर्थः ।

ततो जम्बूद्वीपभरते भद्रा राज्ञी जितशत्रू राजा, तयोः अङ्गरुहः-पुत्रः, छत्राग्रायां पुर्यां आसीस्त्वं नन्दनो राजा । इति गाथापञ्चकार्थः ॥२-६॥

तस्मिंश्च भवे-

**चउवीसवासलक्खे वसिय गिहे सुगुरुपोट्टिलसमीवे ।**
**निक्खमिय वासलक्ख खविय सया मासखमणेहिं ॥७॥**
**असयं सेविय वीसं ठाणे अज्जिणिय तित्थरनामं ।**
**वीसयराऊ जाओ पाणयपुप्फुत्तरे देवो ॥८॥** युग्मम् ॥

चतुर्विंशतिवर्षलक्षान् उषित्वा गृहे सुगुरोः पोट्टिलाचार्यस्य समीपे निष्क्रम्य दीक्षां लात्वा वर्षलक्षं सदा मासक्षपणैः क्षपयित्वाऽतिवाह्य तत्र च-

'एगारलक्ख एगसट्ठिसहस्स दो य सय नउय सदिवसा ।
वीरस्स नंदणभवे खमणाणि य तह य पारणया ॥१॥'

ततच्चेत्थमवसेयं-वर्षलक्षस्य दिनानयनाय वर्षदिवसैः-३६० गुण्यते लक्षः । जातं ३६००००००। ततो मासक्षपणदिन-३०, पारणकदिन-१, एवं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दिन ३१ । भागः पात्यते । ततो यथाङ्कं, गाथाभणितमायाति-११६१२९० । अपश्चिममासक्षपणे दिनानि ४० सम्भाव्यन्ते एतावति मासक्षपणानि, एतावन्त्येव पारणानि भवन्तीति ॥८॥

तथा असकृत्-वारं वारं सेवित्वा विंशतिस्थानानि, अर्जित्वा तीर्थङ्करनाम, यदुक्तं श्रीआवश्यके-

'अरहंत १ सिद्ध २ पवयण ३ गुरु ४ थेर ५ बहुस्सुए ६ तवस्सीसु ७ ।
वच्छल्लया य एसिं अभिक्खनाणोवओगो य ८ ॥१॥
दंसण ९ विणए १० आवस्सए य ११ सीलव्वए निरइयारे १२ ।
खणलव १३ तव १४ च्चियाए १५ वेयावच्चे १६ समाही य १० ॥२॥
अपुव्वनाणगहणे १८ सुयभत्ती १९ पवयणपभावणया २० ।
एएहिं कारणेहिं तित्थयरत्तं लहइ जीवो ॥३॥' इति

[आवश्यकनिर्युक्ति-१७९, १८०, १८१]

अत्र गुरुश्चतुर्विधः-सम्यक्त्वगुरुः १ दीक्षागुरुः २ उपस्थापनागुरुः ३ श्रुतुगुरुः ४ । 'वच्छल्लये'त्ति अनुरागः यथावस्थितगुणोत्कीर्तनाद्यनुरूपया वच्छलतया । 'शीलव्वए'ति शीलान्युत्तरगुणाः, व्रतानि-मूलगुणास्तेषु निरतिचारः । 'खणलव'ति क्षणलवादिषु संवेगभावनाध्यानाऽऽसेवनां । 'च्चियाए'त्ति त्यागश्च यतिजने भेषजपथ्यादिदानम् । 'समाहि'त्ति समाधिर्गुर्वादिनां कार्यकरणद्वारेण स्वस्थता-ऽऽपादनम् । 'पवयणपभावणय'ति यथाशक्त्या मार्गदेशनादिभिः शासनौनत्य-सम्पादनं प्रवचनप्रभावना एभिः तीर्थङ्करत्वं बध्यते । शेषं स्पष्टम् । षष्टिवासराऽवशेषे स्वायुषि चाऽनशनं प्रतिपद्य, सर्वायुः पञ्चविंशतिवर्षलक्षाणि प्रतिपाल्य, विंशत्यतराणि सागरोपमाणि आयुर्यस्य स विंशत्यतरायुरेवंविधः प्राणतकल्पे पुष्पोत्तरे विमाने देवो जातः-समुत्पन्न इति गाथायुगलार्थः ॥८॥

अथ तत्रेतरसुरेभ्यो भावितीर्थङ्करसुराणां विशेषस्थितिं दर्शयन्ति-

**छम्मासवसेसो उ पुन्नखए मोहमिंति इयरसुरा ।**
**आसन्नपुन्नपुंजा तित्थयरसुरा उ दिप्पंति ॥९॥**

व्याख्या - इतरे सुराः षण्मासाऽवशेषायुषः पुण्यक्षये सति-देवभव-भोग्यकर्माऽल्पत्वे सति, मोहं - अन्यथाभावं—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'माल्यम्लानिः कल्पवृक्षप्रकम्पः,
श्री-ह्रीनाशो वाससां चोपरागः ।
दैन्यं तन्द्रा कामरागाङ्गभङ्गौ,
दृष्टेर्भ्रंशो वेपथुश्चाऽरतिश्च ॥१॥ [शालिनी]

इत्यादिरूपं 'इंति'त्ति यान्ति - प्राप्नुवन्ति । तीर्थङ्करसुराः पुनः आसन्नपुण्यपुञ्जाः आसन्नः पुण्यपुञ्जस्तीर्थङ्करकर्मोदयलक्षणो येषां ते तथा । दीपन्तेऽधिकं द्योतन्त इति गाथार्थः ॥९॥

अथ तीर्थकृत्भवे गर्भावतारं सविस्तारं प्ररूपयन्ति-

**माहणकुंडग्गामे अवयरिओ सियअसाढछट्ठीए ।**
**विप्पोसहदत्तगिहे देवाणंदाइउयरम्मि ॥१०॥**

ततः पुष्पोत्तरविमानच्च्यूतो नन्दनजीवो ब्राह्मणकुण्डग्रामे विप्रस्य ऋषभदत्तस्य गृहे गृहिण्या देवानन्दाया उदरे सितायां शुक्लायामाषाढषष्ठ्यां मरीचिभवकृतकुलमदेनाऽर्जितनीचैर्गोत्रकर्मोदयात् त्वमवतीर्णः समतार्षीः । तदा चोत्तरफाल्गुन्यां चन्द्रोऽभूत् । देवानन्दा चतुर्दशमहास्वप्नान् ददर्श । सा प्रातः पत्येऽवदत् । सोप्यद्भुतस्ते सुतो भावीत्याख्यदिति गाथार्थः ॥१०॥

अथ गर्भगते भगवति यद्वृत्तं महाश्चर्यं तदाहुः-

**अह बासीइ दिणंते चउदससुमिणेहिं इतजंतेहिं ।**
**हत्थुत्तरकयकल्लाणपणग ! अच्छरियचरिय ! तओ ॥११॥**
**जणनायनायखत्तियपसिद्धसिद्धत्थपत्थिवपियाए ।**
**चेडगनिवभगिणीए तिसलादेवीए कुच्छीए ॥१२॥**
**सक्कभणिएण हरिणेगमेसिणा गब्भविणमयं काउं ।**
**आसोयकिसणतेरसि निसाए तं नाह ! साहरिओ ॥१३॥** तिसृभिः कुल० ॥

व्याख्या - अथ गर्भाऽवतारात् द्व्यशीति (-८२) दिनान्ते चतुर्दशस्वप्नैः 'इतजंतेहिं'ति त्रिशलापेक्षया आगच्छद्भिर्मुखे प्रविशद्भिः, देवानन्दापेक्षया गच्छद्भिर्मुखान्निःक्रामद्भिः । हे हस्तोत्तराकृतकल्याणपञ्चक ! हस्त उत्तरो

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यस्या सा हस्तोत्तरा-उत्तरफाल्गुनी तस्यां कृतं कल्याणपञ्चकं येन स तथा तत्सम्बोधनम् । तथा वक्ष्यमाणगर्भाऽपहारादिलक्षणमाश्चर्यभूतं चरितं यस्य स तथा तत्सम्बोधनं हे आश्चर्यचरित ! ततस्तस्माद् देवानन्दोदरात् जने-लोके, ज्ञाता-विख्याता, जनज्ञातास्ते च ते ज्ञातवंशोद्भवाः क्षत्रियास्तेषु प्रसिद्धः सिद्धार्थपार्थिवः तस्य प्रियायाः, श्रीचेटकनृपभगिन्याः, त्रिशलादेव्याः कुक्षौ, शक्रभणितेनेन्द्रादिष्टेन हरेरिन्द्रस्य निगमं - आदेशमिषतीच्छतीत्येवं शीलो हरिणैगमेषी, पदात्यनीकाधिपतिर्देवविशेषः, तेन गर्भविनिमयं-गर्भपरावृत्तिं कृत्वा त्रिशलागर्भस्थां कन्यां देवानन्दोदरे क्षिप्त्वेत्यर्थः । अश्वयुक्कृष्णत्रयोदशीनिशायां हे नाथ ! त्वं संहृतः-प्रवेशित इति गाथात्रयार्थः ॥११-१३॥ अत्र भगवतो गर्भे संलीनताऽवस्थानं पित्रोः प्रीतये पुनः स्फुरणं आहुः-

'सत्तमम्मि मासे गब्भत्थो चेवभिग्गहं गिण्हे ।
नाहं समणो होहं अम्मा-पियरम्मि जीवंते ॥१॥' इत्यादिकं च वाच्यम् ॥

अथ जन्मकल्याणकमुच्यते-

**खत्तियकुंडग्गामे जाओ चित्तसियतेरसिनिद्धे ।**
**कासवगोत्तो कणगाभ कन्नरासीइ सीहंको ॥१४॥**

क्षत्रियकुण्डग्रामे चैत्रशुक्लत्रयोदशीनिशार्द्धे कन्याराशौ काश्यपगोत्रः कनकाभः-स्वर्णवर्णः सिंहाङ्कः-सिंहलाञ्छनस्त्वं जातो-गर्भान्निःक्रान्तो-जनित इति गाथार्थः ॥१४॥ अथ भगवतो नामकरणं दर्शयन्ति-

**जणचिंतामणि तुमए अवयन्ने रयण-जण-धण-कणेहिं ।**
**वड्डित्था नायकुलं ति वद्धमाणु त्ति तोसि फुडं ॥१५॥**

जनचिन्तामणौ त्वयि अवतीर्णे ज्ञातकुलं रत्न-जन-धन-धान्यैः अवर्द्धिष्ट इति हेतोर्मातृ-पितृदत्तः वर्द्धमानः इतिनामा त्वमसि स्फुटमिति गाथार्थः ॥१५॥

अथ भगवतो द्वितीयं देवैः कृतं नाम प्ररूपयन्ति-

**तं जम्ममज्जणखणम्मि सक्ककुवियप्पसंकुमुक्खणिउं ।**
**जेण महंतमवि गिरिमीरित्थ तओ महावीरो ॥१६॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्वं जन्ममज्जनक्षणे शक्रस्येन्द्रस्य कुविकल्पः 'कालयोगाल्लघुतनुरेष भगवान् सुरक्षिप्तस्नात्रजलानि कथं सहिष्यत ?' इत्येवंरूपः, स एव शङ्कुः कीलस्तमुत्खनितुं, येन कारणेन त्वं महान्तमपि गिरिमीरयामासिथ कम्पयामासिथ ततः कारणान्महावीर इति नामा देवैः कृतं व्युत्पत्तिपूर्वं महावीर इति नामेति गाथार्थः ॥१६॥

अत्राऽन्तरे न्यूनाष्टवर्षस्य भगवत आमलकीक्रीडायां सुराऽक्षोभ्यता, साग्राष्टवार्षिकस्य लेखशाला नयने स्वयमिन्द्राय व्याकरणनिरूपणा जैनेन्द्रव्याकरणोत्पादनं, यौवने च श्रीसमवीरस्य राज्ञः सुताया यशोदायाः पाणिग्रहणादिकं च प्रसिद्धत्वादुपेक्ष्य । अथ भगवतो गृहावस्थाने कारणमाहुः-

**पियरमरणे वि तं जिट्ठभाउवयणेण ठासि वासदुगं ।**
**गिहवासि च्चिय निरवज्जवित्तिणा नित्थियमुणि व्व ॥१७॥**

जन्मतः स्वामिनोऽष्टाविंशे वर्षे पित्रोर्मरणेऽपि जीवतोः पित्रोर्नाहं व्रतं गहीष्यामीत्यभिग्रहपूर्तावपीत्यपेर्थ्रः, त्वं ज्येष्ठस्य भ्रातुर्नन्दिवर्धननाम्नो वचनेन भ्रातुरुपरोधात् अष्टाविंशवर्षोपरि वर्षद्विकं गृहवासे एव निरतिचारया वृत्या निश्चितमुनिरिव-महामुनिवत् अस्था इति प्रथमाऽर्धान्ते क्रियया योग इति गाथार्थः ॥१७॥ अथ दीक्षाकल्याणं भणन्ति-

**सत्तकरदेह ! गेहम्मि अत्थीउं तीसवत्छरे कुमरो ।**
**लोगंतियतोरविओ संवच्छरमिच्छियं दाउं ॥१८॥**

**सुरनर-वइकयबहुविहजलन्हवणो सुरविलेवणविलित्तो ।**
**रुइरालंकारधरो चऊदेवनिकायसमणुगओ ॥१९॥**

**चंदप्पहसिवियाए मग्गसिरे कसिणदसमिअवरह्ने ।**
**पढमवए पव्वईओ छट्ठेणं नायसंडवणे ॥२०॥** तिसृभिः कुलकम् ॥

हे सप्तकरदेह ! त्वं गेहे, 'अत्थिउं'-अवस्थाय, त्रिंशद्वर्षाणि, अनादृतराज्यत्वात् कुमारः लोकान्ते भवैर्लोकान्तिकैर्देवैः

'सारस्सय १ माइच्चा २ वह्नी ३ वरुणा य ४ गद्दतोया य ५ ।
तुसिया ६ अव्वबाहा ७ अग्गिच्चा चेव ८ रिट्ठा य ९ ॥१॥ [ज्ञाताधर्मकथा-१-८]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति नामकैर्ब्रह्मलोके कृष्णराज्यन्तर्गतविमानवासिभिः, 'तोरविउ' - प्रोत्साहितस्ततस्त्रिंशत्तमे वर्षे संवत्सरं यावत् इप्सितं दानं दत्वा, तत्र च प्रतिदिनं-

'एगा हिरन्नकोडी अट्ठेव अणूणगा सयसहस्सा ।
सूरोदइमाईउं दिज्जइ जा पाउरा सा ओ ॥१॥

[आचाराङ्गः-११३/आवश्यकनिर्युक्तिः-२१७]

तथा च-'तिन्नेव य कोडिसया, अट्ठासीअं च हुंति कोडीओ ।
असीइं च सयसहस्सा एयं संवच्छरे दिन्नं ॥१॥ [आचाराङ्गः-११४]

एतच्च नियतं दानं, अनियतं तु धन-कनक-सुवर्ण-रत्न-मणि-गजाऽश्वादि यद् येन वाञ्छितं तस्मै तद् दत्तमपि । सुरनरपरिकृतबहुविधतीर्थजलस्नपनः सुरविलेपनविलिप्तः रुचिरालङ्कारधरः चतुर्भिर्देवानां निकायैः-समूहैर्भवनपति-व्यन्तर-ज्योतिष्क-वैमानिकलक्षणैः समनुगतः-परिवृतः चन्द्रप्रभानाम्न्यां शिबिकायां-सहस्रजनवाह्यविमानाकारराजवाहनविशेषे समारुढ इति गम्यं, तस्याः प्रमाणं तु-

'पन्नासं आयामा धणूणि विच्छिन्न वीसं तु ।
छत्तीस उच्छिट्ठा सीविया चंदप्पहा भणिया ॥१॥' [ ]

इति मार्गशीर्षे मासे कृष्णादशम्यां, अपराह्ने-चरमपौरुष्यां, प्रथमे वयसि-कौमारे, षष्टेन तपसा, ज्ञातखण्डनाम्नि वने, एकाकी त्वं, प्रव्रजितो-गृहस्थधर्मान्निर्गतः-श्रमणीभूत इति यावदिति गाथात्रयार्थः ॥१८-२०॥

तदा भगवतश्चतुर्थं मनःपर्यवज्ञानमुत्पन्नं-

यदुक्तं - तिहिं नाणेहिं समग्गा तित्थयरा जाव हुंति गिहवासे ।
पडिवन्नम्मि चरित्ते, चउणानी जाव छउमत्था ॥१॥ इति

[आवश्यकनिर्युक्तिः-११०]

ततो दीक्षा प्रतिपत्तिसमये इन्द्रेण वामस्कन्धार्पितं देवदूष्यं भगवांस्तदैवाऽतियाचमानाय पितृमित्राय सोमनाम्ने द्विजायाऽनुकम्पया स्फाटयित्वाऽर्धं ददौ । तदर्धं स्वामी हिंसाचरणधर्मव्यवस्थापनार्थं स्वांऽशदेश एवाऽस्थापयत् । ततो विहरतः प्रथमरात्रिवृत्तमाहुः-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कम्मारगामबाहिं वयपढमनिसाइ एइ किर सक्को ।**
**वारइ गोपं वागरइ निरुवसग्गं करे भंते ! ॥२१॥**

**तमणित्थिय तुह नित्थियमइणो विहरंति कुल्लयग्गामे ।**
**बलभवणे बीयदिणे पारणयं पायसेणऽसि ॥२२॥** युग्मम् ॥

कर्मारग्रामात् बहिः स्वामी व्रतस्य प्रथमनिशायां स्थितः तत्र 'एइ'त्ति - आगच्छति, किलेत्याप्रोक्तौ, शक्र इन्द्रः, वारयति दाम्ना प्रभुं जिघांसुं गोपालं व्याकरोति-विज्ञपयति-'भदन्त ! निरुपसर्गं करोमि द्वादशाब्दानि तवोपसर्गा भविष्यन्ति तान् सर्वान् वारयामीति' ॥२१॥

'तमणित्थिय'त्ति - तत् शक्रवचनं अनीष्ठित्वा-अमानयित्वा, 'अर्हन्तो हि श्रेयः प्राप्तौ कृतोद्यमा न क्वचित् साहाय्यमपेक्षन्त' इति तव निश्चितमतेर्विहरतः कोल्लाकग्रामे, बलनाम्ना ब्राह्मणस्य भवने आवश्यकादौ तु बहुलब्राह्मणगृहे इति, दिक्षादिनात् द्वितीय दिने प्रथमं पारणकं पायसेन परमान्नेन तवासीदिति । तच्च सपात्रधर्मप्रज्ञापनार्थं पात्र एव कृतवांस्ततः परं यावज्जीवं पाणिपात्रो भगवानित्याम्नाय इति गाथा द्वयार्थः ॥२२॥

अथानुकूल-प्रतिकूलोपसर्गान् भगवतः प्राहुः-

**सुरकयविलेवणाइ वि सहियचउमासिमासिते दुहयं ।**
**भमराइकइत्थण-तरुणपत्थण त्थीजणब्भत्थणओ ॥२३॥**

दीक्षाक्षणे सुरैर्देवैः कृतं विलेपनाद्यपि, ते-तव, साधिकां चतुर्मासीं यावत् दुःखदायकमासीत् । यद्विलेपनादिकं सुखकार्यायैव भवति, तदपीत्यपेरर्थः कुतो दुःखदायकमासीदिति, हेतुत्रयमाहुः-'भमराइकइत्थणे'त्यादि विलेपनसौरभा-कृष्टभ्रमरादिकदर्थनात्, ग्राम्यतरुणैस्तथाविधविलेपनप्रार्थनात्, तरुणस्त्रीजनेना-ऽभ्यर्थनाच्चेति गाथार्थः ॥२३॥

अथ साधिकमासाऽन्वितसंवत्सरादूर्ध्वं दक्षिणचावालाऽऽसन्नसुवर्ण-कूलानदीपुलिनवर्तितरुकण्टके विलग्य देवदूष्यार्धे पतिते भगवान् सिंहाव-लोकनेन तदद्राक्षीत् । ममत्वेनेत्यके, स्थण्डिले पतितमस्थण्डिले वेत्यन्ये, सहसाकारेणेत्यपरे, तत्कण्टकलग्नं दृष्ट्वा वृद्धवादेन भावः—स्वसन्ततेः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कषायबाहुल्यात् कण्टकप्रायतामाकलय्य निर्ममतया पुनर्न जग्राह, ततः परं भगवानचेलकोऽजनि । कण्टकलग्नं तत् तेनेव सोमद्विजेन लज्जाया पुनर्मार्गितुमशक्नुवता भगवतः पृष्ठलग्नेन वर्षं यावत् भ्राम्यता तदा ग्रहीतमित्यादि सम्प्रदायगम्यं परित्यज्य प्रतिकूलोपसर्गान् प्रतिपादयन्तो भगवच्चारितमाहुः-

**पडिकूलसूलपाणिं चंडक्कियचंडकोसियमहिं च ।**
**अगणिय नियतणुपीडं पडिबोहिय संतु मे भवयं ॥२४॥**

प्रतिकूलशूलपाणिं यक्षं ब्रह्मशान्तिनाम्ना प्रसिद्धं च पुनश्चण्डक्रियं-कूरकर्माणं चण्डाकृतिं वा चण्डकौशिकं अहिं सर्पं हे भगवन् ! त्वं निजतनुपीडां अगणयित्वा प्रतिबोधितवानिति गाथार्थः ॥२४॥

**एगरयणीइ वीसं च्छहिं मासेहिं विविहउवसग्गे ।**
**तह करिय हरियसुरसग्गसंगमो संगमो जाओ ॥२५॥**

एकस्यां रात्रौ विंशतिमुपसर्गान्-

'धूली १ पिपीलिआओ २ उद्दंसा ३ तहय चेव उण्होला ४ ।
विच्छू य ५ नउला ६ सप्पा ७ मूसगा ८ चेव अट्ठमया ॥१॥

हत्थ ९ हत्थिणियाओ १० पिसायए ११ घोरुववग्गेय १२ ।
थेरा १३ थेरी १४ सूउ १५ आगच्छइ पक्कणो य १६ तहा ॥२॥

खरवाय १७ कलकलिया १८ कालचक्कं तहेव य १९ ।
पाभाईय उवसग्गे वीस इमे तहय अणुलोमे २० ॥३॥ [आव०-४०२-४०४]

इत्येतान् तदनु षण्मासान् यावद् विविधान्-नाना प्रकारानुपसर्गानेषणादींस्तव कृत्वा हृतो-निवारितः सुरस्वर्गयोः सङ्गमो यस्य स हृतसुरस्वर्गसङ्गमः एवंविधः सङ्गमकनामा देवो जात इति गाथार्थः ॥२५॥

**कन्नेसु कडसलागापवेसगे अभिनिवेसगे गोवे ।**
**खरगे यत दुद्धरगे तुह तुल्ला चेव मणवित्ती ॥२६॥**

व्याख्या - 'कन्नेसु'त्ति द्विवचने बहुवचनं प्राकृतत्वात् । कर्णयोः काष्टशलाकाप्रवेशके काष्टशलाकाक्षेपकेअभिनिवेशके सकोपगोपाले तदुद्धर्त्तरि-काष्टशलाकानिष्काशके मध्यमपुरीवास्तव्ये सिद्धार्थे वणिक्पुत्रे खरकाख्ये वैद्ये

Jain Education International For Personal & Private Use Only www.jainelibrary.org

च-तुल्यैव मनोवृत्तिरिति। एतैरुपलक्षिता अन्येपि गोशालकाद्युत्पादिता उपसर्गा अत्र मन्तव्याः। तेष्वपि शीतं माघनिशायां यद् वितेने कटपूतना जघन्येषु उपसर्गेषु तदुत्कृष्टं प्रभोरभूत्। कालचक्रं मध्यमेषूत्कृष्टतमं शल्यप्रोद्धरणं पुनः [उत्कृष्टेषूत्कृष्टतमम्]। अयं विशेषो ज्ञेय इति गाथार्थः ॥२६॥

अथ भगवतः सर्वतपःसङ्ख्यां समाख्यान्ति-

**छ-चउ-तिदुगेगमासे एग-नव-दुछक्क-बारस अकासी।**
**अट्ठ-दिवड्ढ-दोइमासे बावत्तरी-दो-दो ॥२७॥**

षट्चतुस्त्रिद्विकैकमासान् मासशब्दस्य प्रत्येकं सम्बन्धात् षण्मासिकं, चतुर्मासिकान् त्रिमासिके द्विमासिकान् [एकमासिकान्] यथाक्रमं एक-नव-द्वि-षट्-द्वादश-सङ्ख्यान् त्वमकार्षीः। ततोऽयमर्थः एकं षण्मासिकं, नव चतुर्मासिकान्, द्वे त्रिमासिके, षट् द्विमासिकान्, द्वादशैकमासिकानिति। तथा अर्ध-द्व्यर्ध-अर्धतृतीयमासान् क्रमेण द्वासप्ततिर्द्वेद्वे इति मासशब्दस्य प्रत्येकं सम्बन्ध-स्ततोमासार्धक्षपणान् द्वासप्ततिः, द्व्यर्ध्यमासिके द्वे, अर्धतुतीयमासिके द्वे त्वमकार्षीरिति गाथार्थः ॥२७॥

**दु-चउ-दसदिणा पडिमा भद्द-महाभद्द-सव्वउभद्दा।**
**कासि अच्छिन्ना तह बारसेगराई ति देवसिया ॥२८॥**

द्वि-चतु-र्दशदिनाः प्रतिमाः भद्र-महाभद्र-सर्वतोभद्रनाम्नीः अच्छिन्ना-अन्तरालपारणकरहिता अकार्षीत्। तत्र द्विदिना भद्रप्रतिमा-तस्यां क्रियमाणायां चतसृषु दिक्षुश्चतुरः प्रहरान् कायोत्सर्गः। चतुर्दिना महाभद्रप्रतिमा-तस्यामेकैकमहोरात्रं दशसु दिक्षु कायोत्सर्गः क्रियते इति। तथा त्रिदैवसिक्येकरात्रिकीः प्रतिमा द्वादशाऽकार्षीः-तस्यामष्टमस्यान्त्यरात्रिः कायोत्सर्गेणाऽतिक्रामतीति त्रिदैवसिक्ये-करात्रिकीति संज्ञेति गाथार्थः ॥२८॥

**पंचदिणूणछम्मासि य खवणं कोसंबिए तुममकासि।**
**दुन्निसंए गुणतीसे अकासि तं छट्ठखवणाणं ॥२९॥**

व्याख्या - 'दव्वउ-कुम्मासा सुप्पकोणेणं, खित्तउ-एलुगं विक्खंभइत्ता, कालउ-नियसुभिक्खायरेसु, भावउ-रायधूया दासत्तणं पत्ता नियलबद्धा

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मुंडियसिरो रोयमाणी अट्ठमभत्तिया जइ दलइस्सइ तउ पारेमि ।' इत्यभिग्रहस्तव तथाविधया चन्दनानाम्न्या राजकन्यया पञ्चदिनोनैः षण्मासैः पूर्ण इति कोशाम्ब्यां पञ्चदिनोनषण्मासिकं क्षपणं त्वमकार्षीः । तथा त्वं षष्टक्षपणानां द्वे शते एकोनत्रिंशदधिके (२२९) इति अकार्षीरिति गाथार्थः ॥२९॥

अथ निर्णीय पारणककालमानप्रज्ञापनापूर्वं ज्ञानकल्याणकमाहुः-

**दिवसूणदुडुसया पारणया पढमवयदिणं चेगं ।**
**इय तेरसपक्खाहियबारसवरिसा वसमाणे ते ॥३०॥**
**जंभिय बहि रुजुवालियतीर वइसाहसियदसमि पहरतिगे ।**
**छट्ठेणुक्कडुवट्टियस्स, केवलं आसि सालतले ॥३१॥** युग्मम् ॥

व्याख्या - अन्त्य षष्ठस्य पारणं केवलिपर्यायेऽभूदिति । सर्वतपसां पारणानि दिनद्वयोनार्धचतुःशतानि (३४८) प्रथमपारणं चैकमिति दिवसोनार्ध-चतुःशतानि (३४९) पारणकानि । प्रथमं व्रतदिनं चेकं इति पूर्वोक्त सर्वमीलनेन वर्षाण्येकादश(११) मासाः(६) षड् दिनानि षड्विंशतिः (२६) एतावन्त उपवासाः भवन्ति । पारणा-मासा एकादश' (११) दिनान्येकोनविंशतिरिति (१९) त्रयोदशपक्षाधिकद्वादशवर्षाणि भवन्ति । परं नत्वेतानि कथं घटं ? तेन भगवतो हि दीक्षा मार्गकृष्णदशम्यां, केवलं वैशाखशुक्लदशम्यामित्यैकदशैव पक्षा समधिकाः स्युरिति । अत्रोच्यते-भगवतः छद्मस्थपर्याये हि साधिके सार्द्धे द्वे युगे तत्राधिकमासाः पञ्च तेषु प्रतिवर्षषट्दिनपातात् सार्द्धौ द्वौ मासे तिथिपातस्थाने एकस्य मासः पक्षद्वयपूरणे इति त्रयोदशपक्षाः सार्धो मासस्तु प्रत्युत्कलित । एवं च सति-'छट्ठेणं एगया भुञ्जे, अहवा अट्ठमेणं दसमेणं दुवालसमेणं एगया भुंजेइ इति एगए ति कदाचित्' । इति श्रीआचाराङ्गे उपधानश्रुताख्येऽष्टमेऽध्ययने चतुर्थोद्देशके यद्दशमादि तपो भगवता विहितमुक्तं तदुत्कलितदिवसेष्विति सम्भाव्यते । परमत्र श्रीआवश्यकादौ च छद्मस्थ-पर्यायतपःसङ्कलनायां केनापि कारणेन तद् विवक्षा न कृतेति अपि च भगवतः तपसि पानकाहारपरिभोगोऽपि नाऽभूत् तथा चाऽवश्यके-

'बारसवासे अहिए, अ(छ)ट्ठभत्तं जहन्नयं ।
आसि सव्वं च तवोकम्मं अपाणगं आसि वीरस्स ॥ [आव०-४३८]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सर्वं च तपःकर्माऽपानकं आसीत्। इत्यत्र वृत्तिकृत्तोक्तं-'क्षीरादिद्रवाहार-भोजनकाललभ्यव्यतिरेकेण भगवता पानकपरिभोगो नाऽऽसेवित इत्यर्थः।' एतद् टिप्पनकारेण व्याख्यातं-'क्षीरादिश्चासौ द्रवाहारश्च तस्या भोजनकालस्तत्र लभ्यंप्राप्तं-गृहीतं यत्पानकं तद्व्यतिरेकेण नाऽन्यथा पानकभोगं कृतवान् भगवानित्यर्थः। यदा लेपकृदाहारसंसृष्टं कदिकमभूत् तदा पानकं जग्राह नाऽन्यदेति भावः।' अन्ये त्वाहुः-क्षीरादिद्रवाहारश्चाऽसौ भोजनकालश्च तद्-व्यतिरेकेण। इदमुक्तं भवति च्छद्मस्थकाले क्षीरादिद्रवाहार एव पानकस्थाने-ऽभूदिति। अनु च श्रीआचाराङ्गेऽष्टमेऽध्ययने चतुर्थोद्देशके पुनरर्धमासादिषु भगवतः पानकपरिभोगो नासीत्। न तु सर्वस्मिन्नपि छद्मस्थपर्यायि सर्वथा पानकं नाऽसीत् इत्युक्त तथाहि - 'अपि इत्थ एगया भयवं अधमासं अदुवा मासं पि अविसाहिए दुवे मासा छप्पिमासे अदुवा अपि च्छित्तारा उपरायं अपडिन्ने अन्नगिलायमेगया भुंजे' इति। पानमप्यर्धमासं अथवा मासं न पीतवान् मासद्वयमपि साधिकं अथवा षडपि मासान् साधिकान् भगवान् पानकमपीत्वाऽपि रात्रोपरात्रमित्यहर्न्निशं विहृतवानिति। किंभूतो प्रतिज्ञः? पानाभ्युपगमरहित इत्यर्थः। तथा-अन्नगिलायन्ति पर्युषितं तदेकदा कदाचित् भुक्तवानिति तत्वम् पुनः पूज्या विदुः। इत्यलं प्रसङ्गेन प्रकृतं प्रश्रूयते। तेषां त्रयोदशपक्षाधिकद्वादशवर्षाणामवसाने प्रान्ते ते तव जम्भिकानगर्या बहिः ऋजुवालिकानद्यास्तीरे श्यामगृहपतिक्षेत्रे शालनाम्नः तरोस्तले वैशाखशुक्ल-दशम्याः प्रहरत्रिके व्यतीते षष्ठेन तपसा उत्कटिकाऽऽसनस्थस्य असहायमसमानं सम्पूर्णं शुद्धमनन्तं वा प्रस्तावात् ज्ञानं केवलज्ञानं पदैकदेशे पदसमुदायोपचारात् आसीत्। तदा च च्छद्मस्थिकज्ञानापगमोऽभूत्। उक्तं च आवश्यके-

*उप्पन्नम्मि अणंते नट्ठम्मि य छाउमत्थियनाणे।*

राईए संपत्तो महसेणवणम्मि उज्जाणे ॥१॥ [आवश्यकनिर्युक्ति-४३९]

अन्यत्राऽप्युक्तं-

कडविवरागयकिरणा मेहंतरियस्स जह दिणेसस्स।

उक्कडमेहावगमे न हुंति जह तह इमाइं पि ॥१॥ इति गाथार्थ ॥३०-३१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ चतुर्विधसङ्घस्थापनामाहुः-

**सुरकयउसरणे ठाउमीस ! कप्पो त्ति काउ धम्मकहं ।**
**धुवमच्छरिय जाणिय वरचरणअभावियं परिसं ॥३२॥**
**बहु तिसयकोडि सहिओ निसि बारस जोयणेहिं पावपुरिं ।**
**गंतु महसेणवणे चउविहतित्थं पयट्टित्थो ॥३३॥** युग्मम् ॥

हे ईश ! स्वामिन् ! त्वं सुरकृतसमवरसणे आगमोक्तस्वरूपे स्थित्वा समुपविश्य कल्पस्थितिरिति हेतोर्धर्मकथां-धमदेशनां कृत्वा वरचरणाऽभावितां देशविरति-सर्वविरत्याऽभावितां पर्षदां-सभां ध्रुवं आश्चर्यं ज्ञात्वा, न हि तीर्थकृद्देशनानिःफला भवतीति ॥३२॥

बहुभिस्त्रिदशकोटिभिर्देवकोटिभिः सहितो निशायां रात्रौ द्वादशयोजनैः पापापुर्यां गत्वा महासेननाम्नि वने चतुर्विधं तीर्थं साधु-साध्वी-श्रावक-श्राविका-सङ्घं प्रवर्त्तयसि ॥३३॥ अथ तत्सङ्ख्यां व्यञ्जयन्ति-

**साहु सहस्सा चउदस, छत्तीसं साहुणी सहस्साणि ।**
**से गुणसिट्ठ सहस्सं लक्खं सड्ढा दुगुणसड्ढी ॥३४॥**

स्वामिहस्तदीक्षितानां साधूनां श्रीइन्द्रभूतिप्रमुखाणां चतुर्दशसहस्राणि । साध्वीनां आर्यचन्दनाप्रभृतीनां षट्त्रिंशत्सहस्राणि । तथा भगवत्प्रतिबोधिताः श्राद्धाः शङ्ख-शतकप्रमुखा सहैकोनषष्टिसहस्रैर्वर्त्तते यत् तु सैकोनषष्टिसहस्रं लक्षमेकं (१५९०००) श्राविकाः सुलसा-रेवतीप्रभृतये द्विगुणास्त्रीणि लक्षाणि साष्टादशसहस्राणि (३१८०००) तवाऽभवन्नित्यध्याहार्य सर्वत्र योज्यमिति गाथार्थः ॥३४॥

उक्तसङ्ख्येष्वेव साधुषु लब्धिविशेषाऽऽश्रितां सङ्ख्यां ख्यापयन्ति-

**चउदसपुव्वी-वाई-मणपज्जवणो ति-चउ-पंचसया ।**
**सत्तसया केवलिणो, विउव्विणो तत्तिया तुज्झ ॥३५॥**

चतुर्दशपूर्विणो वादिनो मनःपर्यविनश्च यथासङ्ख्यं त्रीणि-चत्वारि-पञ्चाशतानि । अयं भावः-चतुर्दशपूर्वीणां त्रीणि शतानि, ते च जिन इवाऽवितथं सद्भूतार्थं व्याकुर्वन्तः सङ्ख्यातीतानपि भवान् प्रज्ञापयन्ति केवलि-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रुतकेवलिनोः प्रज्ञापनायां तुल्यत्वादिति । वादिनां सदेवमनुजाऽसुरायां सभायामप्यपराजितानां चत्वारि शतानि । मनःपर्ययिनां विपुलमतीनां पञ्चशतानि, तत्र विपुल-बहुविधविशेषणोपेतमन्यमानवस्तुग्राहित्वेन विस्तीर्णा मतिः मनःपर्यायज्ञानं येषां ते विपुलमतयः, सम्पूर्णे मनुष्ये क्षेत्रे व्यवस्थितानां संज्ञिनां मनोवर्तिसर्वविशेषोपेतवस्तुग्राहिणः, ऋजुमतयस्तु सामान्यत एवार्ध-तृतीयाङ्गुलन्यूने मनुजक्षेत्रे व्यवस्थितानां संज्ञिनां मनोमात्रग्राहिकाः न तैरिहाधि-कार इति । सप्तशतानि केवलिनः । वैक्रियलब्धिवन्तस्तावन्तः सप्तशतानीत्यर्थः । तवाभवन्निति गम्यमिति गाथार्थः ॥३५॥

**पंचजमधम्मदेसग इक्कारस गणहरा नव गणा ते ।**
**तेरस ओहिजिणसया अट्ठसयाणुत्तर गईणं ॥३६॥**

व्याख्या - पञ्च यमा-व्रतानि, प्राणातिपात-मृषावादा-ऽदत्तादान-मैथुन-परिग्रहविरमणलक्षानि यत्र चासौ धर्मस्तं दिशतीति पञ्चयमधर्मदेशकस्तत्सम्बोधनं हे पञ्चयमधर्मदेशक ! ते तव, एकादशगणधरा गौतमाद्याः । नव गणा-एकवाचनिकाः साधुसङ्घाताः अभवन् । त्रयोदशशतान्यवधिजिनानां-अवधिज्ञानिनामित्यर्थः । अनुत्तरविमानेषु गतिर्गमनं येषां तेऽनुत्तरगतयस्तेषां अनुत्तरगतीनामष्टशतानि ते चाऽऽगामिभवभाविसिद्धिगतयो ज्ञेयाः । अभवन्नितिक्रियायोगः सर्वत्र ज्ञेय इति गाथार्थः ॥३६॥ अथ भगवतो साधारणगुणस्तुतिमाहुः-

**पंचंतराय-हासाच्छक्क-मिच्छत्तमविरइमनाणं ।**
**अट्ठरसदोसाः राग-दोस-निद्दा य मयणो य ॥३७॥**
**इय नट्ठट्ठारसदोसदाह ! चउतीसअइसयसणाह ! ।**
**पणतीसबुद्धनयणाइसेसअत्थाह ! जय नाह ! ॥३८॥** युग्मम् ॥

पञ्चान्तरायाः -दान-लाभ-वीर्य-भोगोपभोगगाः, हास्यादिषट्कं हास्य-रत्यरति-शोक-भय-जुगुप्सालक्षणं, मिथ्यात्वं, अविरतिः, अज्ञानं, राग-द्वेष-निद्राश्च मदनश्चेत्यष्टादशदोषाः ॥३७॥ इति पूर्वोक्तप्रकाराणां नष्टो विलयङ्गतो-ऽष्टादशदोषाणां दाघः-सन्तापो यस्य स तथा तस्य सम्बोधनं हे नष्टाष्टादश-दोषदाघ ! हे चतुस्त्रिंशदतिशयसंयुक्त ! यद्यप्यनन्तातिशयो भगवतस्तथापीह

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चतुस्त्रिंशत् महातिशया एवोक्ताः । तथाहि –

रयरोयसोयरहिओ देहो १ धवलाइमंस-रुहिराइं २ ।
आहार-निहारा अदिस्सा ३ सुरहिणो सासा ४ ॥१॥

जम्माउ इमे चउरो, इक्कारस कम्मखयभवा इण्हि ।
खित्ते जोयणमित्ते तिजयजणो माइ बहुओ वि ५ ॥२॥

नियभासाए नर-तिरि-सुराण धम्मावबोहया वाणी ६ ।
पुव्वब्भवरोगा उवसमंति ७ न य हुंति वेराइं ८ ॥३॥

मब्भिक्ख ९ डमर १० दुम्मारि ११ ईइ १२ अइवुट्ठि १३ अणभिवुट्ठीओ ।
हुंति न १४ जियबहुतरणीपसरइ भामंडलुज्जोओ १५ ॥४॥

सुररइयागुणवीसा मणिमयसीहासणं सपयपीढं १६ ।
छत्तत्तय १७ इंदज्झय १८ सिय चामरा १९ धम्मचक्काई २० ॥५॥

सह जगगुरुणा गयणट्ठियाइं, पंचवि इमाइं वियरंति ।
पाउब्भवइ असोउ २१ चिट्ठइ जत्थप्पहू'तत्थ ॥६॥

चउमुहमुत्तिचउक्कं २२ मणि-कंचण-ताररइयसालतिगं २३ ।
नव कणयपंकयाइं २४ अहोमुहा कंटया २५ हुंति ॥७॥

निच्चमवट्ठियमत्ता पहुणो चिट्ठंति केस-रोम-नहा २६ ।
इंदियअत्था पंच वि २७ मणोरमा हुंति छप्पि रिऊ २८ ॥८॥

गंधोदयस्स वुट्ठी २९ वुट्ठी कुसुमाण पंचवन्नाण ३० ।
दिंति प्पयाहिणाउ सउणा ३१ पवणो वि अणुकूलो ३२ ॥९॥

पणमंति दुमा ३३ वज्जंति दुंदुहिओ गहीरघोसा सा उ ३४ ।
चउतीसाइसयाणं सव्व जिणिंदाण होइ इमा ॥१०॥' इति

[प्रवचनसारोद्धार-४४१-४५०]

हे पञ्चत्रिंशद्बुद्धवचनातिशेषास्ताघ ! तत्र पञ्चत्रिंशताबुद्धैर्ज्ञातैः प्रसिद्धै-र्बुद्धानां तीर्थङ्कराणां वचनातिशेषैः संस्कारवत्वाद्यैरस्ताद्य इवाऽस्ताधः अलब्धमध्यः परैरकलनीय इति यावत् महार्थ महाविषयगम्भीरवचनत्वात्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भगवतः वचसः पञ्चत्रिंशदतिशयाश्चैते-'संस्कृतादिलक्षणयुक्तत्वं १ उच्चैर्वृत्तिता २ अग्न्यान्यत्वं ३ मेघस्येव गम्भीरशब्दत्वं ४ प्रतिशब्दोपेतत्वं ५ सरलत्वं ६ मालवकेशिक्यादिरागयुक्तता ७ एते सप्तशब्दापेक्षातिशयाः, अन्येत्वार्थाश्रयाः यथा-महार्थता बृहदभिधेयता ८ पूर्वापरवाक्यार्थाऽविरोधः ९ वक्तुः शिष्टताश्च-कर्तृत्वं १० असन्दिग्धं ११ परदूषणाऽविषयता १२ हृदयग्राह्यत्वं १३ परस्परेण पदानां वाक्यानां वा सापेक्षता १४ देशकालाद्यनुरूपत्वं १५ वक्ष्यमाणवस्तु-स्वरूपानुसारिता १६ सुसम्बद्धस्य सतः प्रसरणं १७ आत्मोत्कर्ष-परनिन्दाविप्रमुक्तत्वं १८ वक्तुः प्रतिपाद्यस्यैव भूमिकानुसारिता १९ घृत-गुडादिवत् सुखकारित्वं २० प्राप्तश्लाघता २१ परमर्माऽनुद्घाटनस्वरूपत्वं २२ अभिधेयस्यार्थस्याऽतुच्छत्वं २३ अर्थ-धर्माभ्यां संयुक्तता २४ कारक-काल-वचन-लिङ्गादिव्यत्ययस्वरूपदोषरहितत्वं २५ भ्रान्ति-विस्मृत्यादिमनोदोषै-र्वियुक्तत्वं २६ आश्चर्यकारित्वं २७ अद्भुतोच्चारता २८ अतिविलम्बरहितत्वं २९ नृ-तिर्यक्-सुरलोकसभासंवादित्वं ३० सविशेषत्वं ३१ सत्वप्रधानत्वं ३२, वर्णपदवाक्यानां विवेकत्वं ३३ अव्यवच्छिन्नता ३४ अखिन्नत्वं ३५ ।' इति, हे नाथ ! त्वं जयेति गाथा द्वयार्थः ॥३८॥

अथ भवितत्वताया बहुलतां दर्शयन्ति-

**नत्थि भवियव्वनासो जं गोसालो तुमं तं पि तिजयपहुं ।**
**अक्कोसिय हहा ! तुह पुरो महेसी दहेसीय ॥३९॥**

व्याख्या - नाऽस्ति भवितव्यस्या-ऽवश्यम्भाविनो भावस्य नाशः यद्यस्मात् कारणात् गोशालो-मङ्खलिपुत्रः, त्वां त्रिजगत्प्रभुमपि आक्रोशात् 'हाहा' इति खेदे समवसरणंस्थस्य तव पुरो महर्षी सर्वानुभूति-सुनक्षत्रनामानौ अदहच्च तेजोलेश्ययेति शेषः अत्र कथाविस्तारत्वात् अन्यतो वाच्यं इति गाथार्थः ॥३९॥

अथ प्रभोः परमोपकारितां वर्णयन्ति-

**जत्थं निवसंति संतो खणं पि तं किर कुणंति सुकयत्थं ।**
**इय नूणमूसभदत्तं देवाणंदं च नेसि सिवं ॥४०॥**

यत्र निवसन्ति अवतिष्ठन्ते सन्तः-शिष्टाः क्षणमपि-अल्पकालमपि किलेति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सत्ये, तं कुवन्ति सुकृतार्थं-कृतकृत्यं इति नूनं-इतीव ऋषभदत्तं द्विजं देवानन्दां ब्राह्मणीं च शिवं मोक्षत्वं अनय इति गाथार्थः ॥४०॥

**सेणियनिव-सिद्धाइयदेवी-मायंगजक्खकयसेव ! ।**
**नवतत्तसत्तभंगिं पयडसि देसूणतीससमा ॥४१॥**

हे श्रेणिकनृप-सिद्धायकादेवी-मातङ्गयक्षकृतसेव ! तत्र श्रेणिको-मगधाधिपः, मातङ्गयक्ष-सिद्धायिकादेव्योः स्वरूपं यथा-

'मातङ्गनामा यक्षोऽभूद्, गजयानो सितद्युतिः ।
बीजपूरं करे वामे, नकुलं दक्षिणे दधन् ॥१॥
देवी सिद्धायका चाऽऽसीदासीना गजवाहने ।
हरिच्छविः पुस्तकाढ्याऽभयदौ दक्षिणौ करौ ॥२॥
वामौ तु दधती बीजपूर-वल्लकिसंयुतौ ।
प्रभोरभूतां ते नित्यासन्ने शासनदेवते ॥३॥' इति ।

नवानां तत्वानां सप्तभङ्गं यथा - 'सत्‌जीवः १ असत्‌जीवः २ सदसत्‌जीवः ३ अवक्तव्यो जीवः ४ सदवक्तव्यो जीवः ५ असदवक्तव्यो जीवः ६ सदसदवक्तव्यो जीवः ७' इति सर्वत्र स्यात् पदलाञ्छितत्वेन सुष्ठता भवेत् ततश्च एकत्रापि वस्तुनि स्पष्टैव युगपत् सभङ्गावतारे एवं अजदीवादिष्वपि स अथवा नवतत्वानि प्रकृतिधर्मं सप्तभङ्गी चेति

व्याख्या - सत्त्वं स्वरूपेण विद्यमानत्वं १ असत्त्वं पररूपेणाविद्यमानत्वं २ सदसत्त्वं स्वरूप-पररूपाभ्यां ३ सर्वं सर्वदैव स्वभावत एव सदसत् तथापि क्वचित् कदाचित् किञ्चिदुद्भूतं प्रमात्रा विवक्ष्यते तत एवं त्रयो विकल्पाः स्युः । तथा तदेव सत्त्वमसत्त्वं च यदा युगपदेकेन शब्देन वक्तुमिष्यते तदा तद्वाचकः शब्दकोऽपि न विद्यते इति अवक्तव्यं, यदा त्वेको भागः सन्नपरश्चावक्तव्यो युगपद् विवक्ष्यते तदा सदवक्तव्यं, यदा त्वेको भागोऽसन्नपरश्चाऽवक्तव्यस्तदा-ऽसदवक्तव्यत्वं, यदा त्वेको भागोऽसन्नपरश्चावक्तव्यस्तदाऽसदवक्तव्यत्वं ५, यदा त्वेको भागः सन्नपरश्चासन्नपरश्चावक्तव्यत्वं ६ यदा त्वेको भागः सन्नपरश्चा-सन्नपरश्चावक्तव्यस्तदा सदसदवक्तव्यत्वमिति ७ न चैतेभ्योऽन्यो विकल्पः सम्भवति । सतोऽपि वाऽत्रैवान्तर्भावः । तथा चोक्तं-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

या प्रश्नाद् विधिपर्युदासभिदयाबाधच्युता सप्तधा,
धर्मं धर्ममपेक्ष्य वाक्यरचनानेकात्मके वस्तुनि ।
निर्दोषा निरदेशि देव ! भवता सा सप्तभङ्गी यया,
जल्पन् जल्परणां गणां विजयते वादी विपक्षं क्षणात् ॥१॥

इह च सप्तभङ्गी भावना स्वयं कार्या । कियन्तं कालं प्रकटयामासेत्याह देशोनानि त्रयोदशपक्षैः न्यूनानि द्वात्रिंशद्वर्षाणि एतावान् केवलिपर्याय इत्यर्थः, इति गाथार्थः ॥४१॥ अथ भगवतो मोक्षकल्याणकं प्राहुः-

**मज्झिमपावाए हत्थिवालभूवालसुंकसालाए ।**
**पज्जंकठिओ पासाओ वास दुसए गए सड्ढे ॥४२॥**
**कत्तियअमावसाए गोसे छट्ठेण साइनक्खत्ते ।**
**एगुच्चिय बावत्तरिवरिसाऊ तं सिवं पत्तो ॥४३॥** युग्मम् ॥

मध्यमपापानगर्यां हस्तिपालस्य राज्ञः शुल्कशालायां-दानमण्डपिकायां पर्यङ्कस्थितः-

स्याज्जङ्घयोरधोभागे, पादोपरिकृते सति ।
पर्यङ्को नाभिगोत्तानदक्षिणोत्तरपाणिकः ॥१॥ इति [योगशास्त्रं-४-१२५]

पर्यङ्कासनस्थः पद्मासनस्वरूपपादपोपगमवानित्यर्थः यतः सर्वेऽपि हि भगवन्तोऽर्हन्तः पादपोपगमेन सिध्यन्ति । तथा चोक्तं

'सव्वे सव्वद्धाए सव्वन्नू सव्वकम्मभूमीसु ।
सव्वगुरू सव्वहिया सव्वे मेरुसु अहिसित्ता ॥१॥
सव्वाहि वि लद्धीहिं सव्वेऽवि परीसहे पराजित्ता ।
सव्वेऽवि य तित्थयरा पाउवगयाउ सिद्धिगया ॥२॥'

[मरणसमाधिपयन्ना-४३८-४३९]

इति पादपोपगमनस्वरूपं चेदं-

'निच्चलनिप्पडिकम्मो निक्खिवए जं जहिं जहाहिं ।
अंगं एयं पाउगमं नीहारिं वा अनीहारिं ॥१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पाउवगमं भणियं समविसमे पायव व्व जह पडिओ ।

नवरं परप्पओगा कंपिज्ज जहा फलतरु व्व ॥२॥' [मरण०-४२६-४२७]

अत्र 'निप्पडिक्कम्मो'त्ति-निःपरिकर्मा स्थाननिषीदन-त्वग्वर्तनादिपरिकर्म-रहितः । 'निहारिं'त्ति गिरिकन्दरादौ यदङ्गीकर्तुं ग्रामादेर्बहिः निर्गमनं यत्राऽस्ति तन्निर्हारितदन्यदानिर्हारि इति । कदा ? क्व भगवान् सिद्ध ? इत्याहुः-पार्श्वनाथात् वर्षशतद्वये सार्द्धे (२५०) गते-समतिक्रान्ते सति ॥४२॥

कार्तिकामावास्यां, गोसे-प्रभाते, षष्ठेन तपसा, स्वातिनक्षत्रे, एक एव-एकत्वं च द्रव्यतोऽद्वितीयत्वात्-न पुनर्यथा ऋषभादयो दशसहस्रादिभिः साधुभिः सहिता मोक्षं जग्मुस्तथेति, भावतश्चैकत्वं रागादिरहितत्वात् । द्वासप्तति-वर्षायुः, तत्र त्रिंशद्वर्षाणि गृहस्थपर्यायः द्वादशवर्षाणि त्रयोदशपक्षाऽधिकानि छद्मस्थपर्यायः त्रयोदशपक्षोनत्रिंशद्वर्षाणि केवलिपर्यायः, छद्मस्थपर्याय-केवलिपर्यायमीलने द्विचत्वारिंशद्वर्षाणि दीक्षापर्यायः, सर्वमीलने द्वासप्तति-वर्षाणि सर्वायुः, त्वं शिवं प्राप्तः । एकत्रिंशद्गुणसमृद्धः सिद्धो बभूव ते पुनरेकत्रिंशद्सिद्धगुणाः श्रुते एवं -

'से न दीहे, न वट्टे, न तंसे, न चउरंसे, न परिमंडले, न किण्हे, न नीले, न लोहिए, न हालिद्दे, न सुक्किले, न सुरहिगंधे, न असुरहिगंधे, न तित्ते, न कडुए, न कसाए, न अंबिले, न महुरे, न कडे, न मउए, न गुरुए, न लहुए, न सीए, न उण्हे, न निद्धे, न लुखे, न काए, न संगे, न रुहे, न इत्थी, न पुरिसे, न नपुंसे ।' अत्र सज्यते कर्मणा सम्बध्यतेऽनेनेति सङ्गो रागः । अत्र संस्थान-वर्ण-रसाः प्रत्येकं पञ्चसङ्ख्या इति पञ्चदश (१५), द्वौ गन्धौ (२), अष्ट स्पर्शाः (८), वेदत्रिकं (३), कायोऽभिष्वङ्गो जन्म चेति त्रिकं (३) इति सर्वमीलने एकत्रिंशत् सिद्धगुणा इति ।

यस्यां च रात्रौ भगवान् सिद्धस्तस्यामष्टादशभिर्गणभूपालैः 'गए से भावुज्जोए दव्वुज्जोयं करिस्सामो' इति विचिन्त्य रत्नदीपकैरुद्योतश्चक्रे तदाद्येव लोके प्रतिवर्षं दीपोत्सवोऽभवदित्यलं प्रसङ्गेन । इति व्याख्यातं श्रीआव-श्यकाभिप्रायेण भगवच्चरित्रम् ।

परमेवं षट्विंशतिरेव भवाः स्युः तथा च सति पञ्चम-त्रयोदश-पञ्चदश-

एकविंशभवान्तेषु बहुसंसारेण एकं भवं गणयित्वा सप्तविंशतिभवान् समर्थयते। केचित् श्रीआवश्यकबृहद्वृत्तौ तु भगवत इतीयं ततो भगवान् इति गणनैव न कृता, क्वचित् क्वचिदावश्यकजीर्णचुर्णौ व्यक्तव्या भगवत्भव-गणनायां देवानन्दोदराऽवतारः षड्विंशो भवः श्रीत्रिशलागर्भसम्भूतः श्रीवीरः सप्तविंशो भवः। इति प्रसिद्धया पुनर्भवाः सप्तविंशतिरेवं-

'ग्रामेश १ स्त्रिदशो २ मरीचि ३ रमरो ४ षोढा परिव्राट्-सुरः, १६
संसारे बहु विश्वभूति १७ रमरो १८ नारायणो १९ नारकः २०।
सिंहो २१ नेरयिको २२ भवेषु बहुशश्चक्री २३ सुरो २४ नन्दनः २५,
श्रीपुष्पोत्तरनिर्जरो २६ ऽवतु भवान् वीर २७ स्त्रिलोकी गुरुः ॥१॥'

[शार्दूल०]

इति, तत्वं पुनर्बहुश्रुता अवन्तीति गाथाद्वयार्थः ॥४३॥

अथोपसंहारतः प्रार्थनापूर्वं निजनामगर्भं समाप्तिकाव्यमाहुः-

**एवं वीरजिणेसणेसर ! तुमं मोहंधविद्धंसणं,**
**भव्वंभोरुहबोहसोहजणयं दोसायरुच्छेयणं।**
**थोउं जं कुसलाणुबंधिकुसलं पत्तो म्हि किंची तउ,**
**जायज्जा जिण ! वल्लहो मह सया पायप्पणामो तुह ॥४४॥**

[शार्दूल०]

एवममुना-पूर्वोक्त प्रकारेण, हे वीरजिनेशदिनेश ! हे श्रीमद्वर्धमान-जिनसूर्य ! अन्धयतीत्यन्धोऽन्धकारः मोह एव अन्धो मोहान्धस्तस्य विध्वंसनं, तथा भव्या एवाम्भोरुहाणि तेषां बोधेन-प्रतिबोधेन-विकासेन च शोभा तस्या जनकं-कारकं, तथा दोषाकरस्य दूषणनिधानस्य चन्द्रस्य चोच्छेदनं-निरासकं त्वां स्तुत्वा यत् किञ्चित् पुण्यानुबन्धिपुण्यं प्राप्तोऽस्मि-अर्जितवान् ततस्तस्मात् पुण्यानुबन्धिपुण्यात् हे जिन ! तव पदप्रणामो मम सदा वल्लभो जायतामित्यत्र शार्दूलविक्रीडितं छन्दः॥ श्री**जिनवल्लभ** इति कविनामेति वृत्तार्थः ॥४४॥

श्री**खरतरगच्छेश**श्री**जिनभद्रसूरि**शिष्याणाम्।
**जीरापल्लीपार्श्व**प्रभुलब्धवरप्रसादानाम् ॥१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**श्रीग्यासुद्दीनसाहे**र्महासभालब्धवादिविजयानाम् ।
श्री**सिद्धान्तरुचि**महोपाध्यायानां विनेयेन ॥२॥

**साधुसोमगणीशे**नाक्लेशेनार्थप्रबोधिनी ।
श्रीवीरचरिते चक्रे वृत्तिश्चित्तप्रमोदिनी ॥३॥

मतिमान्द्यान्मोहाद् वा, प्रमादतो चाऽत्र किञ्चनाऽपि मया ।
यत्सूत्रितमुत्सूत्रं, तन्मिथ्यादुःकृतं मेऽस्तु ॥४॥

अत्राऽनागमिकं युक्तिरिक्तं वा यत्पदं क्वचित् ।
विद्वद्भिरभितः सद्भिस्तच्छोध्यं शुद्धबुद्धिभिः ॥५॥

**जिनवल्लभसूरीन्द्र**सूक्तिमौक्तिकपङ्क्तयः ।
दर्शितार्थाः सुदृष्टीनां सुखग्राह्या भवन्त्विति ॥६॥

९ १ १५
चार्वी चरित्रपञ्चकवृत्तिर्विहिता नवैकतिथिवर्षे ।
हर्षेण महर्षिगणैः प्रवाच्यमाना चिरं जयतु ॥७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## परिशिष्ट-'ख' मध्ये

अकाराद्यनुक्रमे सङ्गृहीतग्रन्थानां

नाम, प्रकाशनस्थानं एवं सञ्ज्ञा ।

| ग्रन्थनाम | प्रकाशनस्थानम् | सञ्ज्ञा |
|---|---|---|
| अनुसन्धानम् | कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यनवमजन्म-शताब्दिस्मृतिसंस्कारशिक्षणनिधिः | १ |
| ऐन्द्रस्तुतिः (सटीका, यशोवि०कृता) | श्री जैनआत्मानन्दसभा-भावनगर | २ |
| काव्यमाला-७ | निर्णयसागरप्रेस - मुम्बई | ३ |
| काव्यसङ्ग्रहः (भक्तामरपादपूर्तिरूपः) | आगमोदयसमितिः-सूरत | ४ |
| गिरनार ग्रन्थोनी गोदमां | गिरनारमहातीर्थविकाससमिति | ५ |
| चतुर्विंशतिका (बप्पभट्टसूरिकृता) | आगमोदयसमितिः - सूरत | ६ |
| चतुर्विंशतिजिनस्तुतिः (शीलरत्नसूरिकृता) | श्रीजैनआत्मानन्दसभा-भावनगर | ७ |
| चतुर्विंशतिजिनानन्दस्तुतिः (मेरुविजयकृता) | देवचन्दलालचन्दपुस्तकफण्ड-सूरत | ८ |
| जैनस्तोत्रसमुच्चयः | निर्णयसागरप्रेस - मुम्बई | ९ |
| जैनस्तोत्रसन्दोहः भा.-१ | साराभाई मणिलाल नवाब - अमदावाद | १० |
| जैनस्तोत्रसन्दोहः भा.-२ | साराभाई मणिलाल नवाब - अमदावाद | ११ |
| द्वात्रिंशिकात्रयी | आत्मवल्लभसिरीझ् - ५ | १२ |
| निर्ग्रन्थ-३ | - | १३ |
| पञ्चप्रतिक्रमणसूत्राणि (अञ्चलगच्छीय) | | १४ |
| प्रकरणरत्नाकरः-२ | भीमसी माणेक - मुम्बई | १५ |

Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | |
|---|---|---|
| प्रकरणरत्नाकरः-३ | भीमसी माणेक - मुम्बई | १६ |
| शोभनस्तुत्यादिः | | १७ |
| सुकृतकीर्तिकल्लोलिन्यादि-<br>वस्तुपालप्रशस्तिसङ्ग्रहः | सिंघी जैन ग्रन्थमाला - मुम्बई | १८ |
| स्तुतिचतुर्विंशतिका<br>(शोभनमुनिकृता) | आगमोदयसमितिः - सूरत | १९ |
| स्तुतितरङ्गिणी | श्रीलब्धि-भुवनजैनसाहित्यप्रचारकेन्द्र | २० |
| स्तुतिसङ्ग्रहः | श्रीयशोविजयजैनपाठशाला - महेसाणा | २१ |
| स्तोत्ररत्नाकरः-१ | श्रीयशोविजयजैनपाठशाला - महेसाणा | २२ |
| स्तोत्ररत्नाकरः-२ | श्रीयशोविजयजैनपाठशाला - महेसाणा | २३ |
| स्तोत्रसङ्ग्रहः-१ | श्रीयशोविजयजैनपाठशाला - बनारस | २४ |
| स्तोत्रसङ्ग्रहः-२ | श्रीयशोविजयजैनपाठशाला - बनारस | २५ |
| श्रीनेमिनाथस्तोत्रसङ्ग्रहः | श्रीविजयकनकसूरिप्राचीनग्रन्थमाला-५ | ★ |

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## परिशिष्ट-'ख'

अद्यावधिप्रकाशितानां
श्रीनेमिनाथपरमात्मसम्बन्धीनां[१] स्तुति-स्तोत्रादीनां
आद्यपदानुसारी अकाराद्यनुक्रमः

| आद्यपदम् | स्तोत्राभिधानम् | पद्यानि | कर्तृनाम | प्रकाशकः |
|---|---|---|---|---|
| अत्थि सुरट्ठाविसए० | उज्जयन्तमहातीर्थकल्पः | ४१ | – | ५ |
| अमन्दभन्दोदयकन्द० | नेमिजिनस्तोत्रम् (भाषात्रितयनिबद्धम्) | १७ | रत्नप्रभसूरिः | ★ |
| अमियमऊहं नेमिं० | नेमिनाथस्तोत्रम् | – | रत्नसिंहसूरिः | १-४४ |
| असुरवरखयरसुर० | ज्ञानपञ्चमीस्तवः | १० | विमलः (?) | ★ |
| अस्त्यत्र भूयः शिखरा० | गिरनारवर्णनम् (कुमारसम्भवरीत्या) | – | रविसागरगणिः | १-२३ |
| आनन्दकन्दं० | गिरनारचैत्यपरिपाटीस्तवनम् | १४ | कीर्तिरत्नसूरिः | ९ |
| आबालकालपरिपालित० | श्रुतपञ्चमीस्तवनम् | १२ | – | ★ |
| आराधयन्तु भविका० | पञ्चमीस्तुतिः | ४ | – | १४ |
| इन्द्रोपेन्द्रौ पुनर्नत्वा० | नेमिजिनस्तवनम् | ५ | – | १७ |
| उच्छलियविमलकिरणा० | ज्ञानपञ्चमीस्तोत्रम् (पञ्चजिनस्तोत्रान्तर्गतम्) | १० | प्रसन्नचन्द्रः | ★ |
| एकादशी पुण्यमेति० | एकादशीस्तुतिः | ४ | – | १४ |

१. श्रीगिरनारमहातीर्थ-ज्ञानपञ्चमीपर्व-एकादशीपर्वानां स्तुत्याद्यपि अत्र सङ्गृहीतम्।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | | | |
|---|---|---|---|---|
| एकादर्शी यः किल० | एकादशीस्तुतिः | ४ | – | ★ |
| ऐन्द्रोद्योगसुरङ्गसङ्ग० | नेमिनाथस्तवनम् | ९ | कमलविजयः | ११ |
| कमलवल्लपनं तव० | नेमिजिनस्तुतिः | ४ | – | २४, २०–८ |
| कश्चित्प्रत्यानयति० | नेमिराजीमतीवर्णनम् (मेघदूतरीत्या) | – | रविसागरगणिः | १–२३ |
| कश्चित्कान्ताविरह० | नेमिनाथस्तोत्रम् (काव्यसप्तकप्रथमपादपूर्तिरूपम्) | ८ | – | ★ |
| कस्मिश्चित् समये० | नेमिनाथस्तुतिः | ४ | – | २०–३ |
| कुवलयदलसच्छायं० | नेमिपञ्चाशिका (द्रष्टान्तालङ्कारमया) | ४९ | नेमिचन्द्रसूरिः | ★ |
| केसरीदुरितदुष्ट० | नेमिनाथस्तुतिः | ४ | – | २०–३ |
| गङ्गेजीममुखे० | नेमिनाथस्तुतिः | १ | आनन्दवल्लभः | ★ |
| चिक्षेपोर्जितराजकं० | नेमिजिनस्तुतिः (स्तुतिचतुर्विंशतिकाऽन्तर्गता) | ४ | शोभनमुनिः | १६, १७, ३ इत्यादि |
| चिरपरिचितलक्ष्मी० | नेमिजिनस्तुतिः (स्तुतिचतुर्विंशतिकाऽन्तर्गता) | ४ | बप्पभट्टिसूरिः | ६, १७, २०–७ |
| जय जय नेमि जिणंद !० | नेमिनाथस्तवः | – | रत्नसिंहसूरिः | १–४४ |
| जय जय नेमि जिणंद पहु० | नेमिनाथस्तवः | – | रत्नसिंहसूरिः | १–४४ |
| जय जय यादववंशा० | नेमिजिनस्तुतिः (टीका–रामचन्द्रर्षिः) | ९ | चतुर्भुजः (श्रद्धालुः) | ★ |
| जय नेमिजिनेश्वर० | नेमिजिनस्तुतिः | ४ | – | २०–८ |

Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | | | |
|---|---|---|---|---|
| जय श्रियं विश्वजितं० | गिरनारमण्डननेमिनाथस्तवनम् | ३३ | मुनिसुन्दरसूरिः | २५ |
| जय सिरिनेमिजिणंद० | नेमिजिनस्तवनम् (स्वमनोविज्ञप्तिगर्भितम्) | ४२ | सोमसुन्दरसूरिः | ★ |
| जयत्यसमसंयमः० | रैवताद्रिमण्डननेमिजिनस्तोत्रम् | १२ | वस्तुपालमहामन्त्री | १८ |
| जयोग्रादिजम्बालिनी० | नेमिनाथस्तवनम् | ६ | मण्डनः | ★ |
| जायवकुलसरवर० | नेमिनाथस्तोत्रम् | १० | देवसूरिः | ★ |
| जिगाय यः प्राज्य० | नेमिनाथस्तोत्रम् (पञ्चजिनस्तोत्रान्तर्गतम्) | ३ | धर्मशीलः | ★ |
| जिणि निज्जिय० | रैवतगिरिमण्डननेमिनमस्कारस्तोत्रम् | ५ | – | ★ |
| तं निसुणेविणु चिन्तियं० | नेमिनाथरासः | – | सागरचन्द्रः | १-१० |
| तिलकसम ! तदस्तु० | नेमिजिनस्तुतिः (स्तुतिचतुर्विंशतिकान्तर्गता) | ४ | पं.हेमविजयगणिः | २०-७ |
| तीर्थङ्कराणां प्रभवादि० | पञ्चमीस्तुतिः | ४ | – | १४ |
| तीर्थाधिपानां च्यवना० | एकादशीस्तुतिः | ४ | – | १४ |
| त्वं येनाक्षतधीरिमा० | नेमिजिनस्तुतिः (यमकबद्धऐन्द्रचतुर्विंशतिकान्तर्गता) | ४ | महो. यशोविजयः | २, २०-७ |
| दीक्षा श्रीअरनाथ० | एकादशीस्तुतिः | ४ | – | २०-३ |
| देवेन्द्रवृन्दपरिषेवित० | नेमिजिनस्तुतिः | ४ | मेरुविजयः | ८ |
| नमवि सिरिनेमिजिणनाह० | ज्ञानपञ्चमीस्तोत्रम् | २१ | मुनिरत्नसूरिः | ★ |
| नमामि नेमिनाथस्य० | नेमिजिनस्तुतिः | ४ | माणिक्यरत्नः | २०-३ |
| नयनानन्दनं० | नेमिजिनचैत्यवन्दनम् | ९ | ऋषिवर्द्धनः | १० |

Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | | | |
|---|---|---|---|---|
| नामभिः श्रीरैवतको० | उज्जयन्तस्तवः | २५ | जिनप्रभसूरिः | ५ |
| निजगुरुक्रमपङ्कज० | नेमिनाथस्तवः | ५ | – | ★ |
| निबिडपडिबन्धबन्धुर० | नेमिजिनकल्याणकतिथिस्तोत्रम् (पञ्चजिनस्तोत्रान्तर्गतम्) | ६ | – | ★ |
| नेमिं नाथं वन्दे बाढं० | नेमिस्तुतिः (द्व्यक्षरपदमया) | ४ | – | ९, २०-८ |
| नेमिं राइमइजुअं० | नेमिनाथ ९ भवस्तवः | ७ | धर्मघोषसूरिः | १० |
| नेमिनाथ ! त्वया विश्वं० | नेमिनाथस्तोत्रम् (चतुर्विंशतिजिनस्तोत्रान्तर्गतम्) | ५ | – | ★ |
| नेमिनाथं वन्दे० | नेमिजिनस्तुतिः | ४ | – | २०-८ |
| नेमिनाथचरणाम्बुजो० | नेमिनाथस्तुतिः | ४ | कल्याणसागरसूरिः | – |
| नेमिः समाहितधियां० | नेमिजिनस्तवनम् | २४ | विजयसिंहाचार्यः | १० |
| पंचजन्नि आउरिय संख० | नेमिनाथस्तोत्रम् | – | – | १-१५ |
| पङ्क्तिर्नराणां० | नेमिजिनस्तवनम् | ५ | हेमविजयः | ९ |
| पञ्चानन्तकसुप्रपञ्च० | पञ्चमीस्तुतिः | ४ | – | १७, २०-१० |
| पणमिय नेमिजिणिंदं० | रैवतगिरिपञ्चाशिका | ५२ | महेन्द्रसूरिः | ★ |
| पदपावितभूमिमण्डलं० | नेमिनाथस्तवनम् (यमकमयम्) | ३२ | सोमप्रभसूरिः | ★ |
| परमभक्तिपरितपुरन्दर० | नेमिनाथस्तवनम् (अष्टभाषानिबद्धम्) | २१ | भाववर्धनः | ★ |
| परमान्नं क्षुधार्तेन० | नेमिनमस्कारस्तोत्रम् (पञ्चजिनस्तोत्रान्तर्गतम्) | ५ | उपा० जयसागरः | ★ |
| पारावारसमानसंसृति० | नेमिनाथस्तवन् (षड्भाषामयम्) | ७ | सोमसुन्दरसूरिः | ९ |

Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | | | |
|---|---|---|---|---|
| प्रचण्डमारवारकं० | नेमिजिनस्तुतिः | ४ | – | २०-३ |
| प्रियमदाद्भुवि० | नेमिजिनस्तवनम् | २६ | रविसागरः | – |
| ब्रह्माद्वैतप्रवर० | नेमजिनचैत्यवन्दनम् | ५ | शीलरत्नसूरिः | ७ |
| भक्तामरत्वदुपसे० | नेमिभक्तामरम् (भक्तामर-पादपूर्तिः) | ४४ | भावप्रभसूरिः | ४, २२ |
| भव्वाणेगसमिहिय० | नेमिजिनस्तुतिः | ४ | – | २०-३ |
| भुवनमोहनरूपमनो० | नेमिजिनस्तुतिः | ४ | – | ★ |
| मयनाहिसरिसविल० | नेमिनाथचरित्रम् (टीका-साधुसोमगणिः, सस्तबकम्, पञ्चजिनचरित्रान्तर्गतम्) | १५ | जिनवल्लभसूरिः | ★ |
| मरगयमणिवन्नह० | नेमिनाथजन्माभिषेकः | १० | जिनप्रभसूरिः | ★ |
| महिमानल्प ! नेमेश !० | नेमिनाथस्तोत्रम् (यमकमयम्) | ३२ | – | ★ |
| मानेनानून० | नेमिजिनस्तवनम् (द्व्यक्षरमयम्) | ९ | शालिसूरिः | ९, २३ |
| मुखकान्तिविनिर्जित० | नेमिजिनस्तोत्रम् (पदान्तमालायमकमयम्) | ९ | – | ★ |
| मुत्ता जेणि तिणं व० | नेमिजिनस्तुतिः | ४ | – | ★ |
| मूर्तयस्ते क्व नेक्ष्यन्ते० | नेमिनाथस्तोत्रम् | – | रत्नसिंहसूरिः | १-४४ |
| यदुकुलतिलकः० | नेमिजिनस्तवः | २४ | रामचन्द्रसूरिः | १० |
| यः पञ्चेन्द्रियसक्त० | नेमिनाथस्तुतिः | ४ | – | २०-३ |
| यो रैवताख्यगिरि० | नेमिजिनस्तुतिः (यमकबद्धजिनानन्दचतुर्विंशतिकान्तर्गता) | ४ | पं.मेरुविजयः | ४ |

Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | | | |
|---|---|---|---|---|
| रम्भारामा रुचिरतिलका० | नेमिनाथस्तुतिः (पञ्चजिनस्तुत्यन्तर्गता) | ३ | – | ★ |
| राजीमतीयुवतिमानस० | रैवताचलपरिपाटीस्तवनम् | २१ | विजयचन्द्रसूरिः | ★ |
| राज्यं राजीमतीं च० | नेमिजिनस्तुतिः | ४ | – | २०-८ |
| रैवताचलशृङ्गारं० | नेमिजिनस्तवनम् | ६ | सोमसुन्दरसूरिः | २४ |
| लोकोत्तरचरित्रौघ० | रैवतशैलमौलिनेमिजिनस्तवनम् | २२ | विनयः (?) | ★ |
| लोयालोयपयासय० | ज्ञानपञ्चमीस्तोत्रम् | १५ | विमलः (?) | ★ |
| वंदामि नेमिनाहं० | नेमिनाथस्तवनम् (ज्ञानपञ्चमीस्तवनयुक्तम्) | १३ | कीर्तिराजोपाध्यायः | ★ |
| वरधर्मकीर्तिविद्या० | गिरनारतीर्थकल्पः | ३२ | धर्मघोषसूरिः | ४ |
| वरौषधीभिस्सुतरां० | गिरनारमण्डननेमिजिनस्तवः | १० | आनन्दवल्लभः | ★ |
| विजित्यदुर्वारमनङ्ग० | नेमिजिनस्तवनम् (षड्भाषानिबद्धम्) | ३० | पद्मसुन्दरः | ★ |
| विमलकीर्तिवधूकुल० | नेमिजिनस्तवनम् (देश्यछन्दोमयम्) | २६ | अमरहर्षगणेः शिष्यः | ★ |
| विमलकेवलकेलि० | नेमिनाथस्तवनम् | ६ | विजयः | ★ |
| विशुद्धविज्ञानभृतां० | नेमिजिनचैत्यवन्दनम् | ३ | क्षमकाल्याणः | १७ |
| विस्सचिंतामणीनेमे० | नेमिजनस्तवनम् (कमलबन्धमयम्–पञ्चजिनस्तवनान्तर्गतम्) | ८ | जिनरत्नसूरिः | ★ |
| वैराग्यरङ्गसुतरङ्ग० | नेमजिनस्तुतिः | ४ | – | १४ |
| व्याख्यास्तु यस्य० | उज्जयन्तालङ्कारनेमिजिनस्तोत्रम् | – | जिनपतिसूरिः | १-३१ |
| व्रतापगासागरनेमि० | नेमिजिनस्तुतिः (स्तुतिचतुर्विंशतिकान्तर्गता) | ४ | लब्धिसूरिः | २०-७ |
| शृङ्गारयन्तं गिरि० | गिरनारस्थनेमिजिनद्वात्रिंशिका | ३२ | जयशेखरसूरिः | १२ |

| | | | | |
|---|---|---|---|---|
| शैवेयं सार्वं सरसं० | नेमिनाथस्तवः (पञ्चवर्गपरिहारेण) | १९ | – | ★ |
| शैवेयः शङ्खकेतु० | ज्ञानपञ्चमीस्तुतिः (श्रेनिमिः–पादपूर्तिः) | ४ | – | २४, २०–१० |
| श्रियमदाद्धुवि० | नेमिजिनस्तवनम् | २६ | रविसागरः | – |
| श्रीउज्जयन्तशैलेश० | गिरनारस्तवनम् | ५ | – | १० |
| श्रीउज्जयन्ताचल० | गिरनारजिनद्वात्रिंशिका | ३२ | – | ११ |
| श्रीचौलुक्यमहीमहेन्द्र० | रैवतकमण्डननेमिजिनस्तोत्रम् | १२ | वस्तुपालमहामन्त्री | १३ |
| श्रीनेमिः पञ्चरूप० | ज्ञानपञ्चमीस्तुतिः (टीका–कनककुशलस्य) | ४ | – | २१, २०–१० |
| श्रीनेमिर्मुदमुज्जयन्त० | उज्जयन्ताचलमण्डननेमिजिनस्तवः | ३२ | विजयसेनसूरिः | ★ |
| श्रीनेमिस्वामिनं नौमि० | नेमिनाथस्तवनम् | १५ | कल्याणविजयः | ११ |
| श्रीनेमीश शमीनेश्री० | नेमिजिनस्तवनम् (गतप्रत्यागतम्) | ६ | शुभशीलगणिः | ११ |
| श्रीभाग्नेमिर्बभाषे० | एकादशीस्तुतिः (टीका–क्षमाकल्याणस्य) | ४ | – | २०–१० |
| श्रीमद्रैवतकाभिधान० | नेमिजिनस्तवनम् | १७ | – | ११ |
| श्रीरैवताचलशिरो० | नेमिनाथस्तवनम् | १२ | – | ११ |
| श्रीरैवताद्रिकमला० | रैवताद्रिमण्डननेमिजिनस्तवनम् | १४ | रत्नाकरसूरिः | ★ |
| श्रीरैवताद्रौ जिनपं० | नेमिजिनस्तवनम् (समस्यागर्भितम्) | १० | जयसिंहसूरिः | ★ |
| श्रीविमलगिरेस्तीर्था० | गिरनारकल्पः | २३ | भारती | ११ |
| श्रीशैवेयं यादव० | ज्ञानपञ्चमीस्तवनम् | २४ | सोमतिलकसूरिः | १० |
| श्रीशैवेयं विनयविनत० | नेमिजिनस्तोत्रम् (विविधछन्दोनामगर्भम्) | २८ | – | ★ |
| श्रीशैवेयं शिवश्रीदं० | नेमिजिनस्तवनम् (विविधछन्दोमयम्) | ४५ | सोमतिलकसूरिः | १०, १–२३ |

Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | | | |
|---|---|---|---|---|
| श्रीशैवेय ! जयामेय ! | महार्थगम्भीरस्तवः (नेमिजिनद्वात्रिंशिका वा) | ३२ | चन्द्रसूरिः | ★ |
| श्रीशैवेयममेयश्री० | नेमिजिनस्तवनम् (सर्वतोभद्रम्) | १३ | महीसागरोपाध्यायः | ११ |
| श्रीहरिकुलहीराकर० | नेमिनाथस्तवनम् (क्रियागुप्तम्) | २० | जिनप्रभसूरिः | १५ |
| संपत्ताऽसमसुक्ख० | नेमिजिनस्तुतिः | ४ | – | २०-३ |
| सकलकालकला० | नेमिजिनस्तवनम् (श्लोकान्तमालायमकमयम्) | १५ | गुणनन्दी | ★ |
| सकलभावमहावनगारतः० | नेमिजिनस्तुतिः (महायमकमया, सावचूरिका) | ४ | – | २०-८ |
| सत्पद्याहस्तयुक्तो० | नेमिजिनस्तुतिः | ४ | – | २०-८ |
| समुद्रभूपालकुलप्रदीप० | पञ्चमीस्तुतिः | ४ | – | ९, २०-१० |
| समुल्लसद्भक्तिसुराः० | रैवतकमण्डननेमिजिनस्तुतिः | ११ | ऋषिवर्धनसूरिः | १४, १-४९ |
| सयलजगललिय० | नेमिजिनद्वात्रिंशिका | ३२ | – | ★ |
| सयलतियलोक्कतिलयं० | नेमिनाथस्तवनम् | – | रत्नसिंहसूरिः | १-४४ |
| सिद्धाञ्जनानीव० | नेमिनाथस्तवः | २२ | सुदर्शनसूरिः | ★ |
| सिरिनेमिनाह ! सामिय !० | नेमिनाथस्तवः | – | रत्नसिंहसूरिः | १-४४ |
| सुकृतसुरविहारं० | नेमिजिनस्तुतिः | ४ | बप्पभट्टिसूरिः | ★ |
| सुथिरसुरासुरसेहर० | नेमिनाथस्तवनम् | ९ | चक्रसूरिः (?) | ★ |
| सुरासुराधिनाथ० | नेमिजिनस्तुतिः | ४ | – | १४ |
| सुविशालशिवालय० | गिरनारविभूषणनेमिजिनस्तवनम् | ९ | देवेन्द्रसूरि : | ★ |
| स्वस्तिश्रीकीर्तिकान्ति० | नेमिनाथस्तुतिः (श्रीनेमि-पादपूर्तिः) | २० | रामचन्द्रगणिः | ★ |
| हर्षादुल्लसितैः० | नेमिशतकम् | ११७ | – | ★ |

Jain Education International For Personal & Private Use Only www.jainelibrary.org

પરમબ્રહ્મ સ્વરૂપ

શ્રી નેમિનાથ પરમાત્મા પ્રત્યે

આંતર સંવેદનાઓને

ભક્તિ રસથી તરબતર કરનાર

ને, કાવ્ય રસિકોના હૈયાને

ઉલ્લાસ ગામી બનાવનાર

અદ્યાવધિ અપ્રગટ સ્તોત્રોનો

આ નાનકડો સંગ્રહ

આપના ભાવોને ઉજાગર કરવામાં

આલંબન ભૂત બને...

Title Designing by
RARE N RIGHT
98204 34841

Tirth 02832-253252

Jain Education International For Personal & Private Use Only www.jainelibrary.org